7243

1. Title Yāgyavalkya Mīnāksharā Vyavahāra (Dvitīya Adhyaya)
2. Accession No. 5541
3. Folio No./Pages 156
4. Lines 15-16
5. Size 32×16Cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not traceable.
10. Beginning "ओम् श्री गणेशाय नमः ओम् अभिषेकादि गुणयुक्त स्पएज्ञा पूजापातिनं परमो धर्मः...."
11. End "स्तेयकरणं 23 स्त्रीसंग्रहकरणं 24 इति चत्तुर्विंशति प्रकरणानि ॥"
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Dharma Śāstra
16. Revisor No
17. Author Bhattarak Vigyaneshvar.
18. Remarks Bound.

मि॰ व्य॰ २

यः कात्यायनेन ब्राह्मणानां सभासदां च स्पष्टं भेदो दर्शितः स प्राड्विवाकः समात्यः सब्राह्मणपुरोहितः सस
भ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः इति तत्र ब्राह्मणा अप्रतियुक्ताः सभासदस्तु नियुक्ता इति भेदः अत ए
वोक्तं नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हतीति तत्र नियुक्तानां यथावस्थितार्थकथनेपि यदि
राजा अन्यथा करोति तदासौ निवारणीयोऽन्यथा दोषः उक्तं च कात्यायनेन अन्यायेनापि तं यांतं ये
नुयांति सभासदः तेपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृप इति अनियुक्तानां पुनरन्यथाभिधाने
अनभिधाने वा दोषो न तु राज्ञो निवारणे तथा च सभा वा न प्रवेष्टव्या वक्तव्यं वा समंजसं अब्रुवन्विब्रु
वन्वापि नरो भवति किल्बिषीति मनुवचनात् द्विजोत्तमैरिति च शब्दात् लोकरंजनार्थं कतिप
यैर्वणिग्भिरप्यधिष्ठितं सदः कर्तव्यं यथाह कात्यायनः कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः वणि
ग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितमिति व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्पमाह अप
श्यता कार्यवशाद्व्यवहारान्नृपेण तु सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ३ कार्यांतरव्याकु
लतया व्यवहारान्स्वयमपश्यता नृपेण ब्राह्मणः सभ्यैः सह सर्वधर्मवित् सर्वान् धर्मशास्त्रोक्तान्साम
यिकांश्च धर्मान् वेत्ति विचारयतीति सर्वधर्मवित् ब्राह्मणो न क्षत्रियादिर्नियोक्तव्यो व्यवहारद
र्शने तं च कात्यायनोक्तगुणविशिष्टं कुर्यात् यथा दांतं कुलीनं मध्यस्थमनुद्वेगकरं स्थि
रं परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितमिति एवंभूतब्राह्मणासंभवे क्षत्रियं वैश्यं वानि २

मि॰ व्य॰ १

श्रीगणेशाय नमः ॐ अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः तच्च दु
ष्टनिग्रहमंतरेण न संभवति दुष्टपरिज्ञानं च न व्यवहारदर्शनेन विनेति व्यवहारदर्शन
महरहः कर्तव्यमित्युक्तं व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोन्वहमिति स च व्यव
हारः कीदृशः कतिविधः कथं चेतीति कर्तव्यताकलापो नाभिहितस्तदभिधानाय
द्वितीयोध्याय आरभ्यते व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह धर्मशास्त्रानुसा
रेण क्रोधलोभविवर्जितः व्यवहारानन्यविरोधेन स्वात्मसंबंधितया कथनं व्यव
हारः यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति अन्योपि तद्विरोधेन मदीयमिति त
स्यानेकविधत्वं दर्शयति बहुवचनेन नृप इति न क्षत्रियमात्रस्यायं धर्मः किंतु प्रजा
पालनेधिकृतस्यान्यस्यापीति दर्शयति पश्येदिति पूर्वोक्तस्यानुवादो धर्मविशेषवि
धानार्थः विद्वद्भिर्वेदव्याकरणधर्मशास्त्राभिज्ञैर्ब्राह्मणैर्न क्षत्रियादिभिः ब्राह्मणैः सहे
ति तृतीयानिर्देशात्तेषामप्राधान्यं सहयुक्तेऽप्रधान इति स्मरणादतश्चादर्शने
ऽन्यथादर्शने च राज्ञो दोषो न ब्राह्मणानां यथाह मनुः अदंड्यान्दंडयन्राजा दंड्यांश्चै १

मि० ति तदपि स एव बहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्ष
व्य० स्तद्वृत्तिश्चाष्टाचत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मसु अभिरतः षट्सु वा सामयाचारिकेष्वभि
विनीत इति प्रतिपादितबहुश्रुतविषयं न ब्राह्मणमात्रविषयं व्यवहारविषयमाह स्मृत्या
चारव्यपेतेन मार्गेणाधर्षितः परैः आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ५ धर्मशास्त्रसदा
चारविरुद्धेन मार्गेण परैराधर्षितोऽभिभूतो यद्राज्ञे प्राड्विवाकाय वा आवेदयति विज्ञापयति चे
त्स यदि तदावेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्म
को व्यवहारस्तस्य पदं विषयः तस्य चेदं सामान्यलक्षणं स च द्विविधः शंकाभियोगस्तत्त्वाभियोगश्च
श्चेति यथाह नारदः अभियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः शंकासतां तु संसर्गात्तत्त्वं होढाभि
दर्शनादिति होढा लोप्त्रलिंगमिति यावत् तेन दर्शनं होढाभिदर्शनं तस्मात् तत्त्वाभियो हा०
गोऽपि द्विविधः प्रतिषेधात्मको विध्यात्मकश्चेति यथा मत्तो हिरण्यादिकं गृहीत्वा न प्रयच्छतीति देवा
दिकं मम अपहरतीति वा उक्तं च कात्यायने न्यायं संन्नेच्छते कर्तुमन्यायं वा करोति य इति पुनश्चा
ष्टादशधा भिद्यते यथाह मनुः तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः संभूय च समुत्थानं
दत्तस्यानपकर्म च वेतनस्यैव चादानं संविदश्च व्यतिक्रमः क्रयविक्रयानुशयो विवादः स्वामिपा
लयोः सीमाविवादधर्मश्च पारुष्ये दंडवाचिके स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च स्त्रीपुंधर्मो

वाप्यदंडयन् अयशो महदाप्नोति नरकं चैव गच्छति धर्मशास्त्रानुसरणार्थः शास्त्रानु ३
सारेण देशादिसमयधर्मस्यापि धर्मशास्त्राविरुद्धस्य धर्मशास्त्रविषयत्वात्तत्पृथगुपादा
नं यथा वक्ष्यति निजधर्माविरोधेन यस्तु सामयिको भवेत् सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृ
तश्च य इति क्रोधलोभविवर्जित इति धर्मशास्त्रानुसारेणेति सिद्धे क्रोधलोभविवर्जित इति व
चनमादरार्थं अमर्षः क्रोधः लोभो लिप्सातिशयः किंच श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्य
वादिनः राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः २ श्रुतेन मीमांसाव्याकरणादिश्रवणेन वे
दाध्ययनेन च सम्पन्नाः धर्मज्ञाः धर्मशास्त्रज्ञाः सत्यवादिनः सत्यवादनशीलाः रिपौ मित्रे च ये
समाः द्वेषरागादिरहिताः एवंभूताः सभासदः सभायां यथा सीदंति उपविशंति तथा दानमान
सत्कारैः राज्ञा कर्तव्याः यद्यपि श्रुताध्ययनसम्पन्ना इत्यविशेषेणोक्तं तथापि ब्राह्मणा एव यथा
ह कात्यायनः स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशा
रदैरिति ते च त्रयः कर्तव्याः बहुवचनस्यार्थवत्त्वात् यस्मिन्देशे निषीदंति विप्रा वेदविदस्त्रयः इ
ति मनुस्मरणाच्च बृहस्पतिस्तु सप्त पंच त्रयो वापि यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभेति न
च ब्राह्मणैः सहेति पूर्वश्लोकोक्तानां ब्राह्मणानां श्रुताध्ययनसम्पन्ना इत्यादिविशेषणमिति मंतव्यं
तृतीयाप्रथमांतनिर्दिष्टानां विशेषणविशेष्यभावासंभवाद्विद्वद्भिरित्यनेन पुनरुक्तिप्रसंगाच्च त

मि॰
व्य॰
४

स्मृताः तदधीनकुटुंबिन्यः स्वैरिण्यो गणिकाश्च याः निष्कुला याश्च पतितास्तासामाह्वानमिष्यते का
लं देशं च विज्ञाय कार्याणां च बलाबलं अकल्यादीनपि शनैर्यानैराह्वानयेन्नृपः ज्ञात्वाभियोगं
येपि स्युर्वने प्रव्रजितादयः तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्निति आसेधव्यवस्थाप्य
र्थसिद्धेर्नारदेनोक्ता वक्तव्येर्थे ह्यतिष्ठंतमुत्क्रामंतं च तद्वचः आसेधयेद्विवादार्थी यावदाह्वा
नदर्शनं स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा चतुर्विधः स्यादासेधो नासिद्धस्तं विलंघ
येत् आसेधकाल आसिद्ध आसेधं योतिवर्त्तते स विनेयोन्यथा कुर्वन्नासेद्धा दंडभाग्भवेत् न
दीसंतारकांतारदुर्देशोपप्लवादिषु आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् निर्वेष्टुका
मो रोगार्त्तो विवक्षुर्व्यसने स्थितः अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा गवां प्रचारे गोपा
लाः सस्यावापे कृषीवलाः शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे इति आसेधो राजाज्ञ
याऽवरोधः अकल्यादयः पुत्रादिकमन्यं वा सुहृदं प्रेषयेत्तेन च ते परार्थवादिनः यो न भ्राता
न च पिता न पुत्रो न नियोगकृत् परार्थवादी दंड्यः स्याद्व्यवहारेषु विब्रुवन् इति नारदवचना
त् प्रत्यर्थिनि मुद्रालेख्यपुरुषाणामन्यतमेनानीते किं कुर्यादित्यत आह प्रत्यर्थिनोग्रतो
लेख्यं यथावेदितमर्थिना समामासतदर्द्धाहर्नामजात्यादिचिह्नितं ६ अर्थ्यत इत्यर्थः साध्यः
सोस्यास्तीत्यर्थी तस्य प्रतिपक्षः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयं यथा येन प्रकारे ४
युंजीत न शूद्रं यथाह कात्यायनः ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् वैश्यं वा धर्मशास्त्रज्ञं शू
द्रं यत्नेन वर्जयेदिति नारदेन त्वयमेव मुख्यो दर्शितः धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः समाहि
तमतिः पश्येद्व्यवहाराननुक्रमादिति प्राड्विवाकमते स्थितो न स्वमते स्थितः राजा चारचक्षुषा परसैन्यं
पश्यतीतिवत् तस्य चेयं यौगिकी संज्ञा अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धमविरुद्धं च स
भ्यैः सह विविनक्ति विवक्तीति वा विवाकः प्राट् सौ विवाकश्चेति प्राड्विवाकः उक्तं च विवादानुगतं पृष्ट्वा ससभ्य
स्तत्प्रयत्नतः विचारयति येनासौ प्राड्विवाकस्ततः स्मृत इति अपि च रागाल्लोभाद्भयाद्वापि स्मृत्यपेतादिकारि
णः सभ्याः पृथक् पृथग्दंड्या विवादाद्द्विगुणं दमं ४ पूर्वोक्ताः सभ्या रजसो निरंकुशत्वेन तदभिभूताः रागात्
स्नेहातिशयात् लोभाद्धनलिप्सातिशयात् भयाद्वा संत्रासात् स्मृत्यपेतं स्मृतिविरुद्धं आदिशब्दादा
चारापेतं कुर्वंतः पृथक् पृथगेकैकशः विवादाद्विवादपराजयनिमित्ताद्दमाद्द्विगुणं दमं दंड्याः
न पुनर्विवादास्पदीभूतात् द्रव्यात् तथा सति स्त्रीसंग्रहणादिषु दंडाभावप्रसंगः रागलो
भभयानामुपादानं रागादिष्वेव द्विगुणो दमो नाज्ञानमोहादिष्विति नियमार्थं न च राजा
सर्वस्वेष्वेब्राह्मणवर्ज्यमिति गौतमवचनात् ब्राह्मणो दंड्य इति मंतव्यं तस्य प्रशंसार्थत्वात्
यत्तु षड्भिः परिहार्यो राज्ञाऽवध्यश्चावंध्यश्चादंड्यश्चाबहिःकार्यश्चापरिवाद्यश्चापरिहार्यश्चे

मि॰
व्य॰

एवं मासादिष्वपि योज्यं देशस्थानादयः पुनः स्थावरेष्वेवोपयुज्यन्ते देशश्चैव तथा स्थानं संनिवेश
स्तथैव च। जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च। पितृपैतामहं चैव पूर्वराजानुकीर्त्तनं। स्था
वरेषु विवादेषु दशैतानि निवेशयेदिति स्मरणात्। देशो मध्यदेशादिः स्थानं वाराणस्यादि संनिवेश
स्तत्रैव पूर्वापरादिदिग्विभागपरिच्छिन्नः संनिविष्टो गृहक्षेत्रादिः जातिरर्थिप्रत्यर्थिनोर्ब्राह्मणत्वादिः
संज्ञां च देवदत्तादिः अधिवासः समीपदेशवासी जनः प्रमाणं निवर्त्तनादिभिर्मितिप्रमाणं क्षेत्रनाम
ग्रामे लिखितैकमुकक्षेत्रं कृष्णभूमिः पाण्डुभूमिरिति पितृपितामहस्य च नाम अर्थिप्रत्यर्थिनोः पूर्वेषां त्र
याणां राज्ञां नामकीर्त्तनं चेति समामासादीनां यस्मिन्व्यवहारे यावदुपयुज्यते तत्तावल्लेखनीय
मितितात्पर्यार्थः। एवं पक्षलक्षणोपस्थिते पक्षलक्षणोपस्थिते पक्षलक्षणरहितानां पक्षवदवभास
मानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृथक् पक्षाभासा उक्ताः। अन्यैस्तु विस्पष्टार्थमुक्तं अप्र
सिद्धं निराबाधं निरर्थं निःप्रयोजनं असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्। इति अप्रसिद्धम
दीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि निराबाधं अस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवह
रतीत्यादि निरर्थं अभिधेयरहितं कचटतपगजडदबमित्यादि निःप्रयोजनं यथायं देवदत्तोस्मद्गृ
हे संनिधौ सुस्वरमधीत इत्यादि असाध्यं यथाहं देवदत्तेन सभ्रूभंगमुपहसित इत्यादि एतत्साध
नासंभवादसाध्यं अस्य कान्तत्वान्न साक्षिसंभवो लिखितं इतरतो लब्धा न दिव्यमिति विरुद्धं यथा ५

॥

मि॰
व्य॰

विभागश्चाद्यूतमाह्वय एव च पदान्यष्टादशैतानि व्यवहारस्थितानि हेति एतान्यपि [illegible]
बहुत्वं गतानि यथाह नारदः। एषामेव प्रभेदोन्यः शतमष्टोत्तरं स्मृतं। क्रियाभेदान्मनुष्याणां शत
शाखो निगद्यत इति आवेदयतीत्यनेन स्वयमेवागत्यावेदयति न राज्ञा प्रेरितस्तत्पुरुषप्रेरितो
वेति दर्शयति यथाह मनुः। नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः। न च प्रापितमन्येन ग्र
सेतार्थं कथंचनेति परैरिति परेण परान्प्रति परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भ
वतीति दर्शयति यत्पुनरेकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च। अनादेयो भवेद्वादो धर्मवि
द्भिरुदाहृत इति नारदवचनं तद्भिन्नसाध्यविषयं आवेदयति राज्ञ इत्यनेनैव राज्ञा पृष्टेनावि
नीतवेषेणावेदयेदावेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानमित्याद्यर्थसिद्धमिति नोक्तं स्मृ
त्यन्तरे तु स्पष्टार्थमुक्तं यथा काले कार्यार्थिनं पृच्छेत्प्रणतं पुरतः स्थितं किं कार्यं का च ते पीडा मा भैषीर्ब्रू
हि मानव केन कस्मिन्कदा कस्मात्पृच्छेदेवं सभागतं एवं पृष्टः स यद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैः सह वि
मृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परं मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत्। अकल्यबाल
स्थविरविषमस्थक्रियाकुलान्। कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान्। मत्तोन्मत्तप्रमत्तार्त
भृत्यान्नाकारयेन्नृपः। न हीनपक्षां युवतीं कुले जातां प्रसूतिकां। सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः

10

मि॰ ल्पास्तदा रागलोभादिस्पुक्तं दंडेन सम्यान् दंडयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारः प्रवर्त्तनीयो राज्ञेति
व्य॰ एवं शोधिते यथारूढे पूर्वपक्षे किं कर्त्तव्यमित्यत आह श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसंनिधौ श्रु
तो भाषार्थो येन प्रत्यर्थिना सो श्रुतार्थस्तस्योत्तरं पूर्वपक्षादुत्तरं भवतीत्युत्तरं लेख्यं लेखनीयं पू
र्वावेदकस्यार्थिनः संनिधौ समीपे उत्तरं च यत्पूर्वोक्तस्य निराकरणं तदुच्यते यथाह पक्षस्य व्यापकं
सारमसंदिग्धमनाकुलं अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुरिति पक्षस्य व्यापकं निराकरणस
मर्थं सारं न्याय्यं न्यायादनपेतं असंदिग्धं संदेहरहितं अनाकुलं पूर्वपराविरुद्धं अव्याख्यागम्यं ए
अप्रसिद्धमदयोगेन दुष्लिष्टविभक्तिसमाससाध्याहाराभिधानेन वा अन्यदेशभाषाभिधानेन वा यद्व्या
ख्येयार्थं न भवति तत्तदुत्तरं तच्च चतुर्विधं संप्रतिपत्तिर्मिथ्या प्रत्यवस्कंदनं पूर्वन्यायश्चेति यथाह का
त्यायनः सत्यं मिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति तत्र स
त्योत्तरं यथा रूपकशतं मह्यं धारयतीत्युक्ते सत्यं धारयामीति यथाह साध्यस्य सत्यवचनं प्रतिपत्तिः
रुदाहृतेति मिथ्योत्तरं यथा रूपकशतं मह्यं धारयतीत्युक्ते नाहं धारयामीति तथा च कात्यायनः अ
भियुक्तोभियोगस्य यदि कुर्यादपन्हवं मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः इति तच्च मिथ्योत्तरं च
तुर्विधं मिथ्यैतन्नाभिजानामि तदा तत्र न सन्निधिः अजातश्चास्मि तत्काल इति मिथ्या चतुर्विध
मिति प्रत्यवस्कंदनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा यथाह नारदः अर्थिना ६

न्पूर्वमावेदनकाले आवेदितं तथा न पुन [illegible]
नोपस्थापनीनिरुत्तरः आहूतप्रपलायी च हीनः पंचविधः स्मृतः इति आवेदनकाल एवार्थिवचनं
स्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह समामासेत्यादि संवत्सरमासपक्षतिथिवारदि
नार्थिप्रत्यर्थिनामवर्णादिज्ञात्यादिचिन्हितं आदिशब्देन द्रव्यतत्संख्यास्थानवेलाक्षमालिंगादी
नि गृह्यंते यथोक्तं अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलं साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च
प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमं संक्षिप्तं निखिलार्थं देशकालाविरोधि च वर्षर्तुमासपक्षा
होवेलादेशप्रदेशवत् स्थानावसथसाध्याख्याजात्याकारवयोयुतं साध्यप्रमाणसंख्यावदात्म
प्रत्यर्थिनामवत् परमात्मपूर्वजानेकराजनामभिरंकितं क्षमालिंगात्मपीडावत्कथिताह
र्तृदायकं यदावेदयते राज्ञे तद्भाषेत्यभिधीयते इति भाषा प्रतिज्ञा पक्ष इत्यनर्थान्तरं आवेदनस
मये कार्यमात्रं लिखितं प्रत्यर्थिनोग्रतः समामासादिविशिष्टं लिख्यत इति विशेषः संवत्सरवि
शेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते ॥
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति वचनात् अर्थव्यवहारेपि एकस्मिन्वत्सरे यत्संख्याकं
यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं यच्च
मानो यदि ब्रूयात्सत्यं गृहीतं प्रत्यर्पितं चेति वत्सरांतरे गृहीत्वा प्रत्यर्पितं तस्मिन्वत्सर इत्युपयुज्यते

मि॰ व्य॰

सुवर्णशतमभियोगे सत्यं न धारयामीति व्याख्यागम्यं दुःश्लिष्टविभक्तिसमाससाध्याहाराभिधानेन वा
देशभाषाभिधानेन वा यथा सुवर्णशतविषये पितुरभियोगे गृहीतशतवचनात् सुवर्णानां
पितुर्न जानामीति अत्र गृहीतशतस्यापि तु वचनात् सुवर्णानां शतं गृहीतमिति न जानामीति असा
रं न्यायविरुद्धं यथा सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे सत्यं वृद्धिर्दत्ता
न मूलं गृहीतमिति उत्तरमित्येकवचननिर्देशादनुत्तराणां संकरो निरस्तः यथाह कात्यायनः
पक्षैकदेशे यत्सत्यमेकदेशे च कारणं मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति अनुत्तरत्वे च
कारणं तेनैवोक्तं न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः न चार्थसिद्धिरुभयोर्न चैकत्र क्रि
याद्वयमिति मिथ्याकारणोत्तरयोः संकरेऽर्थिप्रत्यर्थिनोर्द्वयोरपि क्रिया प्राप्नोति मिथ्या क्रिया पू
र्ववादे कारणे प्रतिवादिनीति स्मरणात् तदुभयमेकस्मिन् व्यवहारे विरुद्धं यथा सुवर्णं रूपक
शतं चानेन गृहीतमित्यभियोगे सुवर्णं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति कारणप्राङ्न्या
यसंकरे तु प्रत्यर्थिन एव क्रियाद्वयं प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियामिति यथा सु
वर्णं गृहीतं प्रतिदत्तं रूपके व्यवहारमार्गेण पराजित इति अत्र प्राङ्न्याये जयपत्रेण वा प्राङ्न्याय
ज्ञ यद्दर्शिभिर्वा भावयितव्यं कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्यमिति विरोधः एवमु
त्तरत्रयसंकरेपि द्रष्टव्यं यथानेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुव ७

हस्तकेन शप्तं इत्यादि पौरसाधुविरुद्धं वा राजादिवर्जितो यश्च यश्च पाराविसद्धकृत् [illegible]
तीनां तथैव च अन्यैर्वा ये पुरग्राममहाजनविरोधकाः अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिता इति
यत्त्वनेकपदसंकीर्णः पूर्वपक्षो न सिद्ध्यतीति तत्र यद्यनेकवस्तुसंकीर्ण इत्युच्यते तदा न दोषः मदीय
मनेन हिरण्यं वासो रूपकादि वापहृतमित्येवंविधस्यादुष्टत्वात् ऋणादानादिपदसंकरपक्षाभास इति
चेत्तदपि न मदीया रूपका अनेन वृद्ध्या गृहीताः सुवर्णं वास्य हस्ते निक्षिप्तं मदीयं क्षेत्रमयमपहरति चेत्यादौ
नोपपन्नमिष्यत एव किं तु क्रियाभेदात्क्रमेण व्यवहारो न युगपदित्येतावत् यथाह कात्यायनः बहुप्रति
ज्ञं यत्कार्यं व्यवहारेषु निश्चितं कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सयेति तस्मादनेकपदसंकीर्णः
पूर्वपक्षे युगपन्न सिद्ध्यतीति तस्यार्थः अर्थिग्रहणात्पुत्रपित्रादीनां ग्रहणं तेषामेकार्थत्वात् नियुक्त
स्यापि नियोगेनैव तदेकार्थत्वाद्धेतोः अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोपि वा यो यस्यार्थे विव
दन्ते हयोर्जयपराजयाविति स्मरणात् नियुक्ते जयपराजयौ मूलस्वामिनोरेव एतत्सर्वं भूमौ फल
के वा पाण्डुलेखेन लिखित्वा आचार्योद्धारेण विशोधितं पश्चात्पत्रे निवेशयेत् पूर्वपक्षं स्वभावोक्तं प्राड्वि
वाकोभिलेखयेत् पाण्डुलेखेन फलके ततः पत्रे विशोधितमिति कात्यायनस्मरणात् शोधनं च यावदु
त्तरदर्शनं कर्तव्यं नातः परमनवस्थाप्रसंगात् अत एव नारदेनोक्तं शोधयेत्पूर्ववादं तु यावन्नो
त्तरदर्शनं अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेदिति पूर्वपक्षमशोधयित्वैव यद्युत्तरं दापयति स ह

र्णं गृहीतं प्रतिदत्तं च रूपकशतं तु न गृहीतं वस्त्रविषये पूर्वन्यायेन पराजित इति एवं चतुःशंकरेऽपि ए
तेषां चतुर्णामुत्तरत्वे योगपद्येन तस्य तस्यांशस्य तेन तेन विना सिद्धेः क्रमेणोत्तरत्वमेव क्रमश्चार्थिनः प्रत्य
र्थिनः सभ्यानां चेच्छया भवति यत्र पुनरुभयोः संकरे यस्य प्रभूतार्थविषयत्वं तत्तत्क्रियोपादानेन पू
र्वं व्यवहारः प्रवर्तयितव्यः पश्चादल्पविषयोत्तरोपादानेन यत्र तु संप्रतिपत्तेरुत्तरांतरस्य संक
रस्तत्रोत्तरोपादानेन व्यवहारो द्रष्टव्यः संप्रतिपत्तौ क्रियाभावान्न व्यवहारस्तेन मिथ्योत्तरं कारणं च
स्यातामेकत्र चेदुभे सत्यं वापि सहान्येन न त्वग्राह्यं किमुत्तरमित्युक्ते उक्तं यत्प्रभूतार्थविषयं यत्र वा
स्यात्क्रियाफलं उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा संकीर्णं भवतीति शेषापेक्षं क्रमं भवतीत्यर्थः
तत्र प्रभूतार्थं यथानेन सुवर्णरूपकशतं वस्त्राणि च गृहीतानि इत्यभियोगे सुवर्णरूपकशतं च न
गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनः क्रियामादा
य प्रथमं व्यवहारः प्रवर्तयितव्यः पश्चाद्वस्त्रविषयो व्यवहारः एवं मिथ्याप्राङ्न्यायसंकरे कारणप्राङ्
न्यायसंकरे च योजनीयं तथास्मिन्नेवाभियोगे सत्यं सुवर्णरूपकशतं च गृहीतं दास्यामि वस्त्राणि तु न
गृहीतानि गृहीतानि प्रतिदत्तानीति वा वस्त्रविषये पूर्वं पराजित इति चोत्तरे संप्रतिपत्तेर्भूरिविषत्वे
ऽपि तत्र क्रियाभावान्मिथ्याद्युत्तरक्रियामादाय व्यवहारः प्रवर्तयितव्यः यत्र तु मिथ्याकारणोत्तरयोः कृ
त्स्नपक्षव्यापित्वं यथाऽयं गां गृहीत्वा कश्चिद्वदति इयं गौर्मदीयामुकस्मिन्काले नष्टाद्यास्य गृहे दृष्टेति
अन्यैस्तु मिथ्यैतदेतस्य दिष्टकात्प्रभृत्येवास्मद्गृहे स्थिता मम गृहे जाता चेति वदति इदं तावत्सकृति
लावत्ताया यथा प्रत्यवस्था यदि तत्तथा प्रपद्य कारणं ब्रूयात्सुखवस्कंदनमस्मीति प्राङ्न्याये तु
त्राभियुक्त एवं ब्रूयादस्मिन्नर्थेऽनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति उ
क्तं च कात्यायनेन आचारेणावसन्नोऽपि पुनर्लेखयते यदि सोऽभियोगे जितः पूर्वं प्राङ्न्याय
स्तु स उच्यत इति एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानामुत्तरवदवभासमानाना
मुत्तराभावमर्थप्रसिद्धं स्पष्टीकर्तुं स्मृत्यंतरे संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च प
क्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत् यच्छलपदमव्यापि निगूढार्थं तथाकुलं व्या
ख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धय इति तत्र संदिग्धं सुवर्णशतमनेन गृहीतमित्युक्ते
सत्यं गृहीतं सुवर्णशतं माषशतं चेति प्रकृतादन्यत् यथा सुवर्णशताभियोगे पणशतं धारया
मीति, पक्षैकदेशव्यापि हिरण्यवस्त्रादभियोगे हिरण्यं गृहीतं नान्यदिति व्यस्तपदमन्यदा
नाभियोगे पदांतरेणोक्तं यथा सुवर्णशताभियोगेऽनेनाहं ताडित इति अव्यापि देशस्थाना
दिविशेषणव्यापि यथा मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे
लिखिते क्षेत्रमपहृतमिति निगूढार्थं सुवर्णशताभियोगे किमहमेव धारयामीत्यत्र ध्वनिनाभि
हितवाक्यः सभ्यो वार्थी वान्यस्मै धारयतीति सूचयतीति निगूढार्थं आकुलं पूर्वापरविरुद्धं यथा
५ अस्य त्वं सुवर्णशताभियोगे पंच धारयामीति अतिमरि सुवर्णशताभियोगे द्विशतं धारयामीति ५

र्थश्चेति प्रतिज्ञातार्थस्तस्य साधनं साध्यते नेनेति साधनं प्रमाणं अत्र सद्यो लेखयेदिति वदतोऽ
त्तराभिधाने कालविलंबनमप्यंगीकृतमिति गम्यते तच्चोत्तरत्र विवेचयिष्यते अर्थी प्रतिज्ञातार्थ
साधनं लेखयेदिति वदतायस्य साध्यमास्तस प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तमतश्च प्राङ्न्यायो
त्तरे प्राङ्न्यायस्यैव साध्यत्वात्प्रत्यर्थ्येवार्थी जातः इति एवं साधनं निर्दिशेत् कारणोत्तरे पि कारण
स्यैव साधत्वात्कारणवाद्येवार्थीति स एव तल्लेखयेत् मिथ्योत्तरे तु पूर्ववाद्येवार्थीति स एव साधनं नि
र्दिशेत् तथार्थी लेखयेदिति वदता अर्थ्येव लेखयेन्नान्य इत्युक्तमतश्च सम्प्रतिपत्त्युत्तरे साध्याभा
वेन भावोत्तरवादिनोर्द्वयोरप्यर्थित्वाभावात्साधननिर्देश एव नास्तीति तावतैव व्यवहारः परिस
माप्यत इति गम्यते एतदेव हारीतेन स्पष्टमुक्तं प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियां
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति ततः किमत्यत आह तत्सिद्धौ सिद्धिमाप्नोति वि
परीतमतोन्यथा तस्य साधनस्य प्रमाणस्य वक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्य सिद्धौ निर्वृत्तौ
सिद्धिं साध्यस्य जयलक्षणां प्राप्नोति विपरीतमतोन्यथा अतोस्मात्प्रकारादन्यथाप्रकारो
त्तरे साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं पराजयलक्षणामाप्नोतीति संबंधः एवं व्यवहार
रूपमभिधायोपसंहरति चतुष्पाद्व्यवहारोयं विवादेषूपदर्शितः ८ व्यवहारान्नृपः पश्ये
दित्युक्तो व्यवहारः सोयमिह चतुष्पात् चतुरंशः कल्पनया विवादेन ऋणादानादिषूपदर्शि
तो दर्शितः तत्र प्रत्यर्थिनो यतो लेख्यमिति भाषापादः प्रथमः श्रुतार्थस्योत्तरं लेख्यमित्युत्तर
पादो द्वितीयः ततोर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः तत्सिद्धौ सिद्धिमाप्नोतीति सा
ध्यसिद्धिपादश्चतुर्थः यथोक्तं परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु वाक्यान्न्यायाद्व्य

मि॰
व्य॰
८

राकरस्य समर्थत्वान्नानुत्तरं नापि मिथ्यैव कारणोपन्यासाभावान्नापि कारणं एकदेशस्याप्यभ्युपगमाभावात् तस्मा
त्स कारणं मिथ्योत्तरमिदं अत्र च प्रतिवादिनः क्रिया कारणे प्रतिवादिनीति वचनात् ननु मिथ्या क्रिया पू
र्ववाद इति वादिनः कस्मान्न क्रिया न भवति सत्यं तत्तु शुद्धमिथ्याविषयत्वात् कारणे प्रतिवादिनीत्येतदपि कस्मा
च्छुद्धकारणविषयं न भवति नैतत् सर्वस्यापि कारणस्योत्तरस्य मिथ्यासहचरितरूपत्वात् शुद्धकारणोत्तर
स्याभावात् प्रसिद्धकारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्युपगमेनैकदेशस्य मिथ्यात्वं यथा सत्यं रूपकशतं गृही
तं न धारयामि प्रतिदत्तत्वात् इति प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याभ्युपगमो नास्तीति विशेषः एत
द्धारीतेन स्पष्टमुक्तं मिथ्याकारणयोर्वापि ग्राह्यं कारणमुत्तरमिति यत्र मिथ्या प्राङ्न्याययोः पक्षव्यापित्वं
यथा रूपकशतं धारयतीत्यभियोगे मिथ्यैतदस्मिन्नर्थे पूर्वमयं पराजित इति अत्रापि प्रतिवादिन एक
क्रिया प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियामिति वचनाच्छुद्धस्य प्राङ्न्यायस्याभावादनुत्तरत्व
प्रसंगात् संप्रतिपत्तेरपि साध्यत्वे नोपदिष्टस्य पक्षस्य सिद्धत्वोपन्यासेन साध्यत्वनिराकरणादेवो
त्तरत्वं यदा तु कारणप्राङ्न्यायसंकरः यथा शतमेतेन गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्र
तिदत्तं चेत्यस्मिन्नेवार्थे प्राङ्न्यायेनायं पराजित इति तत्र प्रतिवादिनो यथारुचीति न कश्चिद्वादिप्र
तिवादिनोरेकस्मिन् व्यवहारे क्रियाप्रसंग इति निर्णयः एवमुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधना
यत्वात् साधननिर्देशं कः कुर्यादित्यपेक्षितमाह ततोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनं ७
ततः उत्तरानंतरं अर्थी साध्यवान्सद्य एवानंतरमेव लेखयेत् प्रतिज्ञातः साध्यः सत्वासाव

२

हीतमित्यावेदनसमये प्रतिवाद्यप्रत्यर्थिसन्निधौ भाषासमये वस्त्रशतं वृद्ध्यागृहीतमिति न वक्तव्यं तथा उ
त्तिपदांतरगमनेपि वस्त्वंतरगमनाद्धीनवादी दंड्यः स्यादिति नोक्तं विप्रकृतिं नयेदित्यनेनैकव
स्तुत्वेपि पदांतरगमनं निषिध्यते यथा रूपकशतं वृद्ध्यागृहीतं मयेत्यावेदनकालेभि
धाय भाषाकाले रूपकशतं बलादपहृतवानिति वदतीति तत्र वस्त्वंतरगमनं निषिद्धमिह तु पदां
तरगमनं निषिध्यत इति न पौनरुक्त्यं एतदेव स्पष्टीकृतं नारदेन पूर्ववादं परित्यज्य योन्यमालंबते
पुनः पदसंक्रमणात्ज्ञेयो हीनवादी स वै नर इति हीनवादी दंड्यो भवति न प्रकृतार्थाद्धीयते अ
तः प्रत्यर्थिनोऽर्थिनश्च प्रमादपरिहारार्थमेवायमभियोगमनिस्तीर्येत्याद्युपदेशो न प्रकृतार्थसिद्ध्य
सिद्धिविषयः अत एव वक्ष्यति छलं निरस्य भूतेन व्यवहारान्नयेन्नृप इति एतच्चार्थव्यवहारे द्र
ष्टव्यं मन्युकृतेषु व्यवहारे प्रमादाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव यथाह नारदः सर्वेष्व
र्थविवादेषु वाक्छले नावसीदति परस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयत इति अस्यार्थः सर्वेष्व
र्थविवादेषु न मन्युकृतेषु वाक्छले प्रमादाभिधानेपि नावसीदति न पराजीयते न प्रकृतार्थाद्धी
यत इत्यर्थः सर्वेष्वर्थविवादेष्विति अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमादाभिधानेन प्र
कृतार्थाद्धीयत [illegible] त इति गम्यते यथाहमनेन शिरसि पादेन ताडित इत्यावेदनसमयेभिधाय
भाषाकाले हस्तेन पादेन वा ताडित इति वदन्न केवलं दंड्यः पराजीयते च अभियोगमनिस्तीर्य नै
नं प्रत्यभियोजयेदित्यस्यापवादमाह कुर्यात्प्रत्यभियोगं च कलहे साहसेषु च कलहे वाग्दंडपा
४ अत्रोदाहरणं परस्त्रीत्यादि परस्त्रीभूम्यृणादाने प्रमादाभिधानेन दंड्योपि यथा प्रकृतार्थान्न हीयते एवं ४

व्य०

८

दभिधीयत इति सप्रतिपत्त्युत्तरे तु साधनानिर्देशाकांक्षार्थस्यासाध्यत्वाच्च न साध्यसिद्धिलक्षणः
पादोस्तीति द्विपात्त्वमेव उत्तराभिधानानंतरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रियास्यादिति प
रामर्शनार्थं लक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानाद्व्यवहर्तृ
संबंधाभावाच्च न व्यवहारपादत्वमिति स्थिते सर्वव्यवहारमातृकामेवं सर्वव्यवहारोपयोगिनी
व्यवहारमातृकामभिधायाधुना कंचिद्व्यवहारविशेषं केचिद्विशेषं दर्शयितुमाह अभियोग
मनिस्तीर्य नैनं प्रत्यभियोजयेत् अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ९ अभियुज्यत इ
त्यभियोगः पराधस्तमभियोगमनुत्तीर्य परिहृत्य एनमभियोक्तारं न प्रत्यभियोजयेदपराधेन
न संयोजयेत् यद्यपि प्रत्यवस्कंदनं प्रत्यभियोगरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य
प्रतिषेधस्य विषयः अतः स्वाभियोगानुपमर्दनरूपस्य प्रत्यभियोगस्यायं निषेधः इदं प्रत्यर्थि
नमधिकृत्योक्तमर्थिनं प्रत्याह अभियुक्तं च नान्येनेति अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्यो
र्थी नाभियोजयेत् किंच उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धस्वभावं तं न येन्न प्रापये
त् तदुक्तं भवति यद्वस्तु येन रूपेणावेदनसमये निरूपितं तद्वस्तु तथैव भाषाकालेपि लेख
नीयं नान्यथेति ननु प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिनेत्यत्रैवावेदनमुक्तं किमर्थं पुनरु
च्यते नोक्तं विप्रकृतिं नयेदिति उच्यते यथावेदितमर्थिनेत्यनेनावेदनसमये यद्वस्तु निवेदितं तत
देव भाषासमयेपि लेखनीयमेकस्मिन्नपि पदे न वस्त्वंतरमित्युक्तं यथानेन रूपकशतं वृद्ध्याग ८

२०

निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं । मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ॥११॥ अर्थिनाभि
वेदितस्याभियोगस्य प्रत्यर्थिनापह्नवे कृते यद्यर्थिना सदस्यादिभिर्भावितोङ्गीकारितः प्रत्यर्थी त
दा दद्याद्धनं प्रकृतमर्थिने राज्ञे च तत्सममलापदंडं अथ प्रत्यर्थी भावयितुं न शक्नोति तदा मिथ्या
भियोगी जातस्तस्मादभियोगादभियुक्ताद्धनाद्द्विगुणं धनं दद्याद्राज्ञे प्राङ्न्याये प्रत्यवस्कंदने चेदमेव द
योजनीयं तत्रार्थी वापह्नववादीति प्रत्यर्थिना भावितो राज्ञे पराजयसमं दंडं दद्यात् प्रत्यर्थी
प्राङ्न्यायं कारणं वा भावयितुं न शक्नोति तदासावेव मिथ्याभियोगीति राज्ञे द्विगुणं धनं दद्यादर्थि
ने च प्रकृतं धनं संप्रतिपत्त्युत्तरे तु दंडाभावः एतच्च ऋणादानविषयपदेतरेषु तत्र तत्र दंडो
ऽभिधानाद्धनव्यवहारे अस्यासंभवान्न सर्वविषयत्वं राज्ञाधमर्णिको दाप्य इत्यस्य ऋणादानविषयत्वेपि ह
नत्रैव विशेषवचनैः एतदेव सर्वव्यवहारविषयत्वेनापि योजनीयं कथं अभियोगस्य निह्नवे भि
युक्तेन कृते यद्यभियोक्ता साक्ष्यादिभिर्भावितोभियुक्तस्तदा तत्समं तत्र तत्र प्रतिपदोक्तमेव च शुद्धे
व धारयेत धनं दंडं च दद्यादित्यनुवादः अथाभियोक्ता अभियोगं भावयितुं न शक्नोति तदा मिथ्याभि
योगीति प्रतिपदोक्तं धनं दंडं द्विगुणं दद्यादिति विधीयते अत्रापि प्राङ्न्याये प्रत्यवस्कंदने च पूर्व
वदेव योजनीयं तत्रोर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमिति वदतो तत्र पादलेखने काल
प्रतीक्षणं दर्शितं तत्रापवादमाह साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियां विवादयेत्सद्य एव कालो
ऽन्येच्छया स्मृतः ॥१२॥ साहसं विषशस्त्रादिनिमित्तं प्राणव्यापादनादि स्तेयं चौर्यं पारुष्यं वाग्दंडपारु
ष्यं वक्ष्यमाणलक्षणं गोभिशापः अभिशापः पातकाभियोगः अत्ययः प्राणधनातिपातः तस्मिन्दं

मि.
व्य.
१०

रुष्यात्मके साहसे विषशस्त्रादिना प्राणव्यापादनादौ प्रत्यभियोगसंभवस्त्वभियोगमनि
स्तीर्याभियोक्तारं प्रत्यभियोजयेत् न त्वन्यार्थापि पूर्वपक्षानुपमर्दनरूपत्वेनानुत्तरत्वात्प्रत्यभि
योगस्य प्रतिज्ञांतरत्वे युगपद्व्यवहारासंभवात् समानः सत्यनात्र युगपद्व्यवहाराय प्रत्यभियो
गोपदेशः अपितु न्यूनदंडप्राप्तये अधिकदंडनिवृत्तये च तथाहि अनेनाहं ताडितः शप्तो चे
त्यभियोगे पूर्वमहमनेन ताडितः शप्तो चेति प्रत्यभियोगे दंडाल्पत्वं यथाह नारदः पूर्वमाक्षा
रयेद्यस्तु नियतं स्यात्स दोषभाक् पश्चाद्यः सोप्यसत्कारी पूर्वे तु विनयो गुरुरिति यदा पुनर्युगप
पद्दोषस्ताडनादिप्रवृत्तिस्तत्राधिकनिवृत्तिः पारुष्ये साहसे चापि युगपत्संप्रवृत्तयोः विशेष
श्चेन्न लभ्येत विनयः स्यात्समस्तयोः इति एवं युगपद्व्यवहारप्रवृत्ताः संभवेपि कलहादौ प्रत्यभि
योगोर्थवानुक्तः स्मृत्यादिषु तु निरर्थक एव अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा सभ्यसभापतेः क
र्तव्यमाह उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥१०॥ उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवा
देषु निर्णयस्य कार्यं कार्यनिर्णयः आहिताग्न्यादिषु पाठात्कार्यशब्दस्य पूर्वनिपातः निर्ण
यस्य च कार्यं साध्यधनदानं दंडदानं च तस्मिन् प्रतिभूः प्रतिभवति तत्कार्यं तद्भवतीति
प्रतिभूर्ग्राह्यः सभ्येन सभापतिना तस्यासंभवेर्थिप्रत्यर्थिनोरक्षितपुरुषा नियोक्तव्यास्ते
भ्यश्च ताभ्यां प्रतिदिनं वेतनं देयं यथाह कात्यायनः अथ चेत्प्रतिभूर्नास्ति कार्ययोग्यस्तु वा
दिनः स रक्षितो दिनस्यांते दद्याद्भृत्याय वेतनमिति अर्थिप्रत्यर्थिनोर्निर्णयकार्ये सभ्ये
न सभापतिना प्रतिभूर्ग्राह्य इत्युक्तं किं तन्निर्णयकार्यं यस्मिन्प्रतिभूर्ग्राह्यत इत्यपेक्षित आह

र्शिने नमः तत्कार्यं कुर्वन्नेव मस्य पराजयो रक्षिष्यतीति लिंगादवगतेऽपि न पराजयनिमित्तकार्यप्रसंगः किंच
संदिग्धार्थं स्वतंत्रो यः साधयेद्यश्च निष्पतेत् न चाहूतो वदेत्किंचित् हीनो दंड्यश्च स स्मृतः १६ संदिग्ध
मर्थमधमर्णो नानंगीकृतमेव यः स्वतंत्रः साधननिरपेक्षः साधयत्यासेधादिना स हीनो दंड्यश्च भव
ति यश्च स्वयं प्रतिपन्नं साधनेन वा साधितं याच्यमानो निष्पतेत् पलायते यश्चाभियुक्तो राज्ञा चाहूतः स
दसि न किंचिद्वदति सोऽपि हीनो दंड्यश्च स स्मृत इति संबध्यते अभियोगस्य साक्ष्ये वा दुष्टः स परिकीर्ति
त इति प्रस्तुतत्वाद्धीनपरिज्ञानमात्रमेव माभूदिति दंड्यग्रहणं दंड्यस्यापि शासोऽप्यध्यान्न हीयत इ
त्यर्थादहीनत्वदर्शनादत्रत्वमाभूदिति हीनग्रहणं अथ यत्र द्वावपि युगपद्धर्माधिकरणं प्राप्तौ भा
वाभाववादिनौ तद्यथा कश्चित्प्रतिगृहेण क्षेत्रं लब्ध्वा कंचित्कालमुपभुज्य कार्यवशात्सकुटुंबो दे
शांतरं गतः अन्योऽपि तदेव क्षेत्रं प्रतिगृहेण लब्ध्वा कंचित्कालमुपभुज्य देशांतरं गतस्ततो द्वावपि
युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्माधिकरणं प्राप्तौ तत्र क
स्य क्रियेत्याकांक्षित आह साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः पूर्वपक्षेऽधरीभूते भवंत्युत्तरवा
दिनः १७ उभयत उभयोरपि वादिनोः साक्षिषु संभवत्सु साक्षिणः पूर्ववादिनः पूर्वस्मिन्काले मयाप्र
तिगृहीतमुपभुक्तं चेति यो वदत्यसौ पूर्ववादी न पुनर्यः पूर्वं निवेदयति तस्य साक्षिणः प्रष्टव्याः यदा
त्वन्य एवं वदति सत्यमनेन पूर्वं प्रतिगृहीतमुपभुक्तं च किंतु राज्ञेदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा
मह्यं दत्तमन्येन वा प्रतिगृहेण लब्ध्वा मह्यं दत्तमिति तत्र पूर्वपक्षोऽसाध्यतयाधरीभूतस्तस्मिन्पूर्व

व्य
१२

दयेदुत्तरं दापयेत्प्रष्टव्य एवं न कालप्रतीक्षणं कुर्यात् अन्यत्र विवादोत्तरेषु कालउत्तरदानकालः
इत्युपार्थिवस्यार्थिसभ्यसभापतीनां स्मृत उक्तः दुष्टलक्षणमाह देशाद्देशांतरं याति सृक्किणी परि
लेढि च ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च १३ परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भा
षते वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि १४ स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः
अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः १५ मनोवाक्कायकर्मभिर्यः स्वभावादेव न भयादिहे
निमित्ताद्विकृतिं विकारं याति गच्छत्यसावभियोगे साक्ष्ये वा दुष्टः परिकीर्तितः तां विकृतिं विभज्य
दर्शयति देशाद्देशांतरं याति न क्वचिदवतिष्ठते सृक्किणी ओष्ठपर्यंतौ परिलेढि जिह्वाग्रेण
घट्टयतीति कर्मणो विकृतिः अस्य ललाटं स्विद्यते स्वेदबिंदुचितं भवति मुखं च वैवर्ण्यं विवर्णा
त्वं पांडुत्वं कृष्णत्वं वा एति गच्छतीति कायस्य विकृतिः परिशुष्यत्स्खलद्वाक्यः परिशुष्यत्स्खलग
द्गदं स्खलत्क्षुत्स्खलद्वाक्यं यस्य स तथोक्तः विरुद्धं पूर्वापरविरुद्धं बहु भाषत इति वाचो वि
कृतिः परोक्तं वाचं प्रतिवचनदानेन न पूजयति चक्षुर्वा प्रतिवीक्षणेन न पूजयतीति मनसो
विकृतेर्लिंगं तथोष्ठौ निर्भुजति वक्रयतीत्यपि कायस्य विकृतिः एतच्च दोषसंभावनामात्र
मुच्यते न दोषनिश्चयाय स्वाभाविकनैमित्तिकविकारयोर्विवेकस्य दुर्ज्ञानत्वात् अथ कश्चि
न्निपुणमतिर्विवेके प्रतिपद्येत तथापि न पराजयनिमित्तं कार्यं भवति न हि मरिष्यतो लिंगाद ॥

वहारतो व्यवहारेण साक्ष्यादिभिस्तस्माद्भूतानुसरणं कर्तव्यं यद्यर्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा
ससम्प्रेन सम्भापत्ति नापत्तितव्यं समादिभिरुपायैस्तथा सति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भवति
अथ सर्वथापि भूतानुसरणं न शक्यते कर्तुं तथापि तत्साक्ष्यादिभिर्निर्णयः कार्य इत्यनुकल्पः य
थोक्तं भूतच्छलानुसारित्वात् द्विगतिः समुदाहृतः भूतं तत्त्वार्थयुक्तं यत्प्रमादाभिहितं छलमिति त
त्र भूतानुसारी व्यवहारो मुख्यश्छलानुसारी त्वनुकल्पः साक्ष्यालेख्यादिभिर्व्यवहारनिर्णये कदा
चिद्वस्त्वनुसरणं भवति कदाचिन्न भवति साक्ष्यादीनां व्यभिचारस्यापि संभवात् भूतमप्यनुपपत्त्या ही
यते व्यवहारत इत्यस्योदाहरणमाह निह्नुते लिखितं नैकमेकदेशविभावितः दाप्यः सर्वं नृपेणा
र्थं न ग्राह्यस्त्वनिवेदितः २० नैकमनेकं सुवर्णरजतवस्त्रादि लिखितमभियुक्तमर्थिना प्रत्यर्थी यदि स
र्वमेव निह्नुते अपजानीते तदार्थिनैकदेशे हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितो नीकारितः सर्वरजता
द्यर्थं पूर्वलिखितं दाप्योर्थिने न्यायेन न ग्राह्यस्त्वनिवेदितः पूर्वं भाषाकालेऽनिवेदितः पश्चादर्थिना
पूर्वं मया विस्मृतमिति निवेद्यमानो न ग्राह्यो नादर्तव्यो नृपेण एतच्च न केवलं वाचनिकमेकदेशे
प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदेशान्तरेपि मिथ्यावादित्वसंभवात् अर्थिनश्चैकदेशे स
त्यवादित्वनिश्चयादेकदेशान्तरेपि सत्यवादित्वसंभवादेवं तर्कापरनामसंभावनाप्रत्ययानुगृही
तादस्मादेव योगीश्वरवचनात्सर्वं दाप्योनीयं न ग्राह्योति निर्णयः एवं च तर्कवाक्यानुसरणेन नि
र्णये क्रियमाणे वस्तुनोन्यथात्वेपि व्यवहारे दृष्टिभिर्न दोषः तथा च गौतमो न्यायाधिगमे तर्कोभ्युपाय

व्य०
१२

दमेव व्याख्यानमुत्तरं मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवति प्राङ्न्यायकारणोक्तौ पूर्वपक्षधरीभूते
तवादिनः साक्षिणो भवन्तीति व्याख्यानमयुक्तं अस्यार्थस्य तत्तोधीत्लेखेवत्तस्य प्रतिज्ञातार्थसाधनमि
त्यनेनोक्तत्वात्पुनरुक्तप्रसंगात् पूर्वव्याख्यामेव स्पष्टीकृतं नारदेन मिथ्याक्रियापूर्ववादे कारणो
प्रतिवादिनि प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेदित्युक्त्वाद्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षि
षु पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिण इति वदता एतस्य च सर्वव्यवहारविलक्षणत्वात्पृथगुपन्या दे
सः अपि च सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् दंडं च स्वपणं चैव धनिने धनमेव च १८
यदि विवादो व्यवहारः सपणः पणानं पणस्तेन सह वर्तत इति सपणः स्यात्तदा तत्र तस्मिन्सपणव्यवहा
रे हीनं पराजितं पूर्वोक्तं दंडं स्वकृतं च पणं राज्ञे प्रत्यर्थिने विवादास्पदीभूतं धनं दापयेद्राजा यत्र पुन
रेकः कोपावेशवशाद्यद्यहमत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीते न्यस्तु न
किंचित्प्रतिजानीते तत्रापि व्यवहारः प्रवर्तते तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि हीयते तदा सप
णं सपणं दंडं दाप्यः अन्यस्तु पराजितो दंडं दाप्यो न पणं स्वपणं चेति विशेषोपादानात् यत्र त्वेकः श
तामन्यस्तु पंचाशतं प्रतिजानीते तत्रापि पराजयश्चेत्कृतमेव पणं दाप्यः सपणश्चेद्विवादः स्यादिति व
दता पणरहितोपि विवादो दर्शितः किंच छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः भूतमप्यनुप
न्यस्तं हीयते व्यवहारतः १९ छलं प्रमादादभिहितं परित्यज्य भूतेन वस्तुतत्त्वानुसरणेन व्यवहारा
न्नयेदंतं नृपः यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्यस्तमनभिहितं हीयते हानिमुपगच्छति व्य १२

२९

यस्मृतिस्तथानेकार्थाभियोगेपीतीयमपि स्मृतिरेव तत्र कानयोः स्मृत्योः परस्परविरोधे सतीतरेतरबाध
नाद् प्रामाण्यं कस्मान्न भवति विषयव्यवस्था किंनिमित्ता श्रीपत इत्यत आह स्मृत्योर्विरोधे न्यायस्तु
बलवान्व्यवहारतः यत्र स्मृत्योः परस्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापना
दुत्सर्गसामान्यविशेषापवादादिलक्षणो न्यायो बलवान्समर्थः स चान्यायः कुतः प्रत्येतव्य इत्य
त आह व्यवहारत इति व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते अतश्च
प्रकृतोदाहरणे विषयव्यवस्था वयुक्ता एवमन्यत्रापि विषयव्यवस्थाविकल्पादि यथासंभवं यो
ज्यं एवं सर्वत्र प्रसंगोपवादमाह अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः २१ धर्मशास्त्रानु
सारेणोशनसेनैवौशनसाद्यर्थशास्त्रस्य निरस्तत्वाद्धर्मशास्त्रांतर्गतमेव राजनीतिलक्षणम
र्थशास्त्रमिह विवक्षितं अर्थशास्त्रधर्मशास्त्रस्मृत्योर्विरोधेऽर्थशास्त्राद्धर्मशास्त्रं बलवदिति स
स्थितिर्मर्यादा यद्यपि समानकर्तृकतया अर्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो विशेषो विशेषो ना
स्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः धर्मस्य च
प्राधान्यं शास्त्रादौ दर्शितं तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधेऽर्थशास्त्रस्य बाध एव न विषयव्यव
स्थानापि विकल्पः किमत्रोदाहरणं न तावद्गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायि
नमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हंतुर्भवति कश्चन प्रकाशं वाप्रकाशं वा
मन्युस्तं मन्युमृच्छति तथा आततायिनमायांतमपि वेदांतपारगं जिघांसंतं जिघांसीयान्नते

व्य०

१३

नुपादेयवचनः अत्यर्थीत्येतावदिह गम्यते एकदेशविभावितो नृपेण सर्वं दाप्य इति वचनात् यत्तु का
त्यायनेनोक्तं अनेकार्थाभियोगे च यावत्संसाधयेद्धनी साक्षिभिस्तावदेवासौ लभते साधितं ध
नमिति तत्पुत्रादिदेयपित्राद्यृणविषयं तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न जानामीति प्रति
वदन्निह्नववादी न भवतीत्येकदेशविभावितो न क्वचिदसत्यवादीति निह्नुते लिखितं नैकमिति
शास्त्रं तत्र न प्रवर्तते निह्नवाभावादपेक्षिततर्काभावाच्च अनेकार्थाभियोगेपीति कात्यायनव
चनं सामान्यविषयं विशेषशास्त्रस्य विषयं निह्नवोत्तरं परिहृत्याज्ञानोत्तरे प्रवर्तते ननु ऋणादि
षु विवादेषु स्थिरप्रायेषु निश्चितं ऊने वाप्यधिके चार्थे प्रोक्ते साध्यं न सिध्यतीति वदता कात्याय
नेन नैकार्थाभियोगे साक्षिभिरेकदेशभाविते अधिके वाभाविते साध्यं सर्वमेव न सिध्यतीत्यु
क्तं तथा सत्येकदेशभाविते अभाविते कदेशसिद्धिः कुतस्त्या तदुच्यते लिखितं सर्वार्थसाधनं तयो
पन्यस्तैः साक्षिभिरेकदेशाभिधाने अधिकाभिधाने वा कृत्स्नमेव साध्यं न सिध्यतीति तस्यार्थस्त
त्रापि निश्चितं न सिध्यतीति वचनात्पूर्ववत्संशय एवेति प्रमाणांतरस्यावसरोस्त्येव छलं निरस्ये
ति नियमात् साहसादौ तु सकलसाध्यसाधनतयोद्दिष्टैः साक्षिभिरेकदेशेपि साधिते कृत्स्नसा
ध्यसिद्धिर्भवत्येव तावतैव साहसादेः सिद्धत्वात्कात्यायनवचनाच्च साध्यार्थांशेपि गदिते साक्षि
भिः सकलं भवेत् स्त्रीसंगे साहसे चौर्ये यत्साध्यं परिकीर्तितमिति ननु निह्नुते लिखितं नैकमिती १३

२८

लरणादय आततायिनः आत्मादित्राणार्थं हिंसां नाभिसंधिजां निवार्यमाणाः प्रमादाद्यदि विपद्येरं
स्तत्र लघु प्रायश्चित्तं राजदंडाभावश्चेति निश्चयः तस्मादन्यदिहोदाहरणं वक्तव्यं तदुच्यते हिर
ण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः अतो यतेत तत्प्राप्त्यै इत्यर्थशास्त्रं धर्मशास्त्रानुसारेण राज्ञो
धर्मलोभविवर्जितः इति धर्मशास्त्रं तयोः क्वचिद्विषये विरोधो भवति यथा चतुष्पाद्व्यवहारे प्र
वर्तमाने एकस्य जये वधार्यमाणे मित्रलब्धिर्भवति न धर्मशास्त्रमनुष्ठितं भवति अन्यस्य ज
येऽवधार्यमाणे धर्मशास्त्रमनुष्ठितं भवति मित्रलब्धिर्विपरीता तत्रार्थशास्त्राद्धर्मशास्त्रं बल
वान् अत एव धर्मार्थसन्निपातेऽर्थग्राहिण एतदेवेति प्रायश्चित्तस्य गुरुत्वं दर्शितमापस्तंबेन
एतदेवेति द्वादशवार्षिकं प्रायश्चित्तं परामृश्यते ततो यथालेख्ये त्वद्यः प्रतिज्ञातार्थसाधनमि
त्युक्तं किं तत्साधनमित्यपेक्षित आह प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं एषामन्य
तमाभावे दिव्यान्यतममुच्यते २२ प्रमीयते परिच्छिद्यते तेनेति प्रमाणं तच्च द्विविधं मानुषं दै
विकं चेति तत्र मानुषं प्रमाणं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं महर्षिभिः तत्र
लिखितं द्विविधं शासनं चीरकं चेति शासनमुक्तलक्षणं चीरकं तु वक्ष्यमाणलक्षणं भुक्ति
रुपभोगः साक्षिणो वक्ष्यमाणस्वरूपप्रकाराः ननु लिखितस्य साक्षिणां च शब्दाभिव्यक्तिद्वारेण श
ब्दं तर्भावाद्युक्तं प्रामाण्यं भुक्तेस्तु कथं प्रामाण्यमुच्यते भुक्तिरपि केश्चिद्विशेषणैर्युक्ता स्वत्वहेतुभ

या

वधेन निष्कृतिर्न विधीयते इत्यादि धर्मशास्त्रं तयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तं अत
योरेकविषयत्वासंभवेन विरोधाभावान्न बलाबलचिन्तावतरति तथाहि शस्त्रं द्विजातिभिर्ग्राह्यं

२४

धर्मो यत्रोपरुध्यते इत्युपक्रम्यात्मनश्च परित्राणे दक्षिणानां च संगरे स्त्रीविप्राभ्युपपत्तौ च घ्नन्
धर्मेण न दुष्यतीत्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां वा
ततायिनमकूटशस्त्रेण घ्नन्न दंडभागित्युक्त्वा तस्यार्थवादार्थमिदमुच्यते गुरुं वा बालवृद्धौ वा
दिगुर्वादीनपि तावद्धन्यादाततायिनो हन्यात्किमुतान्यानिति वाशब्दादपि श्रवणादपि वेदांत
गामिस्तत्राप्यपि शब्दश्रवणान्न गुर्वादीनां वध्यत्वप्रतीतिः नाततायिवधे दोषोऽन्यत्र गोब्राह्मण
णादिवधादिति सुमंतुवचनाच्च आचार्यं च प्रवक्तारं पितरं मातरं गुरुं न हिंस्याद्ब्राह्मणान्
गाश्च सर्वांश्चैव तपस्विन इति मनुवचनाच्च आचार्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं
वचनमर्थवन्नान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् नाततायिवधे दोषो
हन्तुर्भवति कश्चनेत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव यतोऽग्निदो गरदश्चैव शस्त्रपा
णिर्धनापहः क्षेत्रदारहरश्चैव षडेते ह्याततायिनः तथा उद्यतासिर्विषाग्निश्च शापोद्यतक
रस्तथा आथर्वणेन हंता च पिशुनश्चापि राजनि भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः ए
वमाद्यान्विजानीयात्सर्वानेवाततायिन इति समान्येनाततायिनो दर्शिताः अतश्च वा

दंडवाचिके वलोद्वेषु कार्येषु साक्षिणो दिव्यमेव चेति तथा लेख्यादीनामपि कचिद्विषयमोद
श्यते तथा पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्ष
क्षिणः तथा द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया भुक्तिरेव तु गुर्वी स्यान्न दिव्यं न साक्षि
णः तथा दत्तादत्तेष्वभृत्यानां स्वामिनां निर्णये सति विक्रयादानसंबंधे क्रीता धनमनिच्छति द्यू
ते समाह्वये चैव विवादे समुपस्थिते साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकमिति उभय
त्र प्रमाणसद्भावे प्रमाणगतबलाबलविवेके वा सति पूर्वापरयोः कार्ययोः कस्य बलीयस्त्वमि
त्यत आह सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ऋणादिषु सर्वेष्वर्थविवादेषूत्तरा क्रिया क्रि
यते इति क्रिया कार्यं बलवत्ता उत्तरकार्ये साधिते तद्वादी विजयी भवति पूर्वकार्ये सिद्धे पि तत्
द्वी पराजीयते तद्यथा कश्चिदृणेन धारणं साधयति कश्चित्प्रतिदानेनाधारणं तत्र ग्रहणप्र
तिदानयोः प्रमाणसिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी जयति तथा पूर्वेद्युः शतं गृही
त्वा कालान्तरे त्रिकं शतमंगीकृतवान् तत्रोभयत्र प्रमाणसद्भावे पि त्रिकशतग्रहणं बल
वत् पश्चाद्भावितस्य बाधेनानुत्पत्तेः उक्तं च पूर्वबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यतीति
अस्यापवादमाह आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा २२ आध्यादिषु त्रिषु पूर्वमेव का
र्यं बलवत् तद्यथा एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किम

व्या०
१५

ति प्रमाणमेव पूर्वोल्लिखितादीनां त्रयाणामन्यतमस्याप्यभावे दिव्यानामन्यतमे न
रूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते मानुषाभाव एव दिव्यस्य प्र
माणमस्मादेव वचनादवगम्यते दिव्यस्य स्वरूपप्रमाणयोरागम्यत्वात् अतश्च यत्र परस्पर
विवादे न युगपद्धर्माधिकरणं प्राप्तयोरेको मानुषीं क्रियामपरं तु दैवीमवलंबते तत्र मानुष्य
वग्राह्या तथा च कात्यायनः यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीं मानुषीं क्रियां गृह्णीयान्न
तु दैवीं क्रियां नृप इति यत्रापि प्रधानैकदेशसाधनं मानुषं संभवेत्ति तत्रापि न दैवमाश्रयणी
यं यथा रूपकशतमनया वृद्ध्या गृहीत्वा यं न प्रयच्छतीत्यभियोगापह्नवे ग्रहणे साक्षिणः संति न
संख्यायां च वृद्धिविशेषे वा तत्रो दिव्येन भावयामीत्युक्ते तत्रैकदेशविभावितन्यायेनापि संख्यावृद्धि
विशेषसिद्धेर्न दिव्यस्यावकाशः उक्तं च कात्यायनेन यद्येकदेशव्याप्तापि क्रिया विद्येत मानुषी
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणामिति यत्तु गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षण
मिति तदपि मानुषासंभवकृतनियमार्थं यदपि नारदेनोक्तं अरण्ये निर्जने रात्रावंतर्वे
श्मनि साहसे निक्षेपापह्नवे चैव दिव्या संभवति क्रियेति तदपि मानुषासंभव एव तस्मान्मा
नुषाभाव एव दिव्येन निर्णय इत्यौत्सर्गिकमस्य चापवादो दृश्यते प्रक्रांते साहसे वादे पारुष्ये १५

सिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात् एतच्च विभागप्रकरणे निपुणतरमुपपादयिष्यते गौतम
वचनं तु नियमार्थं अपि च अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि चौरदंडेन तं पापं दंडयेत्पृथिवी
पतिरित्येतदनागमोपभोगस्य स्वत्वहेतुत्वे विरुध्यते न चानागमं तु यो भुंक्त इत्येतत्परोक्षभोग
विषयं पश्यतो ब्रुवत इति प्रत्यक्षविषयमिति युक्तं वक्तुं अनागमं तु यो भुंक्त इत्यविशेषाभिधाना
त् नोपभोगे बलं कार्यमाहर्त्रा तत्सुतेन वा पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थित इति कात्याय
नवचनाच्च समक्षभोगे च हानिकारणाभावेन हानेरसंभवात् न चैतन्मंतव्यं आधिप्रतिग्रह
क्रयेषु पूर्वस्याः क्रियायाः प्रबल्यापवादेन भूम्यां विंशतिवर्षोपभोगयुक्तायां धनविषये दशवर्षोपभोग
युक्तायां उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यत इति यतस्तेषूत्तरैव क्रिया तत्त्वतो नोपपद्यते स्वमेव ह्या
धेयं देयं विक्रेयं च भवति न चाहितस्य दत्तस्य विक्रीतस्य वा स्वत्वमस्ति अस्वत्वस्य दाने प्रतिगृहे
वद्दंडः स्मर्यते अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहस
मिति तथा आध्यादीनां त्रयाणामपवादत्वे स्वश्लोकस्याधिसीमादीनामुत्तरश्लोके अपवादो
नोपपद्यते तस्माच्च आध्यादीनां हानिरनुपपन्नैव नापि व्यवहारहानिः यत उपेक्षां कुर्वतस्तस्य तू
ष्णीभूतस्य तिष्ठतः कालेविपन्ने पूर्वोक्तो व्यवहारो न सिद्ध्यतीति नारदेनोपेक्षालिंगाभावकृ
ता व्यवहारहानिरुक्ता न तु वस्त्वभावकृता तथा मनुनापि अजडश्चेदपोगंडो विषये चास्य भुज्य

व्या०
१६

नराधानमेव न संभवति एवं दत्तस्य विक्रीतस्य च दानक्रयौ नोपपद्येते तस्मादिदं वचनम
नर्थकं उच्यते अस्वत्वेऽपि मोहात्कश्चिद्दद्यादाधातुं पुनराधानादिकं करोतीति तत्र पूर्ववल्लवद्
दिति न्यायमूलमेवेदं वचनमित्यचोद्यं भुक्तेः कैश्चिद्विशेषणैर्युक्तायाः प्रामाण्यं प्रदर्शयि
ष्यत्कस्याश्चिद्भुक्तेः कार्यांतरमाह पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी परेण भुज्य
मानाया धनस्य दशवार्षिकी २४ परेण संवेधेन भुज्यमानां भुवं धनं वा पश्यतः अब्रु
वतः मदीयेयं भूस्त्वया न भक्तव्येत प्रतिषेधतस्तस्य भूमेर्विंशतिवार्षिकी अप्रवृत्तिरेव
विंशतिवर्षोपभोगनिमित्ता हानिर्भवति धनस्य तु हस्त्यश्वादेर्दशवार्षिकी हानिः नन्वेतद
नुपपन्नं नह्यप्रतिषेधात्स्वत्वमपगच्छति अप्रतिषेधस्य दानविक्रयादिवत्स्वत्वनिवृ
त्तिहेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात् नापि विंशतिवर्षोपभोगात्स्वत्वं उपभोगस्य स्वत्व
प्रमाणत्वात् प्रमाणस्य च प्रमेयं प्रत्यनुत्पादकत्वात् निकषक्रमादिषु स्वत्वकारकहेतुष्वपाठा
च्च तथा हि स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य
विजितं निर्विष्टं वैश्यशूद्रयोरित्यष्टावेव स्वत्वकारकहेतून् गौतमः पठति न भोगं नचेदमेव
वचनं विंशवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वं प्रतिपादयतीति युक्तं स्वत्वस्य तद्धेतूनां च लोकप्र

स्मात्तद्वचनात् परोक्षभोगे तु विंशतेरूर्ध्वमपि फलानुसरणं लभत एव पश्यत इति वचनात् प्रत्यक्षभो
गे च स्वाक्रोशे अब्रुवत इति वचनान्न विंशतेः प्राक्पूर्वं दशेति राक्रोशे च लभते विंशतिग्रहणात् ननु त
दुत्पन्नस्यापि फलस्य स्वत्वात्तद्धानिरनुपपन्नैव बाढं तस्य स्वरूपाविनाशेन तथैवावस्थाने यथा तदु
त्पन्नधनधान्यसवत्सादीनां यस्तु न तत्तदुत्पन्नमुपभोगान्नष्टं तत्र स्वरूपनाशादेव स्वत्वनाशे अना
गमं तु यो भुंक्ते बहून्यब्दशतान्यपि चौरदंडेन तं पापं दंडयेत्पृथिवीपतिरित्यनेन वचनेन निष्क्र
यरूपेण आपादितो चौरवत्तस्मादध्यवसानं प्राप्तं हानिर्विंशतिवार्षिकीत्ययोद्यते राजदंडः पुनर
स्त्वेव विंशतेरूर्ध्वमपि अनागमोपभोगादपवादाभावाच्च तस्मात्स्वाम्युपेक्षालक्षणस्यापराधा
त् अस्माद्वचनाद्विंशतेरूर्ध्वं न फलं न लभते [illegible] एतेन धनस्य दशवार्षिकी सेतदपि
व्याख्यातं अस्यापवादमाह आधिसीमोपनिक्षेपजडबालधनैर्विना तथोपनिधिराजस्त्री
श्रोत्रियाणां धनैरपि २५ आधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः जडश्च
बालश्च जडबालौ तयोर्धने जडबालधने आधिसीमोपनिक्षेपाजडबालधने च आ
धिसीमोपनिक्षेपजडबालधनानि तैर्विना उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणा
र्थं परस्य हस्ते निहितं द्रव्यं यथाह नारदः स्वं द्रव्यं यत्र विश्रंभान्निक्षिपत्यविशंकितः निक्षेपो
नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति उपनिधानमुपनिधिः आध्यादिषु पश्यतो ब्रुवतोऽपि
पि भूमे विंशतेरूर्ध्वं न स्य दशभ्यो वर्षेभ्य ऊर्ध्वमप्युपचयहानिर्न भवति पुरुषापराधस्य तथा

व्य.
१२

किल वदति अजडाश्च न योगजडा बालाः स्वसाक्षि [illegible] विंशतिवर्षाण्यत्र तिरत्वे मया भुक्तं तत्र बहवः सा
क्षिणः संति यद्युक्तं स्वमन्यायेन मया भुज्यते तदयं किमिति सेतावंतं कालमुदास्त इति तत्राचार्येणुक्त
दोषो भवतीति एवं निरुत्तरस्यापि कास्तवो व्यवहारो भवत्येव बलं निरस्य भुक्तेन व्यवहारान्यायेन
प्रवृत्तिनियमात् अथ मतं यद्यपि न वस्तुहानिर्नापि व्यवहारहानिशंका भवतीति तन्निवृत्तये तू
ष्णीं न स्थातव्यमित्युपदिश्यत इति तच्च न स्मार्तकालायां भुक्तौ हानिशंकाकारणाभावात् तूष्णीं न
स्थातव्यमित्येतावन्मात्राभिधित्सायां विंशतिग्रहणमविवक्षितं स्यात् अथोच्यते विंशतिग्रहणा
मूर्ध्वं पत्रदोषोद्भावननिराकरणार्थं यथाह कात्यायनः शक्तस्य सन्निधावर्थो यस्य लेख्येन भुज्यते
विंशतिवर्षाण्यतिक्रांतं तत्पत्रं दोषवर्जितमिति तदपि न आध्यादिष्वपि विंशतेरूर्ध्वं पत्रदो
षोद्भावननिराकरणस्य समत्वेनापवादासंभवात् यथाह कात्यायनः अथ विंशतिवर्षाणि
आधिर्भुक्तः सुनिश्चितः तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिता तथा सीमाविवादे नि
र्णीते सीमापत्रं विधीयते तस्य दोषाः प्रवक्तव्या यावद्वर्षाणि विंशतिरिति एतेन धनस्य दशवा
र्षिकीत्येतदपि प्रत्युक्तं तस्मादस्य श्लोकस्य सत्योऽर्थो वक्तव्यः उच्यते भूमेर्धनस्य च फलहानि
रिह विवक्षिता न वस्तुहानिर्नापि व्यवहारहानिः तथाहि निराक्रोश विंशतिवर्षोपभोगादूर्ध्वं य
द्यपि स्वामी न्यायतः क्षेत्रं लभते तथापि फलानुसरणं न लभते अप्रतिषेधलक्षणस्यापराधाद १२

त्र त्रिषु वर्णेषु यानि स्यु रक्षतो ब्राह्मणो व्रजेत् उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमं। चक्षुर्नासा
च कर्णौ च धनं देहस्तथैव चेति एतेषामायतनानि मितोपराधस्तत्रैवोपस्थादौ निग्रहः कार्य इति द्र
व्यं कर्म वा कारयितव्यं वं धनागारं वा प्रवेशयितव्यः यथोक्तं कात्यायनेन धनदानासहं
बुध्वा स्वाधीनं कर्म कारयेत् अशक्तौ वं धनागारं प्रवेशयेत् ब्राह्मणादृते इति ब्राह्मणस्य पुनर्द्र
व्याभावे कर्मवियोगादीनि प्रयोज्यानि यथाह गौतमः कर्मवियोगविख्यापननिर्वासनांककरणा
न्यवध्या विति नारदेनापि वधः सर्वस्वहरणं पुरान्निर्वासनांकने तदंगच्छेद इत्युक्तो दंड उत्तमसाह
से अविशेषेण सर्वेषामेष दंडविधिः स्मृत इत्युक्तोक्तं वधादृते ब्राह्मणस्यान वधं ब्राह्मणोर्हति
शिरसो मुंडनं दंडस्तस्य निर्वासनं पुरात् ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन चेति अंकनेच
व्यवस्था दर्शिता गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः स्तेयेतु श्वपदं कार्यं ब्रह्महण्यशिराः
पुमानिति यत्तु चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तंबवचनं ब्राह्मणस्य पुरान्निर्वासनसमयेवस्त्रा
दिना चक्षुर्निरोधः कर्तव्य इति तस्यार्थो न च क्षुषोरुद्धरणं अन्दतो ब्राह्मणो व्रजेन्न शारीरे
ब्राह्मणस्यादंड इत्यादि मनुगौतमादिवचनविरोधादित्यलं प्रसंगेन स्वत्वाव्यभिचारित्वेन भो
गस्य स्वत्वे प्रमाणमुक्तं भोगमात्रस्य स्वत्वव्यभिचारित्वात् कीदृशो भोगः प्रमाणमित्यत आ
ह आगमोऽप्यधिको भोगाद्विना पूर्वक्रमागतात् स्वत्वहेतुः प्रतिग्रहक्रियादिरागमः स भोगा
दभ्यधिको बलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात् यथाह नारदः आगमेन विशुद्धेन

व्य॰ १८

मपि न पुरुषापराधः समीक्ष्य हस्तत्वयांगमारादि चिन्हैस्तु साधनत्वापेक्षा संभवति उपनिदे
योपनिध्यो भुक्तिः प्रतिषिद्धत्वात्तु तिर्यग्धातिक्रमोपभोगे वसोदयलाभाद्रुपेक्षोपपत्तिः जडबा
लयोर्जडत्वाद्बालत्वादुपेक्षा युक्तैवाराज्ञो बहुकार्यवाहुल्यत्वात् स्त्रीणामज्ञानात् तदप्यागत्याद्भ्यो
त्रियस्याध्ययनाध्यापनतदर्थविचारानुष्ठानव्याकुलत्वादुपेक्षा युक्तैव तस्मादाध्यादिषु सर्वत्रोपे
क्षाकारणसंभवात्समक्षभोगेनिराक्रोशे च न कदाचिदपि फलं भुनिः आध्यादिषु दंडविशेषप्र
तिपादनार्थमाह आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनापहर्तारं विवा
दास्पदीभूतं द्रव्यं स्वामिने दापयेदित्यनुवादः दंडं च तत्समं विवादास्पदीभूतं द्रव्यं राज्ञे दापयेदि
ति विधिः यद्यपि गृहक्षेत्रादिषु तत्समो दंडो न संभवति तथापि मर्यादायाः प्रभेदे च सीमातिक्रम
णे तथैव स्यादिनाव्यस्यमारणे दंडो द्रष्टव्यः अथ तत्समदंडेनापहर्तुर्दमनं न भवति बहुधनत्वेन श
क्तस्य धनं दापयेत् यावता यस्य दर्पोपशमो भवति तावद्दापयेत् दंडो दमनादित्याहुस्तेनादो
तान्दमयेदिति दंडग्रहणस्य दमनार्थत्वात् यस्य तु तत्सममपि द्रव्यं नास्ति सोपि यावता पीड्यते ता
वद्दाप्यः यस्य पुनः किमपि धनं नास्त्यसौ धिग्दंडादिना दमनीयः तथा च मनुः धिग्दंडं प्रथ
मं कुर्याद्वाग्दंडं तदनंतरं तृतीयं धनदंडं तु वधदंडमतः परमिति वधदंडोपि शारीरो ब्रा
ह्मणव्यतिरिक्तानां नवधा दर्शितः यथाह मनुः दशस्थानानि दंडस्य मनुः स्वायंभुवोऽब्रवी १२
२ आध्यादीनां विहर्तारं धनिने दापयेद्धनं दंडं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा २६

ईप्रत्तिरवः प्रत्यक्षस्यागमाभावे वानिश्चिते अव्यभिचारो दाक्षिणागमं स्वत्वं गमयति अस्मार्तेपि काले
अनागमस्यत्तिपरंपरायां सत्यां न भोगः प्रमाणं अत एवानागमं तु यो भुंक्ते बहून्यब्दशतान्यपि
चौरदंडेन तं पापं दंडयेत्पृथिवीपतिरित्युक्तं न चानागमं तु यो भुंक्ते इत्येकवचननिर्देशाद्बहून्यब्दश
तान्यपीत्यपिशब्दप्रयोगाच्च प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेपि दंडविधानमिति मंत
व्यं द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसंगान्न चैतदिष्यते आदौ तु कारणं दानं
मध्ये भुक्तिस्तु सागमेति नारदस्मरणात् तस्मात्सर्वत्र निरागमोपभोगेऽनागमं तु यो भुंक्ते इत्येतद्द्र
ष्टव्यं यदप्यन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः न तच्छक्यमतो हर्तुं क्रमात्त्रिपुरुषागतमिति
पित्रा सह पूर्वतरैस्त्रिभिरिति योऽर्थः तत्रापि क्रमात्त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणं त्रि
पुरुषविवक्षायामेकवर्षाभ्यंतरे पि त्रिपुरुषव्यतिक्रमसंभवात् द्वितीयवर्षे निरागमस्य भोगस्य
प्रामाण्यप्रसंगस्तथा सति स्मार्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते इति स्मृतिविरोधः अन्याये
नापि यद्भुक्तमित्येतच्च न्यायेनापि भुक्तमपहर्तुं न शक्यं किं पुनरएणस्यायानिश्चय इति व्याख्येय
मपि शब्दस्वरसात् यदुक्तं यद्विनागमं एतं भुक्तं पूर्वैस्त्रिभिर्वत्त न तच्छक्यमपाहर्तुं क्रमा
त्त्रिपुरुषागतामिति तत्राप्यत्यंतमागमं विनेत्यत्यंतमनुपलभ्यमानमागमं विनेति व्याख्येयं न
पुनरागमस्वरूपं विनेति आगमस्वरूपाभावे भोगशतेनापि स्वत्वं न भवतीत्युक्तं क्रमात्त्रिपुरु
षागतमित्येतदुक्तोऽर्थः ननु स्मरणयोग्येपि काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नं तथाहि

ब॰ कायस्याव्यवहारादिनोपभोगसंभवात् अत एव भोगकेवलतो यस्तु कीर्तयेन्नागमं क्वचित्
१९ भोगच्छलापदेशेन विज्ञेयः स तु तस्कर इति स्मर्यते अतश्च सागमो दीर्घकालो निरंतरो निरा
क्रोशः प्रत्यर्थी प्रत्यक्षश्चेति पंचविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति तथा च स्मर्यते
सागमो दीर्घकालश्चाविच्छेदोपरवोज्झितः प्रत्यर्थिसंनिधानश्च परिभोगोपि पंचधेति क्वचि
त्त्वागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह विना पूर्वक्रमागतादिति पूर्वेषां पित्रादीनां त्र
याणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमोऽभ्यधिक इति संबंधः स पुनराग
मादभ्यधिक आगमज्ञाननिरपेक्षः प्रमाणमित्यर्थः तत्राप्यागमज्ञाननिरपेक्षेण सत्तानि
रपेक्षः सत्तानुवृत्तेनैवागम्यत इति बोधव्यं विना पूर्वक्रमागतादित्येतच्चास्मार्तकालप्रदर्श
नार्थं आगमोऽभ्यधिको भोगादिति चास्मार्तकालविषयं अतश्च स्मरणयोग्येपि काले योग्यानुप
लब्ध्या आगमाभावनिश्चयसंभवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यं अस्मार्ते तु काले योग्या
नुपलब्ध्यभावेनागमाभावनिश्चयासंभवादागमज्ञाननिरपेक्ष एव संततो भोगः प्रमाणं एतदेव
स्पष्टीकृतं कात्यायनेन स्मार्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते अस्मार्तेनुगमाभावात्क्रमात्त्रि
पुरुषागतेति स्मार्तश्च कालो वर्षशतपर्यंतः शतायुर्वै पुरुष इति श्रुतेः अनुगमाभावादिति
योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादित्यर्थः अतश्च वर्षशताधिको भोगः संततो

लापरिज्ञाने पूर्वापरकालपरिज्ञाने तु विगुणोपि पूर्वकालागम एव बलीयानिति अथ वा लिखि
ते साक्षिणि भुक्तिः प्रमाणमित्युक्तं तेषां समवाये कुत्र कस्य वा प्राबल्यमित्यत्रेदमुपतिष्ठते आ
गमोभ्यधिको भोगाद्विना पूर्वक्रमागतात् आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो इति अयम
र्थः आद्ये पुरुषे साक्षिभिर्भावित आगमो भोगादभ्यधिको बलवान् पूर्वक्रमागतो भोगस्तु द्वितीयपु
रुषे लिखितेन भाविताद् आगमाद्बलवान् मध्यमे तु भोगरहितादागमादल्पकभोगसहितोप्याग
मो बलवानिति एतदेव नारदेन स्पष्टीकृतं आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा का
रणं भुक्तिरेवैका संतता या चिरंतनीति पश्यतोब्रुवत इत्यत्र विंशतिवर्षोपभोगाद्भूमेर्हान
स्यापि दशवर्षभोगाद्धनस्य फलानुसरणं न भवतीत्युक्तं तत्र फलानुसरणवद्दंडानुसरणमपि
न भविष्यतीत्याशंक्य पुरुषव्यवस्थया प्रमाणव्यवस्थया च दंडव्यवस्थां दर्शयितुमाह आगम
स्तु कृतो येन सोभियुक्तः समुद्धरेत् न तत्सुतस्तत्सुतो वापि भुक्तिस्तत्र गरीयसी २८ येन पुरुषेण
भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादेरिति
लिखितादिभिरुद्धरेत् भावयेत् अनेन चाद्यस्य पुरुषस्यागममनुद्धरतो दंड इत्युक्तं भवति तत्सु
तो द्वितीयोभियुक्तो नागममुद्धरेत् किंतु अविच्छिन्नाप्रतिरवसमक्षभोगं अनेन चागममनु
द्धरतो द्वितीयस्य न दंडोपि तु विशिष्टभोगमनुद्धरतो दंड इति प्रतिपादितं तत्सुतस्तृती
यो नागमं नापि विशिष्टं भोगमुद्धरेदपि तु क्रमागतं भोगमात्रं अनेनापि तृतीयस्य क्रमः
णं उच्यते प्रमाणांतरेणावगतागमसहित एव निरंतरो भोगः कालांतरे स्वत्वं गमयति अव
गतोप्यागमो भोगरहितो न कालांतरे स्वत्वं गमयितुमलं दानविक्रयादिना स्वत्वापगमसंभ
वादिति सर्वमनवद्यं आगमेपि सापेक्षो भोगः प्रमाणमित्युक्तं आगमस्तर्हि भोगनिरपेक्ष एव
प्रमाणमित्यत आह आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो २७ यस्मिन्नागमे स्वल्पापि हि
भुक्तिर्नास्ति तस्मिन्नागमे बलं संपूर्णत्वं नैवास्ति अयमभिसंधिः स्वत्वनिवृत्तिः परस्वत्वा
पादनं च दानं परस्वत्वापादनं च परो यदि स्वीकरोति तदा संपद्यते नान्यथा
स्वीकारश्च त्रिविधो मानसो वाचिकः कायिकश्चेति तत्र मानसो ममेदमिति संकल्परूपः वा
चिकस्तु ममेदमित्यभिव्याहाररूपः स विकल्पः प्रत्ययः कायिकः पुनरुपादानाभिम
र्शनादिरूपोनेकविधः तत्र च नियमः स्मर्यते दद्यात्कृष्णाजिनं पुच्छे गां पुच्छे करिणं करे के
सरेषु तथैवाश्वं दासीं शिरसि दापयेदिति आश्वलायनोप्याह अनुमंत्रयेत प्राणमभिमृशेदप्रा
णि कन्यां चेति तत्र हिरण्यवस्त्रादावुदकदानानंतरमेवोपादानादिसंभवात् त्रिविधोपि स्वी
कारः संपद्यते क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासंभवात् स्वल्पेनाप्युप
भोगेन भवितव्यं अन्यथा दानक्रयादेः संपूर्णता न भवतीति फलोपभोगलक्षणकायिक
स्वीकारसहित आगमो दुर्बलो भवति तत्सहितादागमात् एतच्च द्वयोः पूर्वापरका २०

४५

न्नवतीनांमेकस्थाननिवासिनां यथा ग्रामनगरादयः श्रेणयो जातीनामेकजातीनाम
नेकजातीयकर्मोपजीविनां संघाताः यथा हेडावुकानां तांबूलिककुविंदकचर्मका
रादीनां च कुलानि ज्ञातिसंबंधिबंधूनां समूहाः एतेषां नृपाधिकृतादीनां चतुर्णां
पूर्वं पूर्वस्य यद्युपरितं तत्तद्गुरु वबहुदितव्यं नृणां व्यवहर्तॄणां व्यवहारविधौ व्यवहा
रदर्शनकार्ये एतदुक्तं भवति नृपाधिकृतैर्निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतो
ष कुदृष्टबुध्या भवति तथापि न पूगादिषु पुनर्व्यवहारो भवत्येवं पूगनिर्णीतेपि न श्रे
ण्यादिगमनं तथा श्रेणीनिर्णीते कुलगमनं न भवति कुलनिर्णीते तु श्रेण्यादिग
मनं श्रेणिनिर्णीते पूगादिगमने पूगनिर्णीते नृपाधिकृतगमनं भवतीति नारदेन
पुनर्नृपाधिकृतैर्निर्णीतेपि व्यवहारे नृपगमनं भवतीत्युक्तं कुलानि श्रेणयश्चैव
गणाश्चाधिकृतो नृपः प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरमिति तत्र च नृपगम
ने सोत्तरसभ्येन राज्ञा पूर्वैः सभ्यैः सह सपणे व्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवा
दी पराजितस्तदासौ दंड्यः अथासौ जयति तदाधिकृताः सभ्याः दंड्याः दुर्बलैर्व्यवहा
रदर्शिभिर्दृष्टो व्यवहारः परावर्तते प्रबलदृष्टस्तु न निवर्तत इत्युक्तमिदानीं प्रबलदृष्टो
पि व्यवहारः कश्चिन्निवर्तत इत्याह बलोपधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत् स्त्री

व्य
२१

४४

तृतीययोर्भुक्तिरेव गरीयसी तत्रापि द्वितीये गुरुस्तृतीये गरीयसीति विवेकः व्य त्रिपुरुषागमा
नुद्धरणेर्थहानिः समाने वदंडे तु विशेषः इति तात्पर्यार्थः उक्तं च आगमस्तु कृतो येन सोभियुक्त
मनुद्धरन् न तत्सुतस्तत्सुतो वा भोगपहानिस्तयोरपीति अपरस्मात्तु कालोपभोगस्यागमज्ञाननिर
पेक्षस्य प्रामाण्यमुक्तं विना पूर्वक्रमागतादित्यत्र तस्यापवादमाह योभियुक्तः परेतः स्यात्त
स्य रिक्थी तमुद्धरेत् न तत्र कारणं भुक्तिरागमेन विना कृता २८ यदा पुनराहर्तादिरभियु
क्तो कृतव्यवहारनिर्णय एव परेतः परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागमम
द्धरेत् यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणं पूर्वा
भियोगेन भोगस्य सापवादत्वात् नारदेनाप्युक्तं तथारूढविवादस्य प्रेतस्य व्यवहारिणः
पुत्रेण सोर्थः संशोध्यो न तं भोगो निवर्तयेदिति अनिर्णीते व्यवहारे व्यवहर्तरि प्रेते व्यवहार
ो न निवर्तत इति स्थितं निर्णीतेपि व्यवहारे स्थिते च व्यवहर्तरि व्यवहारः कश्चित्प्रवर्तते ए
कश्चिन्न प्रवर्तत इति व्यवस्थासिद्ध्यै व्यवहारदर्शितां बलाबलमाह नृपेणाधिकृताः पू
गाः श्रेणयोथ कुलानि च पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणां ३० नृपेण राज्ञाधिकृताः
व्यवहारदर्शने नियुक्ताः राज्ञा सभासदः कार्या इत्यादिनोक्ताः पूगाः समूहाः भिन्नजातीनां भि

47

शिष्यो यदि राज्ञे निवेदयति तदा भवत्येव व्यवहारपदं तथा भूर्त्तापि पितामहोपात्तादि
वचनात्पितामहोपात्ते भूम्यादौ पितापुत्रयोः स्वाम्ये समाने यदि पिता विक्रयादिना पि
तामहोपात्तं भूम्यादि नाशयति तदा पुत्रो यदि धर्माधिकरणं प्रविशति तदा पिता
पुत्रयोरपि भवत्येव व्यवहारः तथा दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके गृहीतं स्त्री
धनं भर्त्ता नाकामो दातुमर्हतीति स्मरणात् दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भ
र्त्ता व्ययीकृत्य विद्यमानधनोपि याच्यमानो न ददाति तदा दंपत्योरपि भवत्येव
व्यवहारः तथा भक्तदासस्य स्वामिना सह व्यवहारं वदति गर्भदासस्यापि गर्भदासा
दीनधिकृत्य यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात् दासत्वात्स विमुच्येत पुत्रभा
गं लभेत चेति नारदेनोक्तत्वात् तदमोचने पुत्रभागादाने च स्वामिना सह व्यवहारः
केन वार्येत तस्मात् दृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार इति प्रथमं
शिष्यादयो निवारणीया राज्ञा स सम्भवेनेति गुरोः शिष्यादेः श्लोकस्य तात्पर्यार्थः
अत्यंतनिर्बंधे तु शिष्यादीनामप्युक्तरीत्या प्रवर्त्तनीयो व्यवहारः यदप्येकस्य बहु
भिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च अनादेयो भवेद्वादो धर्मविद्भिरुदाहृत इति नारदवचनं
तत्रैकस्यापि गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः तथा एकं धूर्तो बहूनां चेत्यादिस्म

मि॰
व्य॰
२२

नक्तमंतरगारबहिः शत्रुकृतास्तथा २१ बले बलात्कारेण उपधिना भयेन निर्वृत्तान्निष्प
न्नान्व्यवहारान्निवर्त्तयेत् तथा स्त्रीभिः नक्तं रात्रौ स्त्रीभिरपि अंतरगारे गृहाभ्यंतरे बहिः
ग्रामादिभ्यः शत्रुभिश्च कृतान्व्यवहारान्निवर्त्तयेदिति संबंधः अपि च मत्तोन्मत्तार्त्तव्य
सनिबालभीतादियोजितः असंबद्धकृतश्चैव व्यवहारो न सिध्यति ३२ मत्तो मदनीय
द्रव्येण उन्मत्तः उन्मादेन पंचविधेन वातपित्तश्लेष्मसन्निपातग्रहसंभवेनोपसृष्टः
आर्त्तो व्याधिना व्यसनमिष्टवियोगानिष्टप्राप्तिजनितं दुःखं तद्व्यसनी बालो व्यवहा
रयोग्यः भीतो रातिभ्यः आदिग्रहणात् पुरराष्ट्रविरुद्धस्य यश्च राज्ञा विवर्जितः अना
देयो भवेद्वादो धर्मविद्भिरुदाहृत इति स्मरणात् एतैर्योजितः कृतो व्यवहारो न सिध्य
ति अनियुक्तासंबद्धकृतोपि व्यवहारो न सिध्यतीति संबंधः यत्तु स्मरणं गुरोः शिष्ये
पितुः पुत्रे दंपत्योः स्वामिभृत्ययोः विरोधे तु मिथस्तेषां व्यवहारो न सिध्यतीति तदपि
गुरुशिष्यादीनामात्यंतिकव्यवहारप्रतिषेधपरं न भवति तेषामपि कश्चिद्व्यवहा
रस्येष्टत्वात् तथा हि शिष्यशिष्टिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घ्न
न्राज्ञा शास्य इति गौतमस्मरणान्नोत्तमांगे कथंचनेति मनुस्मरणात् यदि गुरुः २२
कोपावेशवशान्महता दंडेनोत्तमांगे ताडयति तदा स्मृतिद्वये तेन मार्गेण धर्षितः

46

रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात् यथाह आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः दशमं
द्वादशं वापि सतां धर्ममनुस्मरन्निति तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् द्वितीये द्वादशं भागं तृ
तीये दशमं चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात् राज्ञा राजभागस्य चतुर्थांशोऽधिगन्त्रे दात
व्यः स्वाम्यनागमे तु कृत्स्नस्य धनस्य चतुर्थं तं शमधिगन्त्रे दत्त्वा शेषं राजा गृह्णीयात् यथाह गौतमः
प्रनष्टस्वामिकमधिगम्य संवत्सरं रक्ष्यमूर्द्ध्वमधिगन्त्रे चतुर्थांशो राज्ञः शेष इति अत्र संवत्स
रमित्येकवचनमविवक्षितं राजा त्र्यब्दं निधापयेदिति स्मरणात् हरेत्ततः परतो नृप इत्येतदपि
स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्ययीकरणाभ्यनुज्ञानपरं आगते तु स्वामिनि वर्तमाने पितृव्ये रा
ज्ञा स्वांशमवतार्य तत्समं दद्यादेतच्च हिरण्यादिविषयं गवादिविषये वक्ष्यति पणानेकशफे
दद्यादित्यादिना रथ्याशुल्कशालादिनियतितस्य सुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वा
धुनाभूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह राजा लब्ध्वा निधिं
दद्याद्द्विजेभ्योऽर्द्धं द्विजः पुनः विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः २४ इतरेण निधौ
लब्धे राजा षष्ठांशमाहरेत् अनिवेदितविज्ञातो दाप्यस्तं दंडमेव च २५ उक्तलक्षणं

मि.
प्र.
२३

रणादेकार्थैर्बहुभिः सार्द्धं व्यवहार इष्यत एवेति भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहारो न
भवतीति द्रष्टव्यं स्त्रीणामिस्यपि तेषु शौंडिकादिस्त्रीणां ह्यात्तेष्वान् व्यवहारे भवत्येवेति
तदन्यासां कुलस्त्रीणां पतिपुत्रजीवत्सु तत्स्वार्तं आदिनादेयो व्यवहार इति वारमेयं
प्रेषजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतंत्र्यात्स्वार्थव्यवहारोपि स्वाम्यनुज्ञये
व्यवहारो नान्यथेति योजनीयं परावर्त्यव्यवहारमुक्त्वेदानीं परावर्त्यद्रव्यमाह प्रनष्टा
धिगतं देयं नृपेण धनिने धनं विभावयेन्न चेद्लिंगैस्तत्समं दंडमर्हति ३३ प्रनष्टं
हिरण्यादि शौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पितं यतद्राज्ञा धनिने दा
तव्यं यदि धनी रूपसंख्यादिभिर्लिंगैर्भावयति यदि न भावयति तदा तत्समं दंड्यः
असत्यवादित्वात् अधिगम्यस्य स्वत्वनिमित्तत्वात्स्वत्वे प्राप्ते तस्य राव्हतिरनेनोक्ता
अत्र च कालावधिं वक्ष्यति शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतं अर्वाक् संव
त्सरात्स्वामी हरेत परतो नृप इति मनुना पुनः संवत्सरत्रयमवधित्वेन निर्दिष्टं
प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो
नृपतिर्हरेदिति तत्र वर्षत्रयपर्यंतमवश्यं रक्षणीयं तत्र यदि संवत्सरादर्वाक्
स्वाम्यागच्छेत्तदा कृत्स्नमेव दद्यात् यदा पुनः संवत्सरादूर्ध्वमागच्छति तदा केचिद्भागं

राज्ञा दातव्यं हि यस्मात् अददद्धुपयच्छन्नस्य तदपहृतं द्रव्यं तस्य किल्बिषमाप्नोति तस्य चौर
स्य च यथाह मनुः दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं राजा तदुपयुञ्जानश्चौरस्याप्नोति कि
ल्बिषमिति यदि चौरहस्तादादाय स्वयमुपभुंक्ते तदा चौरस्य किल्बिषमाप्नोति अथ चौरहृतमु
पेक्षते तदा जानपदस्य किल्बिषमथ चौराहृताहरणाय यतमानोपि न शक्नुयादाहर्तुं तदानाव
हृतं स्वकोशाद्दद्यात् यथाह गौतमः चौरहृतमवजित्य यथास्थानं गमयेत्स्वकोशाद्वा दद्या
दिति कृष्णद्वैपायनोपि अथाहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि स्वकोशात्तद्धि देयमशक्ते
न महीक्षितेति साधारणासाधारणरूपं व्यवहारमातृकामभिधायाधुनाष्टादशानां व्यवहा
रपदानामाद्यमृणादानपदं दर्शयति अशीतिभागो वृद्धिः स्यादित्यादिना मोचयन्नाधिरत्त
दुसन्ने प्रविष्टे द्विगुणो धनस्येवमं तेन तत्रर्णादानं सप्तविधं ईदृशमृणं देयमीदृशमदे
यं अनेनाधिकारेण देयं अस्मिन्समये देयमनेन प्रकारेण देयमित्यधमर्णपक्षे पंचविधं उ
त्तमर्णे दानविधिरादानविधिश्चेति द्विविधमिति एतच्च नारदेन स्पष्टीकृतं ऋणं देयमदे
यं च येन यत्र यथा च यत् दानग्रहणधर्माश्च ऋणादानमिति स्मृतमिति तत्र प्रथममुत्तम
र्णस्य दानविधिमाह तत्पूर्वकत्वादितरेषाम् अशीतिभागो वृद्धिः स्यान्मासि मासि सबं

निधिं राज्ञा लब्ध्वार्द्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत् ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः
सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् यस्मादसौ सर्वस्य जगतः प्रभुः इतरेण
तु राज्ञा विद्वद्ब्राह्मणादन्येन क्षत्रियादिनानिधौ लब्धे राज्ञा षष्ठांशमधिगंत्रे दत्वा शेषं निधिं स्वयमाह
रेत् यथाह वसिष्ठः अप्रज्ञायमानं वित्तं योधिगच्छेद्राजा तद्धरेदधिगंत्रे षष्ठमंशं प्रदद्या
दिति गौतमोपि निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्य अब्राह्मणो व्याख्याता षष्ठ
मंशं लभतेत्येक इति अनिवेदित इति कर्त्तरि निष्ठा अनिवेदश्चासौ विज्ञातश्चासौ चेत्यनि
वेदितविज्ञातः यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं निधिं दा
प्यो दंडं च शक्त्यपेक्षया अथ निधेरपि स्वाम्यागत्य रूपकसंख्यादिभिः स्वत्वं भावयति तदा तस्मै
राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् यथाह मनुः ममायमिति यो ब्रूयान्निधिं सत्ये
न मानवः तस्याददीत षड्भागं राजा द्वादशमेव वेति अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदि
तव्यः चौरहृते प्रत्याह देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु अददद्धि समाप्नोति किल्बिषं य
स्य तस्य तत् ३६ चौरैर्हृतं द्रव्यं चौरेभ्यो वजित्य जान[illegible]दाय स्वदेशनिवासिने यस्य तद्द्रव्यं तस्मै

५०

कांतारमरण्यं तत्र तत्र गच्छंतीति कांतारगाः ये वृद्ध्या धनं गृहीत्वाधिकलाभार्थमतिगहनं प्राण
धनविनाशशंकास्थानं प्रविशंति ते दशकं शतं दद्युः ये च समुद्रगास्ते विंशकं शतं मासि मासि स्यु
व एतदुक्तं भवति कांतारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं उत्तमर्ण आददीत मूल
विनाशस्यापि शंकितत्वादिति इदानीं कारितां वृद्धिमाह दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु
जातिषु ३८ सर्वे ब्राह्मणादयोऽधमर्णाः अबंधके सबंधके वा स्वकृतां स्वाभ्युपगतां वृद्धिं स
र्वासु जातिषु दद्युः क्वचिदकृतापि वृद्धिर्भवति यथाह नारदः न वृद्धिः प्रीतिदत्तानां स्याद
नाकारिता क्वचित् अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्विवर्द्धते इति याचितकं गृहीत्वा दे
शांतरं गतः तं प्रति कात्यायनेनोक्तं यो याचितकमादाय तमदत्वा दिशं व्रजेत् ऊर्ध्वं सं
वत्सरात्तस्य तद्धनं वृद्धिमवाप्नुयात् इति यश्च याचितकमादाय याचितोऽप्यदत्वा देशांतरे
याति तं प्रति तेनैवोक्तं कृतोद्धारमदत्वा यो याचितस्तु दिशं व्रजेत् ऊर्ध्वं मासत्रयात्तस्य त
द्धनं वृद्धिमवाप्नुयादिति यः पुनः स्वदेशे स्थित एव याचितोऽपि याचितकं न ददाति तं या
चनकालादारभ्याकृतां वृद्धिं दापयेद्राजा यथाह स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित्
तं ततोऽकारितां वृद्धिमनिच्छंतं च दापयेदिति अनाकारितवृद्धेरपवादो नारदेनोक्तः पण्य
मूल्यं भृतिर्न्यासो दंडो यश्च प्रकल्पितः वृथादानाक्षिकपणं वर्द्धंते नाविवक्षिता अवि

धके वराधिकमोक्षतं द्वित्रिचतुष्पंचकमन्यथा ३९ मासि मासि प्रतिमासं बंधकं विश्वासार्थं यदा
धीयते आधिरिति यावत् बंधकेन सह वर्तत इति सबंधकः प्रयोगस्तस्मिन्सबंधके प्रयोगे
प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति अन्यथा बंधकरहिते प्रयोगे वर्णानां
ब्राह्मणादीनां क्रमेण द्वित्रिचतुष्पंचकं शतं धर्म्यं भवति ब्राह्मणोऽधमर्णिके द्विकं शतं क्षत्रि
ये त्रिकं वैश्ये चतुष्कं शूद्रे पंचकं मासि मासि स्यैव द्वौ वा त्रयो वा चत्वारो वा पंच वा द्वित्रिचतुष्पं
चाः द्वित्रिचतुष्पंचा अस्मिन्प्रवृत्ते वृद्धिर्दीयते इति द्वित्रिचतुष्पंचकं शतं तदस्मिन्वृद्ध्यायला
भशुल्कोपदा दीयते इति कन् वृद्धेर्द्वैविध्यं कचवृद्धिः प्रतिमासं तु कालिका इच्छाकृता कारि
तास्यात्कायिका कायिकर्मणा इयं च वृद्धिर्मासि मासि गृह्यत इति कालिका इयमेव वृद्धिर्दि
वसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति तथा च नारदेन कायिका
कालिका चैव कारिता च तथापरा चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधेत्युक्त्वो
क्तं कायाविरोधिनी शश्वत्पणपादादि कायिका प्रतिमासं स्रवंती या वृद्धिः सा कालि
का मता वृद्धिः सा कारिता नामधमर्णिकेन स्वयं कृता वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृते
ति गृहीत विशेषेण वृद्धेः प्रकारांतरमाह कांतारगास्तु दशकं सामुद्रा विंशकं शतं

गुणं पन्नान्येतीति सकृदाहिता सकृदाहृते त्यपि पाठेऽस्ति उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृ
द्धिः कुसीदवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति यदि सकृदाहिता सकृदाहृता पुरुषांतर
संक्रमणादिना प्रयोगांतरकरणाद्द्वैगुण्यमत्येतीति सकृदाहितेति तु पाठे शनैः शनैः प्रति
दिनं प्रतिमासं प्रतिसंवत्सरं वा धमर्णादाहृतं द्वैगुण्यमत्येतीति व्याख्येयं तथा गौतमेनाप्यु
क्तं चिरस्थाने द्वैगुण्यं प्रयोगस्येति प्रयोगस्येत्येकवचननिर्देशात्प्रयोगांतरकरणे
द्वैगुण्यातिक्रमोऽभिप्रेतः चिरस्थानइतिनिर्देशाच्छनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो
दर्शितः ऋणप्रयोगधर्मा उक्ताः सांप्रतं प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यंते प्रपन्नं
साधयन्नर्थं न वाच्यो नृपतेर्भवेत् साध्यमानो नृपं गच्छेद्दंड्यो दाप्यश्च तद्धनं ॥४०॥ प्रप
न्नमभ्युपगतमधमर्णो धनं सामादिभिर्भावितं वा साधयन्नाहरन् धर्मादिभिरुपा
यैरुत्तमर्णो नृपतेर्वाच्यो निवारणीयो न भवति धर्मादिपंचोपाया मनुना दर्शिताः ध
र्मेण व्यवहारेण छलेनाचरितेन च प्रयुक्तं साधयेदर्थं पंचमेन बलेन चेति धर्मेण प्री
तियुक्तेन सत्यवचनेन व्यवहारेण साक्षिलेख्याद्युपन्यासेन छलेनोत्सवादिव्याजेन भू
षणादिग्रहणेन आचरितेन अभोजनेन पंचमेनोपायेन बलेन निगडबंधनादिना
उपचार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति प्रपन्नं साधयन्नर्थं न वाच्य इति वद

वृद्धिरन्यत्राकारितादित्त (?) अधुना द्रव्यविशेषेण वृद्धिविशेषमाह संततिस्तु पशुस्त्रीणां
पशूनां स्त्रीणां संततिरेव वृद्धिः पशूनां स्त्रीणां पोषणासमर्थस्य तत्सुखिसंततिकामस्य प्रयो
गः संभवति गृहे गां च क्षीरपरिचर्यार्थिनः अधुना द्रव्यस्य द्रव्यस्य वृद्धिग्रहणमंतरेण चि
रकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षितमाह रसस्याष्टगुणा प
रा वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ३९ रसस्य तैलघृतादेर्वृद्धिग्रहणमंतरेण चि
रकालावस्थितस्य स्वकृतयावद्वा वर्द्धमानस्याष्टगुणा वृद्धिः परा नातः परं वर्द्धते तथा
वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा त्रिगुणा द्विगुणा च वृद्धिः परा वसिष्ठेन तु रसस्य
त्रैगुण्यमुक्तं द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च
तुलाधृतमष्टगुणमिति मनुना तु धान्यस्य पुष्पमूलफलादीनां च पंचगुणत्वमुक्तं धान्ये
शदे लवे वाह्ये विषये नातिपंचतामिति शदः क्षेत्रफलं पुष्पमूलफलादि लवो मेषोर्णा
चमरीकेशादिः वाह्यो बलीवर्दतुरगादिः धान्यशदलववाह्यविषया वृद्धिः पंचगुण
त्वेनातिक्रामतीति तत्र धमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्ट
व्या एतच्च सकृत्प्रयोगेपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणे धमर्णदेयस्य द्वै
गुण्यासंभवात्पूर्वाहितवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धत एव यथाह मनुः कुसीदवृद्धिर्द्वै

स्यसाधितस्यार्थस्य दशममंशं राज्ञाः धमर्णिकाद्दंडरूपेण ग्रहीयादित्यर्थः उत्तमर्णस्तु प्राप्ता
र्थः पंचकं शतं भृतिरूपेण दाप्यः साधितस्यार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृ
ह्णीयादित्यर्थः अप्रतिपन्नार्थसाधने तु दंडविभागो दर्शितो निह्नवे भावितो दद्यादित्यादिना
सधनमधमर्णिकं प्रस्तुत्य अधुना निर्धनमधमर्णिकं प्रत्याह हीनजातिं परिक्षीणमृणार्थं
कर्म कारयेत् ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं ४३ ब्राह्मणादिरुत्तमर्णो ही
नजातिं क्षत्रियादिजातिं परिक्षीणं निर्द्धनमृणार्थमृणनिर्वृत्यर्थं कर्म स्वजात्यनुरूपं कार
येत् न तु कुटुंबाविरोधेन ब्राह्मणः पुनः परिक्षीणो निर्द्धनः शनैर्यथोदयं यथासंभवमृणं दा
प्यः अत्र च हीनजातिग्रहणं समजातेरप्युपलक्षणमतश्च समजातमपि परिक्षीणं यथो
चितं कर्म कारयेत् ब्राह्मणग्रहणं च श्रेयोजातेरुपलक्षणमतश्च क्षत्रियादपि परिक्षीणो
वैश्यादेः शनैर्दाप्यो यथोदयं एतदेव मनुनाप्युक्तं कर्मणापि समं कुर्याद्धनिकेनाध
मर्णिकः समोपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैरिति उत्तमर्णेन समेन वृत्तोत्तमर्णाधम
र्णव्यपदेशमात्रानमधमर्णः कर्मणा कुर्यादित्यर्थः किंच दीयमानं न गृह्णाति प्रयुक्तं यः
स्वकं धनं मध्यस्थस्थापितं तस्माद्वर्द्धते न ततः परं उपचयार्थं प्रयुक्तं धनमधमर्णेन दीयमा
नमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाधमर्णेन मध्यस्थस्थापितं यदि स्यात्तदा ततः स्था

नप्रतिपन्नं साधयन्नाज्ञा निवारणीय इति दर्शयति एतदेव स्पष्टीकृतं कात्यायनेन पी
डयेद्यो धनी कश्चिदृणिकं न्यायवादिनं तस्माद्धर्थात्स हीयेत तत्समं चाप्नुयाद्दममिति
यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम
साधयंतमभियुंक्ते स दंड्यो भवति शक्त्यनुसारेण धनिने तद्धनं दाप्यश्च राज्ञा दापने
च प्रकारा दर्शिताः राज्ञा तु स्वामिने विप्रं सांत्वेनैव प्रदापयेत् देशाचारेण चान्यांस्तु दु
ष्टान्संपीड्य दापयेत् रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेदिति साध्यमानो नृपं
गच्छेदित्येतत्स्पष्टाचारव्ययेस्तेनेत्यस्य प्रत्युदाहरणं बोधव्यं बहूत्तमर्णिकेषु युगप
त्प्राप्तेष्वधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह गृहीतानुक्रमाद्दाप्यो ध
निनामधमर्णिकः दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनंतरं ४१ समानजातीयेषु ध
निषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको दाप्यो राज्ञा भिन्नजातीये
षु तु ब्राह्मणादिक्रमेण यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपायैः
साधयितुमशक्नुवत् राज्ञा साधितार्थो भवति तदाधमर्णस्य दंडमुत्तमर्णस्य च भृ
तिदानमाह राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतं पंचकं वा शतं दाप्यः प्राप्ता
र्थो ह्युत्तमर्णिकः अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं दाप्यः प्रतिपन्न

नपुत्रस्योपरि भवतीत्यर्थः अनादेयमृणमुक्तं न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह गोपशौं
डिकशैलूषरजकव्याधयोषितां ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया गोपो गोपालः
शौंडिकः सुराकारः शैलूषो नटः रजको वस्त्राणां रंजकः व्याधो मृगयुः एतेषां योषिद्भिर्यदृणं
कृतं तत्पतिभिर्देयं यस्मात्तेषां यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना यस्माद्वृत्तिस्त
दाश्रयेति हेतुव्यपदेशादन्येपि ये योषिदधीनजीवनास्तेपि योषित्कृतमृणं दद्युरिति गम्यते प
तिकृतं भार्या न दद्यादित्यस्यापवादमाह प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं स्वयं कृतं वा
यदृणं नान्यत्स्त्री दातुमर्हति ममूर्षुणा प्रवसता वा पत्या नियुक्ता पत्युर्ऋणं दास्यामीति यत्प्रतिपन्नं त
त्पतिकृतमप्यृणं देयं यच्च पत्या सह भार्यया ऋणं कृतं तदपि भर्तुरभावे भार्यया पुत्राद्यभावे देयं यच्च स्वय
मेव कृतमृणं तदपि देयं ननु प्रतिपन्नादि त्रयं स्त्रिया देयमिति न वक्तव्यं संदेहाभावात् उक्तं
ते भार्या पुत्रश्च दासस्त्रय एवाधनाः स्मृताः यत्ते समधिगच्छंति यस्य ते तस्य तद्धनमिति व
चनाद्विर्धनत्वेन प्रतिपन्नादिष्वदानाशंकायामिदमुच्यते प्रतिपन्नं स्त्रिया देयमित्यादि न चा
नेन वचनेन स्त्र्यादीनां निर्धनत्वमभिधीयते पारतंत्र्यमात्रप्रतिपादनपरत्वात् एतच्च वि
भागप्रकरणे स्पष्टीकरिष्यते नान्यत्स्त्री दातुमर्हतीत्येतदपि न वक्तव्यं विधानेनैवान्यत्र प्र
तिषेधसिद्धेः उच्यते प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतमित्यनयोरपवादार्थमुच्यते
अन्यत्सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति पुनरपि यद्

पित्रादूर्ध्वं न वर्त्तते अथ यस्यापि तमपि याच्यमानो न ददाति ततः पूर्ववद्दंडं तदेव दद्यान्नोदय
मृणं यदा येन च देयं तदाह अविभक्तैः कुटुंबार्थे यदृणं कृतं तदृणं कुटुंबी दद्यात्तस्मिन्प्रे
ते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः येन देयमित्यत्र प्रत्युदाहरणमाह न योषित्पतिपुत्रा
भ्यां न पुत्रेण कृतं पिता दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा पत्या कृतमृणं योषिद्भा
र्या न दद्यात् पुत्रेण कृतं योषिन्माता न दद्यात् तथा पुत्रेण कृतं पिता न दद्यात्तथा भार्या
कृतं पतिः कुटुंबार्थादृते इति सर्वशेषमतश्च कुटुंबार्थं येन केनापि कृतं तत्कुटुंबि
ना देयं तदभावे तद्दायहरैर्देयमित्युक्तमेव पुत्रपौत्रैर्ऋणं देयमिति वक्ष्यतीति तस्य पुरस्तादप
वादमाह सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकं
सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसननिमित्तं द्यूते पराजयनिर्वृत्तं दंडशुल्कयो
रवशिष्टं वृथादानं धूर्तबंदिमल्लादिभ्यो यत्प्रतिज्ञातं धूर्ते बंदिनि मल्ले च कुवैद्ये कितवे
शठे चाटचारणचोरेषु दत्तं भवति निष्फलमिति स्मरणात् एतदृणं पित्रा कृतं पुत्रादिः
शौंडिकादिभ्यो न दद्यात् अत्र दंडशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्वे दातव्यमि
ति न मंतव्यं दंडं वा दंडशेषं वा शुल्कं तच्छेषमेव वा न दातव्यं तु पुत्रेण यच्च न स्याद्व्यावहारिक
मित्यौशनसस्मरणात् गौतमेनाप्युक्तं मद्यशुल्कद्यूतदंडा न पुत्रानध्याभवेयुरिति २५

मस्मरणात् पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेणार्णं द
द्युः अविभक्ताश्चेत्संभूयसमुत्थानेन गुरोः प्रधानभावेन वर्तमाना नो प्रधानभूत एव वा
दद्यादिति गम्यते यथाह नारदः अत ऊर्द्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः अविभक्ता
विभक्ता वा यस्तां वोद्वहते धुरमिति अत्र च यद्यपि पुत्रपौत्रैरृणं देयमित्यविशेषेणोक्तं
तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव देयं पौत्रेण तु सममूल्यमेव दातव्यं
न वृद्धिरिति विशेषोऽवगन्तव्यः ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं पैतामहं समं
देयमदेयं तत्सुतस्य तु इति बृहस्पतिवचनात् अत्र विभावितमित्यविशेषोपादाना
त्साक्षिभावितमित्यत्र साक्षिगृहस्य प्रमाणोपन्यस्तं समयावहं तं तावद्देयं न वृद्धिः
तत्सुतस्य प्रपौत्रस्यादेयमगृहीतधनस्य एतच्चोत्तरश्लोके स्पष्टयिष्यते ऋणस्याकरणे
ऋणी तत्सुतः पौत्र इति त्रयः कर्तारो दर्शितास्तेषां च समवाये क्रमोपि दर्शितः इदानीं कर्तृ
तरसमवाये च क्रममाह रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च पुत्रोनन्याश्रितद्र
व्यः पुत्रहीनस्य रिक्थिनः अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत्स्वं भवति तद्रि
क्थं विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः एतदुक्तं भवति यो यदीयं द्र
व्यं रिक्थरूपेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिरिति योषितं भार्यां गृह्णातीति योषि
द्ग्राहः स तथैव ऋणं दाप्यः यदीयां योषितं यो गृह्णाति स तत्कृतं ऋणं दाप्यः योषितोऽविभाज्य

मि.
व.
२८

...दानप्रयचकालेदातव्यतत्रितयमाह पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेपि वा पुत्रपौ...
त्रैरृणं देयं निह्नवे साक्षिभावितं पिता यदि दूरदेशं गतो चिकित्सिनी
व्याध्याद्यभिभूतो वा तदा तत्कृतमृणमवश्यापरोदेयं पुत्रेण पौत्रेण वा पितृधनाभावेपि पुत्र
त्वेन पौत्रत्वेन च तत्र क्रमोप्ययमेव पित्र्यभावे पुत्रः पुत्राभावे पौत्र इति पुत्रेण पौत्रेण वा निह्नवे
कृते अर्थिना साक्ष्यादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः अत्र पितरि प्रोषित इत्येतावदु
क्तं कालविशेषस्तु नारदेनोक्तो द्रष्टव्यः नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः ऋणं दद्या
त्पितृव्ये वाप्यज्येष्ठे भ्रातर्यथापि वेति प्रेते प्राप्तव्यवहारकालो न दद्यादप्राप्तव्यवहारका
लस्तु दद्यात् स च कालस्तेनैव दर्शितः गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः बाल
आषोडशाद्वर्षात्पोगण्डश्चेति शब्द्यते परतो व्यवहारज्ञः स्वतन्त्रः पितर्यृ ध्वृते इति यद्यपि पि
तृमरणादूर्द्ध्वं कालोपि स्वतन्त्रो जातस्तथापि तर्णभागभवति यथाह अप्राप्तव्यवहार
श्चेत्स्वतन्त्रोपि हि नर्णभाक् स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयः कृतमिति तथा आ
सेधाह्वाननिषेधश्च दृश्यते अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती विषमस्थाश्च
नासेध्या न चैतानाह्वयेन्नृप इति तस्मात् अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ऋ
णात्पिता मोचनीयो यथा न नरकं व्रजेदिति पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति
व्याख्येयं अप्राप्तव्यवहारस्तु बालस्याप्यधिकारः न ब्रह्माभिव्याहरयेदन्यत्र स्वधानिनयनादिति गौत

थाह नारदः परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमं पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा देशध
र्मानवेक्ष्य स्त्री पितृभिर्या प्रदीयते उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता उत्पन्नसाहसा उ
त्पन्नव्यभिचारा असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते सवर्णाय सपिण्डाय सा तृतीया प्रकी
र्तिता स्त्री प्रसूताप्रसूता वा पत्यावेव तु जीवति कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा कौ
मारं पतिमुत्सृज्य यात्वन्यं पुरुषं श्रिता पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्तिता मृते भ
र्त्तरि तु प्राप्तान् देवरादीनपास्य या उपगच्छेत् परं कामात् सा तृतीया प्रकीर्तिता प्राप्ता देशा
द्धनक्रीता क्षुत्पिपासातुरा च या तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता एवं तिमास्वैरि
णीनां या प्रथमा च पुनर्भुवां ऋणं तयोः पतिकृतं दद्याद्यस्ते उपास्नुत इति तथान्योपि यो
षिद्ग्रहणाया करणेधिकारी तेनैव दर्शितः या तु सप्रधनैव स्त्री सापत्यावन्यमाश्रयेत् सो
स्या दद्याद्धरणं भर्त्तुरुत्सृजेद्वा तथैव तां अधनेन सह वर्त्तत इति सप्रधाना बहुधनेति
यावत् तथा धनस्पृहा पुत्रस्याप्त तस्याप्येति यः स्त्रियं ऋणं वोढुः समश्नुते सैव चास्य धनं स्मृत
मिति पुत्रस्य पुनर्वचनं क्रमार्थं अनन्याश्रितद्रव्य इति बहुषु पुत्रेषु रिक्थाभावेप्यंशग्रह
णायोग्यस्यैव ऋणापाकरणेधिकारो नायोग्यस्यान्धादेरित्येवमर्थं पुत्रहीनस्य रिक्थिन इत्येत
दपि पुत्रपौत्रहीनस्य प्रपौत्रादयोपि हि रिक्थग्रहणं इति तद्दर्शनाय नान्यथेत्येवमर्थं पुत्रपौ

३०

अनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिन ऋणं दाप्य इति संबंधः एतेषां समवाये क्रमश्चा
पावक्रम एव रिक्थग्राह ऋणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र इति नन्वेतेषां स
मवाय एव नोपपद्यते न भ्रातरो न पितरः पुत्रा ऋक्थहराः पितुरिति पुत्रे सत्यन्यस्य रि
क्थग्रहणासंभवात् योषिद्ग्राहोपि नोपपद्यते न ह्यपस्त्रसाध्वीनां क्वचिद्दत्तौ यदि श्व
न इति स्मरणात् तथर्णं पुत्रो दाप्यस्त्वप्ययुक्तं पुत्रपौत्रैर्ऋणं देयमित्युक्तत्वात् अन
न्याश्रितद्रव्य इति विशेषणमप्यनर्थकं पुत्रे सति द्रव्यस्यान्याश्रयणासंभवात् संभ
वे च रिक्थग्राहीत्यनेनैव गतार्थत्वात् पुत्रहीनस्य रिक्थिन इत्येतदपि न वक्तव्यं पुत्रे स
त्यपि ऋक्थग्राह ऋणं दाप्य इति स्थितम् असति पुत्रे रिक्थग्राही सुतरां दाप्य इति सिद्धमेवेति
अत्रोच्यते पुत्रे सत्यप्यचौर ऋक्थग्राही संभवति क्लीबान्धबधिरादीनां पुत्रत्वेपि ऋक्थ
हरत्वाभावात् तथा च क्लीबादीननुक्रम्य भर्त्तव्यास्तु निरंशका इति वक्ष्यति तथा स
वर्णेपि पुत्रोप्यन्यायवृत्तो न लभेतैकेषामिति गौतमवचनात् अतश्च क्लीबादिषु पुत्रे
षु सत्स्वन्यायवृत्तेषु च सवर्णापुत्रे सति रिक्थग्राही पितृव्यतत्सुतादिः योषिद्ग्राहोपि यद्य
पि शास्त्रविरोधेन न संभवति तथाप्यतिक्रान्तनिषेधः पूर्वपतिकृतर्णापाकरणेऽ
धिकारी भवत्येव यश्च तस्याः स्वैरिणीनामन्तिमां गन्ता यश्च पुनर्भुवां तिसृणां प्रथमां य

धिर्वा धवः तदादद्याद्विजेभ्यस्तु तेभ्यस्तत्सुनिक्षिपेदिति अधुनापुरुषविशेषेणऋणगृहणा
प्रतिषेधनप्रसंगाद्यदपि प्रतिषेधति भ्रातॄणामविभक्तानां दंपत्योः पितुः पुत्रस्य चैव हि प्रतिभाव्य
मृणं साक्ष्यमविभक्तेन तु स्मृतं प्रतिभुवो भावः प्रतिभाव्यं भ्रातॄणां दंपत्योः पितापुत्रयोश्चावि
भक्ते द्रव्ये द्रव्यविभागात्प्राक्प्रातिभाव्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः अपि तु प्रतिषिद्धं सा
धारणधनत्वात्तत् प्रतिभाव्यसाक्षित्वयोः परद्रव्यव्ययावसानत्वात् ऋणस्य चावश्यप्रतिदेयत्वा
त् एतच्च परस्परानुमतिव्यतिरेकेण परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भ
वत्येव विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति ननु दंपत्योर्विभागात्प्राक्प्राति
भाव्यादिप्रतिषेधो न युज्यते तयोर्विभागाभावेन विशेषणानर्थक्यात् विभागाभावश्चापस्तंब
वेन दर्शितः जायापत्योर्न विभागो विद्यते इति सत्यं श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फले
षु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु वा तथाहि जायापत्योर्न विभागो विद्यत इत्युक्त्वा
किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान् पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु
चेति हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते जायापती अग्निमादधीयातामि
ति तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः तथा कर्म
स्मार्तं विवाहाग्नाविति स्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव
अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारः सपद्यते

65

[illegible] धुः पतनामह [illegible] निवर्तन्त इति सर्वं निरवद्यं यद्यपि योषिद्ग्राहाभावे पुत्रो दाप्य इ

२१ त्युक्तं पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते पुत्रहीनस्य रिक्थिन इति रिक्थग्राहेण योषिदेवोच्य
ते सैव चास्य धनं स्मृतमिति स्मरणं यो यस्य हरते दारान्स तस्य हरते धनमिति च ननु यो
५ग्रा षिद्ग्राहाभावे पुत्रऋणं दाप्यः पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धमुभयसद्भावे न कश्चिद्दाप्य
इति नैष दोषः अप्रत्तमध्यैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः स च धनस्त्रीहारिणश्चाभावे पुत्रो दा
प्यः पुत्राभावे तु निर्धननिरपत्ययोषिद्ग्राही दाप्य इति एतदेवोक्तं नारदेन धनस्त्रीहारिपुत्रा
णामृणभाग्यो धनं हरेत् पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोरिति धनस्त्रीहारि
पुत्राणां समवाये यो धनं हरेत्स ऋणभाक् स्त्रीधनिनोः स्त्री च धनं च स्त्री धने ते विद्येते ययोस्त्री स्तौ
धनिनौ तयोः स्त्रीधनिनोरसतोः पुत्र एवर्णभाक् धनिपुत्रयोरसतोः स्त्रीहार्येवर्णभाक्
स्त्रीहार्यभावे पुत्रऋणभाक् पुत्राभावे स्त्रीहारीति विरोधे प्रतिभासपरिहारः पूर्ववत् पुत्र
हीनस्य रिक्थिन इत्यस्यान्या व्याख्या एते धनस्त्रीहारिपुत्राऋणं कस्य दाप्या इति विवक्षा
यामुत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः पुत्राभावे कस्य दाप्या इत्यपेक्षायामिदमुपतिष्ठ
ते पुत्रहीनस्य रिक्थिन इति पुत्राद्यन्वयहीनस्योत्तमर्णस्य यो रिक्थी रिक्थग्राहणयोग्यः स
पिंडादिस्तस्य रिक्थिनो दाप्याः तथा च नारदेन ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति चेत्
निर्वपेत्तत्सकुल्येषु तदभावेऽस्य बंधुषु यदा तु न सकुल्याः स्युर्न च संबं

64

67

सुतान दाप्याः स्युक्तं सुताइति वदता न पौत्रा दाप्या इति दर्शितं एतदेव स्पष्टीकर्तुमाह दर्शनप्रतिभू
र्यत्र मृतः प्रात्ययिकोपि वा न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः यत्र दर्शनप्रतिभूः प्रात्ययि
को वा प्रतिभूर्दिवं गतस्तत्र तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः यस्तु दानाय स्थि
तः प्रतिभूर्दिवं गतः तस्य पुत्रा दद्युर्न पौत्राः ते च मूल्यमेव दद्युर्न वृद्धिं ऋणं पैतामहं पौत्रः
प्रातिभाव्यागतं सुतः समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चय इति व्यासवचनात् प्रातिभा
व्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद्गृहीतं तावदेव दद्यान्न वृद्धिं तथा सुतोपि प्रातिभाव्याग
तं पित्र्यमृणं सममेव दद्यात्तयोः पौत्रपौत्रयोः सुतौ प्रपौत्रौ प्रातिभाव्यायातं पातिभाव्यायातं
वर्णितया क्रमेण गृहीतधनौ न दाप्याविति यदपि स्मरणं खादको वित्तहीनः स्याल्लग्नको
वित्तवान् यदि मूल्यं तस्य भवेत् देयं न वृद्धिं दातुमर्हतीति तदपि लग्नकः प्रातिभूः खादको
धमर्णः लग्नको यदि वित्तवान्मृतस्तस्य पुत्रेण मूल्यमेव दातव्यं न वृद्धिरिति व्याख्येयं यत्र
देवं बंधकाख्ये प्रातिभाव्यायातमृणं दद्युरेव यथाह कात्यायनः गृहीत्वा बंधकं यत्र दर्शनेस्य
स्थितो भवेत् विनापि त्राधनात्तस्मात् दाप्यः स्यात्तदृणं सुत इति दर्शनगृहणं प्रत्ययस्योप
लक्षणं विना पित्रा पितरि प्रेते दूरदेशं गते चेति यस्मिन्ननेकप्रतिभूसंभवस्तत्र कथं
दातव्यमित्याह बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनं एकच्छायाश्रितेष्वेषु धनिकस्य

[illegible]

३२ ऽन्यथानुष्ठितानां फलेष्वपि न तु द्रव्यस्वामित्वेपि सहत्वमुक्तं द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्र
वासे नैमित्तिके दानः स्तेयमुपदिश्यंतीति सत्यं द्रव्यस्वामित्वंपरत्वात् दर्शितमनेन पुनर्वि
भागाभावः यस्माद्द्रव्यपरिग्रहेषु चेत्युक्ता तत्र कारणमुक्तं भर्तुर्विप्रवासे नैमित्तिके वश्य
कर्तव्ये दान अतिथिभोजन भिक्षाप्रदानादौ हि यस्मान्न स्तेयमुपदिशंति मत्वादपत्तस्मा
द्भार्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यादिति तस्माद्भर्तुरिच्छया भार्याया अपि द्र

66

व्यविभागो भवत्येव न स्वेच्छया यथा वक्ष्यति यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिका इति
अधुना प्रातिभाव्यं निरूपयितुमाह दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते आद्यौ तु वित
थे दाप्यावितरस्य सुता अपि प्रातिभाव्यं नाम विश्वासार्थं पुरुषांतरेण सह समयः तच्च
विषयभेदात्त्रिधा भिद्यते यथा दर्शनापेक्षायामेनं दर्शयिष्यामीति प्रत्यये विश्वासे मत्प्रत्यये
विश्वासे नास्य धनं प्रयच्छ नायं त्वां वंचयिष्यते यतो मुकस्य पुत्रोयमुर्वराप्रायो भूरस्य ग्रा

म म वरोस्तीति दाने यद्ययं न ददाति तदाहमेव दास्यामीति प्रातिभाव्यं विधीयत इति प्र
त्येकं संबंधः आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्य
भिचारे च दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य इतरस्य दानप्रतिभुवः सुता अपि दाप्याः वि
वाद इत्येव शास्त्रेण निर्दिष्टत्वेनावाधमर्णे प्रतिकुर्वीत इतरस्य सुता अपीति वदता पूर्वयोः ३२

कदाचित्केपि पशुस्त्रीणां सद्यः संततस्यभावान्मूल्यदानमेव प्राप्नोतीति तदासत् वस्त्रधान्यहिरण्यानां
चतुस्त्रिद्विगुणा परेत्यनेनैव कालकलाक्रमेण द्वैगुण्यादिसिद्धेः द्वैगुण्याभिप्रविधाने इदं वचनम्
मनर्थकं स्यात् पशुस्त्रीणां तु कालक्रमपक्षेपि संततस्यभावे स्वरूपदानमेव यदा प्रतिभूरपि द्रव्य
दानानंतरं कियतापि कालेनाधमर्णेन संघटते तदा संततिरपि संभवत्येव यद्वा पूर्वसिद्धं संतत्या
सह पशुस्त्रियो दास्यंतीति न किंचिदेतत् अथ यदुक्तं प्रीतिभावं प्रीतिकृतमतश्च प्रतिभुवा दत्तं प्रीतिद
त्तमेव न च प्रीतिदत्तस्य याचनात्प्राग्वृद्धिरस्ति यदाह प्रीतिदत्तं तु यत्किंचिद्वर्धते न त्वयाचितं
याच्यमानमदत्तं चेद्वर्धते पंचकं शतमिति अतश्चास्य प्रीतिदत्तस्य याचितस्यापि दानदिवस
सादारभ्य यावद्द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति तदप्यसत् अस्यार्थ
स्यास्माद्वचनादप्रतीतेर्द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते तस्मात्कालक्रममन
पेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारंभसामर्थ्यादिति सुष्ठूक्तं प्रतिभूदत्तस्य सर्वत्र द्वैगु
ण्ये प्राप्ते अपवादमाह संततिस्त्री पशुष्वेव धान्यं त्रिगुणमेव च वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्ट
गुणस्तथा हिरण्यद्वैगुण्यवत्कालांतरे सैव स्त्र्यादयः प्रतिपादितवृद्ध्या दाप्याः श्लो
कस्तु व्याख्यात एव यस्य द्रव्यस्य यावती वृद्धिः परा काष्ठा कालक्रमेण तद्द्रव्यं प्रतिभूदत्तं खादकेन तत्
यावद्वृद्ध्या सह कालविशेषमनपेक्ष्यैव सद्यो दातव्यमिति तात्पर्यार्थः यदा तु दर्शनप्रतिभूः सं
प्रतिपन्ने काले धमर्णं दर्शयितुमसमर्थस्तदा तद्धनं वक्तव्य तस्य पुत्रश्च यं दातव्यं तत्त्रयदि
दर्शयति नोक्त [illegible]

व्या. ३३

षु प्रतिभूषु एकस्याधमर्णस्य छायां सादृश्यतामाश्रिताः एकच्छायाश्रिताः अधमर्णो यथा कृत्स्न
द्रव्यदानाय स्थितस्तथा दानप्रतिभुवोपि प्रत्येकं कृत्स्नदानाय स्थिताः एवं दर्शनप्रत्ययेचते
ष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामं अतश्च धनि
को विभागमपेक्ष्य यास्वार्थं यं प्रार्थयते स एव कृत्स्नं दद्यात् नांशतः एकच्छायाश्रितेषु यदि कश्चि
द्देशांतरं गतस्तत्पुत्रश्च संनिहितस्तदा धनिकेच्छया स सर्वं दाप्यः मृते तु कस्मिंश्चित्तत्पित्रंश
मवृद्धिकं दाप्यः यथाह कात्यायनः एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते प्रोषिते तत्सुतः
सर्वं पित्रंशं तु मृते समं इति प्रातिभाव्यं दानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रियाविधिमाह
प्रतिभूर्दापितो यत्तु प्रकाशं धनिनां धनं द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् यद्द्रव्यं
प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः प्रकाशं सर्वजनसमक्षं राज्ञा धनिनां दापितो न पुनः
द्वैगुण्यलोभेन स्वयमुपेत्य दत्तं यथाह नारदः पंचार्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः
ऋणिकं तं प्रतिभुवे द्विगुणं प्रतिदापयेदिति ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्तद्द्रव्यं द्वि
गुणं प्रतिदातव्यं स्यात् तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यं वचनारंभसा
मर्थ्यात् एतच्च हिरण्यविषयं नन्विदं वचने द्वैगुण्यमात्रं प्रतिपादयति तच्च पूर्वोक्तका
लक्रमाबाधेनाप्युपपद्यते यथा जातेष्टिविधाने शुचित्वाबाधेन अपि च सद्यः सवृद्धिकदा

रूपितकालइत्यर्थः गोप्योरक्षणीयः एवंचतुर्विधस्याधेर्विशेषमाह आधिःप्रणश्येद्द्विगुणे
धनियदिनमोक्ष्यते कालेकालकृतोनश्येत्फलभोग्योननश्यति प्रयुक्तेधनेस्वकृतयाव
द्ध्याकालक्रमेणाद्विगुणीभूतेयद्याधिरधमर्णेनद्रव्यदानेननमोक्ष्यतेतदानश्यत्यधम
र्णस्यधनप्रयोक्तुःस्वंभवतिकालकृतः कृतकालः आहिताग्न्यादिषुपाठात्कालशब्दस्य
पूर्वनिपातः सतुकालेनिरूपितेप्राप्तेनश्यति द्वैगुण्यप्राप्त्यूर्ध्वंवा फलभोग्यः फलंभो
ग्यंयस्यासौफलभोग्यः क्षेत्रारामादिः सनकदाचिदपिननश्यति कृतकालस्यगोप्यस्य
भोगस्यचतत्कालातिक्रमेनाशउक्तः कालेकालकृतोनश्येदिति अकृतकालस्यभोग्य
स्यनाशाभावउक्तः फलभोग्योननश्यतीतिपर्युदासादाधिःप्रणश्येदित्येतदकृतकालगो
प्याधिविषयमवतिष्ठते द्वैगुण्यातिक्रमेणनिरूपितकालातिक्रमेणचविनाशेचतुर्दश
दिवसप्रतीक्षणंकर्तव्यं बृहस्पतिवचनात् हिरण्येद्विगुणीभूतेपूर्णेकालेकृतावधेः बंध
कस्यधनीस्वामीद्विसप्ताहंप्रतीक्ष्यच तदंतराधनंदत्वाऋणीबंधकमाप्नुयादिति नन्वा
धिःप्रणश्येदित्यनुपपन्नं अधमर्णस्यस्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् धनि
नश्चस्वत्वहेतोःप्रतिग्रहक्रयादेरभावात् मनुवचनविरोधाच्च नचाधेःकालसंरोधा
न्निसर्गोस्तिनविक्रयइति कालेनसंरोधः कालसंरोधश्चिरकालमवस्थानंतस्मात्का
लसंरोधाच्चिरकालावस्थानादाधेर्ननिसर्गोस्ति नान्यत्राधीकरणमस्ति नचविक्र

७१

[illegible]
मीनचवैशत्रुःस्वामिनाधिकृतस्तथा निरुद्धोदंडितश्चैवसंदिग्धश्चैवनकचित् नैवरिक्थी
नमित्रंचनचैवात्यंतवासिनः राजकार्यनियुक्ताश्चयेचप्रव्रजितानराः नाशक्तोधनिनोदा
तुंदंडराज्ञेचतत्समं जीवन्वापिपितायस्यतथैवेच्छाप्रवर्तकः नविज्ञातोगृहीतव्यःप्रति
भूस्तत्क्रियांप्रतीति संदिग्धोपिशस्तः अत्यंतवासिनोनैष्ठिकब्रह्मचारिणः इतिप्रतिभूवि
धिः धनप्रयोगेद्वौविश्वासहेतूप्रतिभूराधिश्च यथाहनारदः विश्रंभहेतूद्वावत्रप्रति
भूराधिरेवचेति तत्रप्रतिभूर्निरूपितः इदानीमाधिर्निरूप्यते आधिर्नामगृहीतस्यद्र
व्यस्योपरिविश्वासार्थमधमर्णेनोत्तमर्णेक्रियतेआधीयतइत्याधिः सचद्विविधःकृत
कालोऽकृतकालश्च पुनश्चैकैकशोद्विविधः गोप्योभोग्यश्च यथाहनारदः अधि
क्रियतइत्याधिः सविज्ञेयोद्विलक्षणः कृतकालोपनेयश्चयावद्देयोद्यतस्तथा सपु
नर्द्विविधःप्रोक्तोगोप्योभोग्यस्तथैवचेति कृतेकाले[illegible] कालएवमुष्मिन्कालेदी
पोत्सवादौमयायुष्माधिर्मोक्षणीयोऽन्यथा तवैवाधिर्भविष्यतीत्येवंनिरूपितेकालेउपने
यः आत्मसमीपंनेतव्योमोचनीयइत्यर्थः देयंदानंदेयमनतिक्रम्ययावद्देयंउद्यतो
नियतःस्थापितइत्यर्थः यावद्देयमुद्यतोयावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनि

७०

नष्टेमूल्यनाशः स्याद्दैवराजकृताद्दृते इति नारदवचनात् दैवराजकृताद्दृते दैवमग्न्युदकदेशो
पप्लवादि दैवकृतो हि नाशस्तद्धीनात्तथास्यापराधरहिताद्राजकृतात् दैवराजकृते तु विनाशे
सवृद्धिकं मूल्यं दातव्यमधमर्णेनाधिंतरं वा यथाह स्रोतसापहृते दैवे राज्ञा चैवापहारिते
आधिरन्योथ कर्त्तव्यो देयं वा धनिने धनमिति तत्र स्रोतसापहृतेति दैवकृतोपलक्षणं अपि च
आधेः स्वीकारणात्सिद्धिः रक्ष्यमाणोप्यसारतां यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्
आधेर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगाद्वाधिग्रहणस्य सिद्धिर्न साक्षिलेख्यमात्रेण नाप्युद्देश
मात्रेण यथाह नारदः आधिस्तु द्विधः प्रोक्तो जंगमस्थावरस्तथा सिद्धिरस्योभयस्यापि भोगो
यद्यस्ति नान्यथेति अस्य च फलं आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरेति या स्वीकारान्ता
क्रिया सा पूर्वा बलवती स्वीकाररहिता तु पूर्वापि न बलवतीति स चाधिः प्रयत्नेन रक्ष्यमा
णोपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यपर्याप्ततां गतस्तत आधिरन्यः
कर्त्तव्यो धनिने वा धनं देयं रक्ष्यमाणोप्यसारतामिति वदताधिः प्रयत्नेन रक्षणीयो धनिनेति सू
चितं आधिप्रणाशेपि हि गुणद्रव्यस्यापवादमाह चरित्रबंधकृतं सवृद्ध्या दापयेद्धनं सत्यंका
रकृतं द्रव्यं द्विगुणं प्रतिदापयेत् चरित्रं शोभनाचरितं चरित्रेण बंधकं चरित्रबंधकं तेन य
त् द्रव्यमात्मसात्कृतं तत्तद्बंधकं भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्या
धमर्णेनाल्पमेव द्रव्यमात्मसात्कृतं यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा ब
हुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं सवृद्ध्या सह दापयेत् अयमाशयः ए

कस्वत्वापत्तिहेतुः प्रसिद्धः तत्र धनद्वैगुण्यनिरूपितकालप्राप्तौ च द्रव्यदानस्यात्यंतनि
वृत्ते रनेकत्वेनाधमर्णस्यात्यंतिकी स्वत्वनिवृत्तिः उत्तमर्णस्य चात्यंतिकं स्वत्वं भवति
न च मनुवचनविरोधः यतो न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति भोग्याधिं प्र
त्युत्येदमुच्यते न चाधेः कालसंरोधान्निसर्गोस्ति न विक्रय इति भोग्यस्याधेश्चिरतरका
लावस्थानेप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वं नास्तीति इहाप्युक्तं फलभोग्यो
न नश्यतीति गोप्याधौ तु पृथगारंभमनुना न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजे
दिति इहापि वक्ष्यते गोप्याधिभोगे नो वृद्धिरिति आधिप्रणाशे द्विगुणे इति तु गोप्याधिं प्र
त्युच्यत इति सर्वमविरुद्धं किंच गोप्याधिभोगे नो वृद्धिः सोपकारे च हापिते नष्टो देह
यो विनष्टश्च दैवराजकृताद्दृते गोप्याधेस्ताम्रकटाहादेरुपभोगेन वृद्धिर्भवति अल्पेप्य
प्युपभोगे महत्यपि वृद्धिर्हीनत्वा समयातिक्रमात् तथा सोपकारे कारिणी वलीवर्द
ताम्रकटाहादौ भोग्यपोसः वृद्धिके हापिते हानिं व्यवहारासमर्थतां गमिते नो वृद्धिरिति सं
बंधः नष्टो विकृतिं गतस्ताम्रकटाहादिश्छिद्रभेदनादिना पूर्ववत्कृत्वा देयः तत्र गोप्या
धिर्नष्टश्चेत्पूर्ववत्कृत्वा देयो वृद्धिसद्भावे वृद्धिर्हीनत्वा विनष्टश्चात्यंतिकं नाशं प्राप्तः सो
पि देयो मूल्यादिद्वारेण तद्धाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाशः वि

गातचतिष्ठेद्वृद्धिकः तस्मिन्काले यत्स्याधेर्मूल्यं तन्तत्त्वकस्य पूर्ववधनिनिमाधिं च द्विरहितं
स्थापयेन्न ततऊर्ध्वं धनं वर्द्धते यावद्दूनी द्विगुणं गृहीत्वा तमाधिं मुंचति यावद्दातमूल्यं द्रव्यम
णेने प्रवेशयति यदा तु द्विगुणीभूतेपि धने द्विगुणं धनमेव गृहीतव्यं न त्वाधिनाश इति वि
चारितमृणगृहणकाल एव तदा द्विगुणीभूते द्रव्ये सन्निहिते वाधमर्णे धनिना किं कर्त्तव्य
मित्यत आह विनाधारणिकाद्वापि विक्रीणीत ससाक्षिकं धारणिकादधमर्णाद्विनाप्य
धमर्णे सन्निहिते साक्षिभिस्तदात्वैः सह माधिं विक्रीय धनं गृह्णीयाद्धनी नाशो व्यवस्थि
तविकल्पार्थः यदर्णगृहणकाले द्विगुणीभूतेपि धने धनमेव गृहीतव्यं नाधिनाश इति
नहि विचारितं तदाप्याधिः ऋणे त्र्यं द्विगुणे इत्याधिनाशः विचारिते त्वयं पक्ष इति भोग्याधौ
विशेषमाह यदा तु द्विगुणीभूतमृणमाधौ तदा खलु मोक्ष आधिस्तदुत्पन्ने प्रविष्टे द्विगु
णे धने यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधीकृते तदुत्पन्ने प्राधुत्पन्ने द्रव्ये
द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः यदि वा दाने वाधौ दत्ते द्विगुणीभूते द्रव्ये तयाधिर्मो
क्तव्य इति परिभाषया कारणांतरेण वा भोगाभावेन यदा द्विगुणीभूतमृणं तदाधौ भागार्थं धनि
नि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः अभिकोपभोगेन तदपि देयं सवृद्धि
कमूल्यर्णापाकरणार्थो ह्युपभोगविषयमिदं वचनं तमेनं हृयाधिमाचक्षते लौकिकाः यत्र
तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेपि यावन्मूल्यदानं तावदुपभुंक्त एवाधिं

व्या
३६

...कारकृते करणं कारो भावे घञ् सत्यस्य कारः सत्यंकारः कारे सत्यागदस्येति मुम् सत्यं
कारेण कृतं सत्यंकारकृतं अयमभिसंधिः यदा वध कार्यरणासमय एवेत्थं परिभाषितं द्विगु
णीभूतेपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाश इति तदा तद्विगुणं दापयेदिति अन्यो
र्थः चरित्रमेव बंधकं चरित्रबंधकं चरित्रशब्देन गंगास्नानाग्निहोत्रादिजनितमपूर्वमुच्य
ते यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतं तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति
आधिप्रसंगादन्यदुच्यते सत्यंकारकृतमिति क्रयविक्रयादिव्यवस्थानिर्वाहाय यदंगु
लीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तत्रापि येनांगुलीयकाद्यर्पि
तं स एव चेद्व्यवस्थानिवर्त्तते तेन तदेव हातव्यं इतरश्चेत् व्यवस्थानिवर्त्ती तदा तदेवांगुली
यकादि द्विगुणं प्रतिदापयेदिति किंच उपस्थितस्य मोक्तव्य आधिः स्तेनोन्यथा भवेत् प्र
योजके सति धनं कुलेन्यस्याधिमाप्नुयात् धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मो
क्तव्यो धनिना न वृद्धिलोभेन स्थापयितव्यः अन्यथा अमोक्षणे स्तेनवच्चोरवद्दंड्यो भवेत्
असंनिहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णः स्वीयं बंधकं गृह्णी
यात् अथ प्रयोक्ताप्यसन्निहितस्तदाप्ताश्च धनस्य गृहीतारो न संति यदि वा सन्निहिते प्रयोक्तरि
र्याधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्त्तव्यमिति त्वपेक्षित आह तत्कालकृतमूल्यो ३६

मिश्र एव च गूढश्चोत्तरसाक्षी च साक्षी पंचविधः कृत इति लिखितादीनां च स्वरूपं कात्यायने
नोक्तं अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते स साक्षी लिखितो नाम स्मारितः पत्रकादृत
इति स्मारितः पत्रकादृतेऽस्य विवरणं तेनैव कृतं यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः
स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यत इति यस्तु यदृच्छयायातः साक्षी क्रियते स च यदृच्छाभि
ज्ञः अनयोः पत्रानारूढत्वेपि भेदस्तेनैव दर्शितः प्रयोजनार्थमानीतः प्रसंगादागतश्च यः द्वौ
साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकाविति तथा अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटं
यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यत इति तथा साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञित इति षड्विधस्याप्यकृतस्य भेदो नारदेन दर्शितः ग्राम
श्च प्राड्विवाकश्च राजा च व्यवहारिणां कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः कुल्याः
कुल्यविवादेषु विज्ञेयास्तेपि साक्षिण इति प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थं लेख
कः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृता इति ते
क्षिणः कीदृशाः कियंतश्च भवंतीत्यत आह तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः
धर्मप्रधाना ऋजवः पुत्रवंतो धनान्विताः त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः यथा
जातियथावर्णं सर्वे सर्वेषु वा स्मृताः तपस्विनस्तपःशीलाः दानशीलाः दाननिरताः कुली
ना महाकुलप्रसूताः सत्यवादिनः सत्यवदनशीलाः धर्मप्रधानाः नार्थकामप्रधानाः ऋजवो
कुटिलाः पुत्रवंतः धनान्विताः बहुसुवर्णादिधनयुक्ताः श्रौतस्मार्तक्रियापराः नित्यनैमिति

व्य.

३८

धर्मोन्याचितादिष्वतिदिशति याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः विवाहाद्यु
त्सवेषु वस्त्रालंकारादि याचितानीतं याचितं यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनुपश्चाद
न्यस्य हस्ते स्वामिने देहीति निहितं तदन्वाहितं न्यासो नाम गृहस्वामिनोऽदर्शयित्वा तत्प
रोक्षमेव गृहजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणीयमिति समक्षं तु समर्पणं निक्षेपः
आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः प्रतिन्यासस्य च
परस्परप्रयोजनापेक्षया त्वयेदं मदीयं रक्षणीयं मयेदं त्वदीयं रक्षितमिति न्यस्तस्य ग्रहणं
यथाह नारदः एष एव विधिर्दृष्टो याचितान्वाहितादिषु शिल्पिषूपनिधौ न्यासे प्रति
न्यासे तथैव चेति एतेषु याचितादिष्वयं विधिरुपनिधेर्यः प्रतिदानादिविधिः स एव वेदि
तव्यः निक्षेपप्रकरणं प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितमित्युक्तं तत्र भुक्तिर्नि
रूपिता संप्रति साक्षिस्वरूपं निरूप्यते साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति यथाह मनु
समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यतीति स च द्विविधः कृतोऽकृतश्च साक्षित्वेन नि
रूपितः कृतः अनिरूपितोऽकृतः तत्र कृतः पंचविधोऽकृतश्च षड्विध इत्येकादशवि
धिः यथाह नारदः एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः कृतः पंचविधो ज्ञेयः
षड्विधोऽकृत उच्यत इति तेषां च भेदस्तेनैव दर्शितः लिखितः स्मारितश्चैव यदृच्छा ३८

तत्कृतः भेदादसाक्षित्वं तत्स्वरूपं तेनैव दर्शितं साक्षिणं लिखितानां च निर्दिष्टानां च वादि-
नां तेषामेकोऽन्यथावादी भेदात्सर्वेन साक्षिण इति तथा स्वयमुक्तिस्वरूपं चोक्तं स्वयमुक्ति-
रनिर्दिष्टः स्वयमेवैत्य यो वदेत् सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हतीति मृतान्तरस्या-
पि स्वरूपमुक्तं योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि क्व तद्वदतु साक्षित्वमित्यसा-
क्षी मृतान्तर इति येनार्थिनाप्रत्यर्थिना प्रत्यर्थिना वा साक्षिणं योऽर्थः श्रावयितव्यो भवेत्पूर्व-
मवार्थे साक्षिण इति तस्मिन्नर्थिनि प्रत्यर्थिवाऽसति मृतेऽर्थे चानिवेदिते साक्षी कस्मिन्नर्थे
कस्य वा कृते साक्ष्यं वदेदित्ययं मृतान्तरः साक्षी न भवति यत्र तु मुमूर्षुणा स्वस्थेन वापि पित्रा पुत्रा-
दयः श्राविताः अस्मिन्नर्थे अमी साक्षिण इति तत्र मृतान्तरोऽपि साक्षी यथाह नारदः मृतान्त-
रोऽर्थिनि प्रेते मुमूर्षुश्रावितादृते तथा श्रावितातुरेणापि स्वस्थो धर्मसंहितः मृतेऽपि तत्र साक्षी
स्यात्षट्सु चान्वाहितादिष्विति अनेनान् साक्षिणो दर्शयति स्त्री बालवृद्धकितवमत्तोन्म-
त्ताभिशस्तकाः रंगावतारिपाखंडिकूटकृद्विकलेन्द्रियाः पतितात्पार्थसंबंधिसहायरिपुत-
स्कराः साहसी दृष्टदोषश्च निर्धूतात्याश्च साक्षिणः स्त्री प्रसिद्धा बालोऽप्राप्तव्यवहारः
वृद्धोऽशीतिकावरः वृद्धग्रहणं वचननिषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणा-
र्थं कितवो द्यूतदेवी मत्तः पानादिजन्मतो ग्रहाविष्टः अभिशस्तोऽभियुक्तो ब्रह्महत्यादिनारं-
गावतारी चारणः पाखंडिनो निर्ग्रंथप्रभृतयः कूटकृत्कपटलेख्यादिकारी विकले-
न्द्रियः श्रोत्रादिरहितः पतितो ब्रह्महादिः आप्तः सुहृत् अर्थसंबंधी विप्रतिपद्यमाना

र्थसंबंध्योऽसौ निगमभवति परस्तस्तु यथा कामेन भवतीत्यर्थः जातिमनतिक्रम्य यथा जातिजात-
योर्मूर्द्धावसिक्ताद्याः अनुलोमजाश्च तत्र मूर्द्धावसिक्तानां मूर्द्धावसिक्ताः साक्षिणो भवंति
एवमंबष्ठादिष्वपि द्रष्टव्यं वर्णमनतिक्रम्य यथावर्णं ब्राह्मणादयः तत्र ब्राह्मणानां ब्राह्म-
णा एवोक्तलक्षणयुक्ताः संख्याकाः साक्षिणो भवंति एवं क्षत्रियादिष्वपि द्रष्टव्यं तथा स्त्रीणां
साक्ष्यं स्त्रिय एव कुर्युः यथाह मनुः स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति सजातिसवर्णासंभवे सर्वेषु मू-
र्द्धावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्द्धावसिक्तादिषु ब्राह्मणादिषु च यथासंभवं साक्षिणो
भवंति उक्तलक्षणानां साक्षिणामसंभवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रति-
पादनार्थमसाक्षिणो वक्तव्यास्ते च पंचविधा नारदेन दर्शिताः असाक्ष्यपि हि शास्त्रेषु
दृष्टः पंचविधो बुधैः वचनाद्दोषतो भेदात्स्वयमुक्तेर्मृतान्तर इति केपुनर्वचनादसाक्षि-
ण इत्यत आह श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः असाक्षिणस्ते वचनान्ना-
त्र हेतुरुदाहृत इति तापसा वानप्रस्थाः आदिशब्देन पित्रा विवदमानादीनां ग्र-
हणं यथाह शंखः पित्रा विवदमानगुरुकुलवासिपरिव्राजकवानप्रस्थनिर्ग्रंथा
असाक्षिण इति दोषादसाक्षिणो दर्शिताः स्तेनाः साहसिकाश्चंडाः कितवा वंचका-
स्तथा असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यत इति चंडाः कोपनाः कितवाः द्यूत

वचनात्तु वक्ष्यमाणं श्रावयेत् तत्रापि कात्यायनेन विशेषो दर्शितः सभान्तः साक्षिणः
सर्वानर्थिप्रत्यर्थिसन्निधौ प्राड्विवाको नुयुंजीत विधिनानेन सांत्वयन् देवब्राह्मण
सान्निध्ये साक्ष्यं पृच्छेद्वै द्विजान् उदङ्मुखान् प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुची
न् आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशं समस्तान् विदिताचारान् विज्ञा
तार्थान् पृथक् पृथगिति तथा ब्राह्मणादिषु आवर्णेन मनुना नियमो दर्शितः स
त्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरि
ति ब्राह्मणं ब्रूयाद् ब्रुवतः सत्यं तेन शपतीति शापयेत् क्षत्रियं वाहनायुधानि त
व विफलानीति गोबीजकांचनानि तव विफलानि भविष्यंतीति वैश्य शूद्रमन्यथा
ब्रुवतस्तव सर्वाणि पातकानि भविष्यंतीति शापयेत् अत्र चापवादस्तेनैव दर्शि
तः गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् प्रेष्यान्वार्धुषिकांश्चैव विप्रां
श्शूद्रवदाचरेदिति विप्रग्रहणं क्षत्रवैश्योपलक्षणार्थं कुशीलवा गायकाः
प्रतिवादिना साक्षिदूषणे दत्ते प्रत्यर्थ्योप्यदूषणेषु चापन्यादिषु तथैव निर्णयः अ
प्रयोगेषु तद्वचनाल्लोकतश्च निर्णयो न साक्ष्यंतरेणेति नानवस्था यदि साक्षिदो
षमुद्भाव्य साधयितुं न शक्नोति प्रतिवादी तदासौ सारानुसारेण दंड्यः अथद

रणां भेदात्तत्साक्षिणं स्वयमुक्तेः स्तेनान्तरस्य च ग्रहणं एते स्त्रीबालादयः साक्षिणो न भवंति
अवराः साक्षिणो द्रोपाद्यस्यापवादमाह उभयानुमतः साक्षी भवत्येकोपि धर्मवित्
ज्ञानपूर्वकं नित्यनैमित्तिकधर्मानुष्ठायी धर्मवित् स एकोप्युभयानुमतश्चेत्साक्षी
भवत्यपि शब्दात् द्वावपि यद्यपि श्रौतस्मार्तक्रियापरा इति अवराणामपि धर्मवित्त्वं
समानं तथापि तेषामुभयानुमत्यभावेपि साक्षित्वं भवत्येकस्याद्वयोर्वोभयानुमत्यैव सा
क्षित्वं भवत्येकस्याद्वयोर्वा न यानुमत्यैव साक्षित्वं भवतीत्यर्थः चशब्दावरग्रहणं तपस्वि
नो दानशीलाद्यस्यापवादमाह सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे संग्रहणा
दीनि वक्ष्यमाणलक्षणानि तेषु सर्वे वचननिषिद्धास्तपःप्रभृतिगुणरहिताश्च साक्षि
णो भवंति दोषाद्दासाक्षिणो भेदाद्दसाक्षिणः स्वयमुक्तेश्चात्रापि साक्षिणो न भवंति सत्यमन
वादिभिर्हेतोरत्रापि विद्यमानत्वात् मनुष्यमारणं चौर्यं परदाराभिमर्शनं पारुष्यमुभयं
चेति साहसं स्याच्चतुर्विधमिति वचनाद्यद्यपि स्त्रीसंग्रहणचौर्यपारुष्याणां साहसत्वं
तथापि तेषां स्वबलावष्टंभेन जनसमक्षं क्रियमाणानां तु संग्रहणादिशब्दवाच्यत्वमिति
तेषां साहसात्पृथगुपादानं साक्षिश्रावणमाह साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगा
न् अर्थिप्रत्यर्थिसन्निधौ साक्षिणः समवेतान्नासमवेतान् पृथक् पृथक् ब्रूयुरिति गोत्तमव

फलप्राप्तेश्चानृतवदनमात्रेणानुपपत्तेः साक्षिसंज्ञा सार्थमिदमुच्यते यथाह नारदः पुराणैः
धर्मवचनैः सत्यमाहात्म्यकीर्तनैः अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमानिति यदा तूत्त्रा
सिताः साक्षिणः कथंचिन्न ब्रूयुस्तदा किं कर्तव्यमित्यत आह अब्रुवन्हि नरः साक्ष्यमृणं सद
शबंधकं राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशके ऽहनि यः साक्ष्यमंगीकृत्याहूतः सन्
कथंचिन्न वदति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः सदशबंधकं दशमांशसहितं
दशमांशस्तु राज्ञो भवति राज्ञा धमर्णिको दाप्यः साक्षिता दशकं धनमित्युक्तत्वात् एतच्च
षट्चत्वारिंशके ऽहनि प्राप्ते वेदितव्यं ततो ऽर्वाग्वदन्न दाप्यः इदं चाव्याध्याद्युपद्रवरहित
स्य यथाह मनुः त्रिपक्षाद् ब्रुवन्साक्ष्यमृणादिषु नरो ऽगदः तदृणं प्राप्नुयात्सर्वं दशबंधं च सर्व
शः इति अगद इति राजदैवोपप्लवविरहोपलक्षणं यस्तु जानन्नपि साक्ष्यमेव नांगी
करोति द्वेषात्तं प्रत्याह न ददाति हि यः साक्ष्यं जानन्नपि नराधमः स कूटसाक्षिणां पा
पैस्तुल्यो दंडेन चैव हि यः पुनर्नराधमो विद्यते पन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न ददा
ति नांगीकरोति स कूटसाक्षिणां तुल्यः पापैः फलतो दंडेन च कूटसाक्षिणां च दंडं वक्ष्यति
कूटसाक्षिणश्च दंडयित्वा पुनर्व्यवहारः प्रवर्तनीयः कृते ऽपि कौटसाक्ष्ये विदिते निव
र्तनीयः यथाह मनुः यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत् तत्कार्यं निवर्तेत
कृतं वाप्यकृतं भवेदिति साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह द्वैधे बहूनां

मि.
व्य.
४१

साधयति तद्वचनं साक्षिणः यथाह असाधयन्दमं दाप्यो द्रवणं साक्षिणां स्फुटं मा
विते साक्षिणो वर्ज्याः साक्षिधर्मनिराकृता इति उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेष्वर्थी य
दा क्रियांतरनिरपेक्षस्तदा पराजितो भवति जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्म
णा यदि वादी निराकांक्षः साक्षिसभ्येष्ववस्थितः इति स्मरणात् साकांक्षस्य क्रियांतर
मवसरं वेत्तेत्यभिप्रायः कथं श्रावयेदित्यत आह ये पातककृतां लोका महापातकि
नां तथा अग्निदानां च ये लोका ये च स्त्रीबालघातिनां स तान्सर्वानवाप्नोति यः साक्ष्य
मनृतं वदेत् सुकृतं यत्त्वया किंचिज्जन्मांतरशतैः कृतं तत्सर्वं तस्य जानीहि
यं पराजयसे मृषा पातकोपपातकमहापातककारिणामग्निदानां स्त्रीबालघा
तिनां च ये लोकास्तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदति तथा जन्मांतरश
तैर्यत्सुकृतं कृतं तत्सर्वं तस्य भवति यस्त्वनृतवदनेन पराजितो भवतीति श्रा
वयेदिति संबंधः एतच्च शूद्रविषये द्रष्टव्यं शूद्रं सर्वैस्तु पातकैरिति शूद्रैः सर्वपा
तकश्रावणस्य विहितत्वात् गोरक्षकादिद्विजातिविषये च गोरक्षकान्वाणिज
कानित्युक्तत्वात् अस्मानेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादि ४१

तमाः द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः पूर्वोक्तलक्षणैः साक्षिभिस्सादेवस्वाभिप्रा
ये प्रतिज्ञातार्थवैपरीत्येनाभिहिते यद्यन्ये पूर्वेभ्यो गुणवत्तमा द्विगुणा वा अन्यथा प्रतिज्ञा
तार्थानुगुण्येन साक्ष्यं ब्रूयुस्तदा पूर्वे साक्षिणः कूटाभिध्यावादिनो भवेयुः ननु तदनुप
पन्नं अर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः प्रमाणभूतैः साक्षिभिर्निर्णीते प्रमाणान्त
रान्वेषणे अनवस्थादोषप्रसंगात् निर्णीते व्यवहारे तु प्रमाणमफलं भवेत् लिखितं सा
क्षिणो वापि पूर्वमावेदितं न चेत् यथापक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः निर्णीते
व्यवहाराणां प्रमाणमफलं तथेति नारदवचनाच्चोच्यते यदार्थी प्रतिज्ञातार्थस्यांतरा
त्मना द्वितीयेनानाविष्कृतदोषाणामपि साक्षिणां च नमर्थविसंवादित्वेन प्रमाणमन्य
मानः साक्षिव्यभिरोधं कल्पयति तदा प्रमाणान्तरान्वेषणं केन वार्यते उक्तं च यस्य च दुष्टं
करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीन इति यथा च दुरादिकरणदोषान व्यवसा
येष्वर्थविसंवादात्तज्ज्ञानितस्य ज्ञानस्याप्रामाण्येन कारणदोषकल्पना तथेहापि साक्षि
वैशिष्ट्ये तिरेकेण वाक्यपरीक्षोपदेशाच्च साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षये
दिति कात्यायनेनाप्युक्तं यदा शुद्धा क्रियान्याया तदा तद्वाक्यशोधनं शुद्धाच्च वाक्याद्यः
शुद्धः स शुद्धोर्थ इति स्थितिरिति क्रियासाक्षिलक्षणनार्थसंबंधिनो नाम इति न्याय
यादाद्यं शुद्धा तदा तद्वाक्यशोधने साक्षिवाक्यशो[illegible] वाक्यशुद्धिश्च स त्या

मि॰
व्य॰
४२

वचनं समेषु गुणिनां तथा [illegible]
प्रतिपत्तौ बहूनां वचनं ग्राह्यं समेषु समसंख्येषु द्वैधे ये गुणिनस्तेषां वचनं भूयसां यदा
न पुनर्गुणिनां विप्रतिपत्तिस्तदा ये गुणवत्तमाः क्रताध्ययनतदर्थानुष्ठानधनपुत्रादि
गुणसम्पन्नास्तेषां वचनं ग्राह्यं यत्र तु गुणिनः कतिपये तत्र तु इतरे बहवस्तत्रापि गुणिनामेक
वचनं ग्राह्यं उभयानुमतः साक्षी भवत्येकोपि धर्मविदिति निर्णीतिश्रयस्य मुख्यत्वान्न प
तु भेदाद साक्षिण इत्युक्तं तत्सर्वं साक्ष्येनागत्यमानसाविशेषविषयं साक्षिभिश्च कथमुक्ते
जयः कथं वा पराजय इत्यत आह यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् अन्य
थावादिनो यस्य ध्रुवस्तस्य पराजयः यस्य वादिनः प्रतिज्ञां इत्थं जातिसंख्यादिविशिष्टं
साक्षिणः सत्यां वदंति सत्यमेवं जानीमो वयमिति स जयी भवेत् यस्य पुनर्वादिनः प्रतिज्ञा
मन्यथा वैपरीत्येन मिथ्येतदिति वदंति तस्य पराजयो ध्रुवो निश्चितः यत्र तु प्रतिज्ञा
तार्थस्य विस्मरणादिना भावाभावौ साक्षित्वेन प्रतिपादयंति तत्र प्रमाणांतरेण निर्णयः
कार्यः न च स्मृत्वा साक्षिणः पुनः पुनः प्रष्टव्याः स्वभावोक्तमेव वचनं ग्राह्यं यथाह स्वभावोक्तं
वचस्तेषां ग्राह्यं यद्दोषवर्जितं उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनरिति अन्यथा
दिनो यस्य ध्रुवस्तस्य पराजय इत्यस्यापवादमाह उक्तेपि साक्षिभिः साक्ष्ये यद्यन्ये गुणव ४२

वचनादितिपरिसमापनीयो व्यवहारः यत्र तु प्रत्यर्थिनः स्वपूर्वपक्षविसंवादित्वेन साक्षि
वचनस्याप्रामाण्यं मन्यमानस्य साक्षिषु दोषारोपणेनापरितोषस्तत्र प्रत्यर्थिनः स्व
स्य क्रियोपन्यासावसराभावात्सप्ताहावधिकदैवकराजिकव्यसनोद्भवेन साक्षिपरी
क्षणं कर्त्तव्यं तत्र च दोषावधारणे साक्षिणो विवादास्पदीभूतमृणं दाप्य सारानुसारे
ण दंडनीयाः अथ दोषानवधारणं तदा प्रत्यर्थिना तावत्तासंतोष्टव्यं यथाह मनुः
यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः रोगोग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः इति
एतच्च यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेदित्यस्यापरितुष्यत्प्रत्यर्थिविषये
पवादोयं द्रष्टव्यः केचित्तु उक्तेपि साक्षिभिः साक्ष्ये इत्येतद्वचनमर्थिना निर्दिष्टेषु साक्षिष्व
र्थ्यनुक्तस्य मभिहितं वस्तु यदि प्रत्यर्थी गुणवत्तमान् द्विगुणान्वान्यान्साक्षिणः प्र
पूर्वोक्तविपरीतं वादयति तदा पूर्ववादिनः साक्षिणः कूटा इति व्याचक्षते तदसत्
प्रत्यर्थिनः क्रियानुपपत्तेः तथाहि अर्थी नाम साध्यस्यार्थस्य निर्देष्टा तत्प्रतिपक्षस्तद
भाववादी प्रत्यर्थी तत्राभावसिद्धिः सापेक्षसिद्धित्वाद्भावस्य वाभावसिद्धिनिरपेक्षसिद्धित्वा
द्भावस्यैव साध्यत्वं युक्तं अभावस्य स्वरूपेण साध्यादिप्रमेयत्वाभावात् अतस्त्वर्थिन एव क्रि
यामुक्ता अपि चोत्तरानुसारेण सर्वत्रैव क्रियानियता स्मर्यते प्राङ्न्यायकारणोक्तौ तु प्रत्य
र्थी निर्दिशेत्क्रियां मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति न चैकस्मिन् व्यवहारे
द्वयोः क्रिया न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोरिति स्मरणात् तस्मात्प्रतिवा

ग्रं मुद्दोवगतोर्थः सम्बुद्धः स्तथान्ततः इति स्थितिनिष्ठिति क्रियासाक्षि... नन्वस्य मर्थिनाप्र

४२ यविदोषकरणदोषबाधकप्रत्ययाभावे सत्यवितथपारवार्थ इत्यर्थः
मालीकृतान्साक्षिणोतिक्रम्य कथं क्रियांतरं प्रमाणीक्रियते नैष दोषः यतः क्रियां बह
लवतीमुक्त्वा दुर्बलां यो बलवत्ते सजयो बध्यते सम्यैः पुनस्तानानुयात्क्रियामिति का
त्यायनेन जयावधारणोत्तरकालं क्रियांतरपरिग्रहनिषेधाज्जयावधारणस्याकृतक्रि
यांतरपरिग्रहो दर्शितः नारदेनापि निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेदित्यव
दत्ताज्जयावधारणोत्तरकालमेव प्रमाणांतरं निषिद्धं न प्रागपि तस्मादुक्तेपि साक्षि
भिः साक्ष्येऽपरितुष्यता क्रियांतरमंगीकर्त्तव्यमिति स्थितं एवं स्थिते यद्यभिहितवचने
भ्यः साक्षिभ्यो गुणवत्तमाद्विगुणा वा पूर्वनिर्दिष्टा असन्निहिताः साक्षिणः संति तदा तए
व प्रमाणीकर्त्तव्याः स्वभावेनैव यद्वयुस्तद्ग्राह्यं व्यावहारिकमित्यस्य सर्वव्यवहारशेष
त्वात् निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् लिखितं साक्षिणो वापि पूर्वं वेदितं न चे
दिति नारदवचनाच्च पूर्वनिर्दिष्टानामसंभवे तन्निर्दिष्टा अपि तथाविधाः साक्षिण एव
ग्राह्या न दिव्यं संभवे साक्षिणां प्राज्ञो दैवकीं वर्जयेत्क्रियामिति स्मरणात् तेषामसंभवे
दिव्यं प्रमाणीकर्त्तव्यं अतः परम परितुष्यता प्रत्यर्थिना न प्रमाणांतरमन्वेषणीयम ४३

स्तं दंडं द्विगुणं पृथक्पृथगेकैकशो दंडनीयाः ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वास्यो न दंड्यः ए ६
तच्च लोभादिकारणविशेषपरिज्ञानेऽभ्यासे च मनुनोक्तं लोभात्सहस्रं दंड्यः स्यान्मोहात्पूर्वं
तु साहसं भयाद्द्वौ मध्यमौ दंड्यौ मैत्र्यात्पूर्वं चतुर्गुणं कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं प
रं अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु इति तत्र लोभोऽर्थलिप्सा मोहो विपर्ययज्ञानं भ
यं संत्रासः मैत्री स्नेहातिशयः कामः स्त्रीव्यतिकराभिलाषः क्रोधोऽमर्षः अज्ञानमस्फुटज्ञा
नं बालिश्यं ज्ञानानुत्पादः सहस्रादिषु ताम्रिकाः पणा गृह्यन्ते तथा कौटसाक्ष्यं तु कुर्वाणांस्त्री
न्वर्णान्धार्मिको नृपः प्रवासयेद्दंडयित्वा ब्राह्मणं तु विवासयेदिति एतच्चाभ्यासविषयं
कुर्वाणानिति वर्त्तमाननिर्देशात् त्रीन्वर्णान्क्षत्रियादीन्पूर्वोक्तं दंडं दंडयित्वा प्रवासयेन्मा
रयेदर्थशास्त्रे प्रवासशब्दस्य मारणे प्रयोगाद्दस्य चार्थशास्त्ररूपत्वात् तत्रापि प्रवासनमो
ष्ठच्छेदनं जिह्वाच्छेदनं प्राणवियोजनं च कौटसाक्ष्यविषयानुसारेण द्रष्टव्यं ब्राह्मणं तु दंडयित्वा
विवासयेत्स्वराष्ट्रान्निष्कासयेत् यद्वा विवासयेत् वसनं वासः वाससो विगतो विवासः विवा
सं करोतीति णिचि कृते णाविष्ठवत्प्रातिपदिकस्येति टिलोपे रूपं नग्नीकुर्यादित्यर्थः
अथवा वसत्यस्मिन्निति वासो गृहं विवासयेद्भग्नगृहं कुर्यादिति यावदिति ब्राह्मणस्यापि
लोभादिकारणविशेषापरिज्ञानेऽनभ्यासे च तत्तत्प्रोक्तोऽर्थदंड एव अभ्यासे त्वर्थदंडो विवा
सनं च तत्रापि जातिद्रव्यानुबंधाद्यपेक्षया विवासनं नग्नीकरणं गृहभंगो देशान्निर्वासनं
चेति व्यवस्था द्रष्टव्या लोभादिकारणविशेषापरिज्ञानेऽनभ्यासे चाल्पविषये कौटसा

व्य.
४५

श्चितिक्षालाचार्दिनो मदीयमिदं दायादि प्राप्तं मदीयमिदमिति पूर्वापरकालविभागानाक
लितमेव वदतस्तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्या इत्याकांक्षायामाह द्वयो
र्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिण इति वच
नेन यः पूर्वं निवेदयति तस्य साक्षिणो ग्राह्या इति स्थिते तस्यापवादः उक्तोपि सा
क्षिभिः साध्य इति अत्र पूर्वोत्तरयोर्वादिनोः समसंख्येषु समसंख्येषु समगुणेषु
च साक्षिषु सत्सु पूर्ववादिनः साक्षिणः प्रष्टव्या यदा तूत्तरवादिनः साक्षिणो गुण
वत्तमा द्विगुणा वा तदा प्रतिवादिनः साक्षिणः प्रष्टव्याः एवं च नाभावस्य साध्यता
उभयोरपि भाववादित्वात् चतुर्विधोत्तरविलक्षणत्वाच्च प्रकृतोदाहरणे तह
क्रियाव्यवस्था एकस्मिन्व्यवहारे यथैकस्यार्थिनः क्रियाद्वयं परमते तथा वादि
प्रतिवादिनोः क्रियाद्वयेप्यविरोध इति तदप्याज्ञाध्यानानुमन्यते उक्तोपि साक्षिभिः
साध्य इत्यतः प्राह्वादर्थोत्थकरणद्वयस्यार्थस्यानवगमादित्यलं प्रसंगेन कूटसा
क्षिणो दर्शितास्तेषां दंडमाह पृथक्पृथग्दंडनीयाः कूटकृत्साक्षिणस्तथा वि
वादाद्द्विगुणं दंडं विवास्यो ब्राह्मणः स्मृतः यो धनदानादिना कूटसाक्षिणः करो
ति स कूटकृत्साक्षिणश्च ते तथा कूटसाक्षिविवादाद्द्विवादपराजये यो दंडस्तत्रोक्तः

४५

दंडदानासमर्थं विवासयेत् विवासनं च नग्नीकरणगृहभंगदेशान्निर्वासनलक्षणं वि
षयानुसारेण द्रष्टव्यं इतरेषां त्वष्टगुणद्रव्यदंडासंभवे स्वजात्युचितकर्मकरणनिगड
बंधनकारागृहप्रवेशादि द्रष्टव्यं एतच्च पूर्वस्मिन् श्लोकेप्यनुसर्तव्यं यदा सर्वे साक्षिणो निह्नु
वते न तदा सर्वे समानदोषाः यदा तु साक्ष्यमुक्त्वा पुनरन्यथा वदंति तदानुबंधाद्यपेक्ष
या दंड्याः यथाह कात्यायनः उक्त्वान्यथा ब्रुवाणाश्च दंड्याः स्युर्वाक्छलान्विता इति न चान्ये
नोक्ताः साक्षिणोन्येन रहस्यनुसर्तव्याः यथाह नारदः न परेण समुद्दिष्टमुपेयात्साक्षिणं
रहः भेदयेन्नैव चान्येन हीयेतैवं समाचरन्निति साक्षिणामवचनमसत्यवचनं च सर्वत्र
प्रतिषिद्धं तदपवादार्थमाह वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् यत्र वर्णिनां
शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधः संभाव्यते तत्र साक्ष्यनृतं वदेत् सत्यं न वदेत् अने
न च सत्यवचनप्रतिषेधेन साक्षिणः पूर्वप्रतिषिद्धमसत्यवचनमवचनं चाभ्यनुज्ञायते यत्र
दोषो सत्यवचने वर्णिनो वधो न तत्र वचनेन कस्यापि वधस्तत्रानृतवचनमभ्यनुज्ञाय
ते यत्र तु सत्यवचने र्थिप्रत्यर्थिनोरन्यतरस्य वधोऽसत्यवचने वान्यतरस्य वचस्तत्र तूष्णींभावो
ऽभ्यनुज्ञा राज्ञा यद्यनुमन्यते अथ राजा कथमप्यकथनेन मुंचति तदानेनादसाक्षित्वं कर्तव्यं
तस्याप्यसंभवे सत्यमेव वदितव्यं असत्यवचने वर्णिवधदोषोऽसत्यवचनदोषश्च सत्यवच
ने च वर्णिवधदोष एव तत्र च यथाशास्त्रं प्रायश्चित्तं कर्तव्यं नह्यसत्यवचने तूष्णींभावे च शास्त्राभ्य
नुज्ञानात्प्रत्यवायाभावः स्यात् अत आह तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः तत्पावनायान

९३

[illegible]

व्य. ४५

वमन्नक्तं द्रष्टव्यं न च ब्राह्मणस्यार्थदंडो नास्तीति मंतव्यं अर्थदंडाभावे शारीरदंडे च नियमि
स्वल्पेप्यपराधे नग्नीकरणगृहभंगांककरणविप्रवासनं दंडाभावो वा प्रसज्येत चतुर्णाम
पि वर्णानां प्रायश्चित्तमकुर्वतां शारीरं धनसंयुक्तं दंडं धर्म्यं प्रकल्पयेदिति स्मरणाच्च तथा
सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रां बलाद्व्रजन्निति च स्मरणात् यत्तु शंखवचनं त्रयाणां वर्णा
नां धनापहारवधबंधनयत्क्रिया विवासनांककरणं ब्राह्मणस्येति तत्र धनापहारः
सर्वस्वापहारो विवक्षितो वधसाहचर्यात् शारीरस्त्ववरोधादिर्जीवितांतः प्रकीर्तितः का
किण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैव चेति वधसर्वस्वहरणयोः सहपाठात् यदप्युक्तं राष्ट्रा
देनं बहिष्कुर्यात्समग्रधनमक्षतमिति तत्प्रथमकृतसाहसविषयं न सर्वविषयं शारीरस्तु
ब्राह्मणस्य न कदाचिद्भवति न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितमिति सामान्येन
मनुस्मरणात् आह तथा न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि तस्मादस्य वधं राजा मनसा
पि न चिंतयेदिति च अपि च यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः स दाप्योऽष्टगु
णं दंडं ब्राह्मणं तु विवासयेत् यस्तु साक्षित्वमंगीकृत्यान्यैः साक्षिभिः सह साक्ष्यं श्रावितः
सन्निगदकाले तमोवृतो रागाद्याक्रांतचित्तः साक्ष्यमन्येभ्यः साक्षिभ्यो निह्नुते माहमत्र
साक्षी भवामीति स विवादपराजये यो दंडस्तं दंडमष्टगुणं दाप्यः ब्राह्मणं पुनरष्टगुणद्रव्यं ४५

९२

९५

मनयोश्च देशाचारानुसारेण प्रामाण्यं यथाह नारदः लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं
तथा असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति तत्रान्यकृतमाह यः कश्चि
दर्थो निष्णातः स्वरुच्या तु परस्परं लेख्यं तु साक्षिमत्कार्यं तस्मिन् धनिकपू
र्वकं धनिकाधमर्णयोर्यो हिरण्यादिः परस्परं स्वरुच्या इयता कालेनैतावद्देयमिय
ती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितस्तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ व
स्तुतत्वनिर्णयार्थं लेख्यं साक्षिमदुक्तलक्षणसाक्षियुक्तं धनिकपूर्वकं धनिकः पूर्वो
यस्मिंस्तद्धनिकपूर्वकं धनिकनामलेखनपूर्वमिति यावत् तत्कार्यं कर्तव्यमुक्तल
क्षणैः साक्षिणो वा कर्तृत्वाः कर्तृत्वं तु यत्कृतं कार्यं सिद्ध्यर्थं तस्य साक्षिणः प्रवर्तते वि
वादेषु स्वकृतं वाथ लेख्यमिति स्मरणान् अपि तु समामासतदर्धाहर्नामजाति
स्वगोत्रकैः सब्रह्मचारिकात्मीयपितृनामादिचिह्नितं समा संवत्सरः मासश्चैत्रादि
स्तदर्द्धं पक्षः शुक्लः कृष्णो वा अहस्तिथिः प्रतिपदादिर्नाम धनिकर्णयोः जातिर्ब्रा
ह्मणत्वादिः स्वगोत्रं वासिष्ठादिगोत्रमेतैः समादिभिः चिह्नितं तथा सब्रह्मचारिकं
बह्वृचादिः शाखाप्रयुक्तं गुणनाम बह्वृचः कठ इति आत्मीयपितृनाम धनिक
र्णिकपितृनाम आदिग्रहणात् द्रव्यजातसंख्याचारादेर्ग्रहणं एतैश्च चिह्नितं ले
ख्यं कार्यमिति गतेन संबंधः किंच समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् मतं

व्य॰ ४६ ९६

स्वतीदेवता अस्येति सारस्वतः अनवरतं वितानं तरुणमपकृदने चरुशब्दः प्रसिद्धः इहाप
मभिसंधिः साक्षिणामनृतवचनमवचनं च यन्निषिद्धं तदिहाभ्यनुज्ञातं यत्तु नानृतं वदेद
ब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषीति च सामान्येनानृतवचनमवचनं च निषिद्धं तद
तिक्रमनिमित्तमिदं प्रायश्चित्तं न चैतद्वाच्यं साक्षिणामनृतवचनावचनाभ्यनुज्ञानेऽपि साधा
रणानृतवचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्य तादवस्थ्यादभ्यनुज्ञावचनम
नर्थकमिति यतः साधारणानृतवचनावचनयोर्भूयान्प्रत्यवायः साधारणानृतवचनावचन
योरल्पीयानित्यर्थवदभ्यनुज्ञावचनं यद्यपि भूयसः प्रत्यवायस्य निवृत्त्यानुषंगिकस्या
ल्पीयसः प्रत्यवायस्य निवृत्तिरत्र तथापीहाभ्यनुज्ञावचनात्प्रायश्चित्तविधानाच्च भूय
सो निवृत्त्याल्पीयानप्यानुषंगिकोऽपि प्रत्यवायो न निवर्तत इति गम्यते एतदेवान्यत्र प्र
श्नेषु वर्णिवधाशंकायां पथ्यादीनामनृतवचनाभ्यनुज्ञानं वेदितव्यं न च तत्र प्रायश्चित्त
मस्ति प्रतिषेधोत्तरणाभावात् निमित्तान्तरेण कालान्तरे पर्यन्तत्वावगमेऽपि साक्षिणामन्येषां
च दंडाभावोऽस्मादेव वचनादवगम्यत इति इति साक्षिप्रकरणं भुक्तिसाक्षिणौ निरूपितौ
साम्प्रतं लेख्यं निरूप्यते तत्र लेख्यं द्विविधं शासनं जानपदं चेति शासनं निरूपितं जा
नपदमभिधीयते तच्च द्विविधं स्वहस्तकृतमन्यकृतं चेति तत्र स्वहस्तकृतमसाक्षिक

नारदोप्याह मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्। तदप्रमाणं लिखितं भ
योपाधिकृतं तथेति॥ तच्चैतत्स्वहस्तकृतं परकृतं च लेख्यं देशाचारानुसारेण स
बंध व्यवहारयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमि
त्येतावन्न पुनः साधुशब्दैरेव प्रतिनियतदेशभाषयापि लेखनीयं यथाह नारदः
देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणं तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमा
क्षरमिति विधानं विधिराधेर्विधिराधीकरणं तस्य लक्षणं संगोप्याधिर्भोग्याधिः
कालेकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणं अर्थानां क्रमः क्र
मश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमा
क्षरं तदेवंभूतं लेख्यं प्रमाणं राजशासनवन्न साधुशब्दनियमादेरभिप्रायः लेख्यप्र
संगेन लेख्यारूढमृणं त्रिभिरेव देयमित्याह ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरे
व तु यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्तृतत्पुत्रैस्त्रिभिरेव
देयं न चतुर्थादिभिरिति नियम्यते ननु पुत्रपौत्रैर्ऋणं देयमित्यविशेषतः स्मरणात्त्रिभि
रेव देयमिति नियतमेव वाढमस्यैवोत्सर्गस्य पत्रारूढर्णविषये स्मृत्यंतरप्रभवामु
पवादशंकामपनेतुमिदं वचनमारब्धं तथाहि यत्तु ऋणमभिधाय कात्यायनेना
भिहितं एवं कालमतिक्रांतं पितॄणां दाप्यते ऋणमिति इदं पत्रारूढमृणमतिक्रांत

[illegible]
थैसमाप्ते लिखिते ऋणे अधमर्णेनामात्मीयं स्वहस्तेनास्मिंल्लेख्ये यदुपरि लिखितं त
न्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत्तत्रैव लिखेत् तथा साक्षिणश्च स्वहस्ते
न पितृनामकपूर्वकं अथाह मनुकः साक्षी लिखेयुरिति ते समाः तस्मिन् लेख्ये ये
साक्षिणो लिखितास्ते आत्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थेऽहममुको देवदत्तः
साक्षीति स्वहस्तेनैकैकशो लिखेयुस्ते च समाः संख्यातो गुणतश्चैकतर्याः यद्यधम
र्णः साक्षी वा लिपिज्ञो न भवेत्तदाधमर्णोन्येन साक्षी वा साक्ष्यंतरेण सर्वसाक्षिसन्नि
धौ स्वमतं लेखयेत् यथाह नारदः अलिपिज्ञ ऋणी यः स्यात्स्वमतं तु स लेखयेत्
साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः इति अपि च उभयाभ्यर्थितेनैतन्मया
ह्यमुकसूनुना लिखितं ह्यमुकेनेति लेखकोंततो लिखेत् ततो लेखको धनि
कर्णिकाभ्याममुभाभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुनैतल्लेख्यं लि
खितमित्यंते लिखेत् संप्रति स्वकृतं लेख्यमाह विनापि साक्षिभिर्लेख्यं स्वहस्त
लिखितं तु यत् तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते यल्लेख्यं स्वहस्तेन लि
खितमधमर्णेन तत्साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः बलोपधिकृतादृते बले
न बलात्कारेणोपधिना लोभक्रोधभयमोहादिलक्षणेन यत्कृतं तस्मादृते विना

नतो

नेद्विधान्नतेसतिभवति एतच्चार्थिप्रत्यर्थिनोः परस्परानुमत्यां विमत्यां तु व्यवहार [illegible]
देशांतरस्थपत्रानयनाधायेन्तया कालोदातव्यः दुर्गदेशावस्थितेनष्टेचैपत्रेसाक्षिभिरेव
व्यवहारनिर्णयः कार्यः यथाहनारदः लेख्ये देशांतरन्यस्ते शीर्णे दुर्लिखिते हृते सतस्त
त्कालकरणमसतो द्रष्टृदर्शनमिति सतो विद्यमानस्य पत्रस्य देशांतरस्थस्यानयनाय
कालकरणं कालावधिर्दातव्यः असतः पुनरविद्यमानस्य पूर्वे ये द्रष्टारः साक्षिणः
स्तैर्दर्शनं व्यवहारपरिसमापनं कार्यं यदा तु साक्षिणो न संति तदा दिव्येन निर्णयः अ
लेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेदिति स्मरणात् एतच्च जानपदं व्यवस्था
पत्रं राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति इयांस्तु विशेषः राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचि
ह्नितं तथा राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमदिति तथान्यदपि राजकीयं जयपत्रकं वृद्धव
शिष्ठेनोक्तं यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियं सावधारणकं चैव जयपत्रकमिष्यते प्राड्विवा
काद्रिहस्तांकं मुद्रितं राजमुद्रया सिद्धेर्थे वादिने दद्याज्जयिने जयपत्रकमिति तथा सभा
सदोपि मतं मे मुकपुत्रस्येति स्वहस्तं दद्युः सभासदश्च ये तत्र स्मृतिशास्त्रविदस्तथा
यथा लेख्यविधौ तद्वत् स्वहस्तं दद्युरेव चेति स्मरणात् सभासदां च परस्परानुमति
व्यतिरेकेणान व्यवहारो निःशल्यो भवति यथाहनारदः यत्र सभ्यो जनः सर्वः सा
ध्वेतदिति मन्यते स निःशल्यो विवादः स्यात् सशल्यस्त्वन्यथा भवेदिति एतच्च तु
ष्पादव्यवहार एव साधयेत्साध्यमर्थं यच्चतुष्पादान्वितं यत्र राजमुद्रांकितं ...

व्य. ४८

त्मितिवचनाच्चतुर्थपाददर्शनात् इति प्रतीयते तथाहारीतेनापि लेख्यं यस्य भवेद्धस्ते ला
भं तस्य विनिर्दिशेदिति अत्रापि यस्य हस्ते पत्रमस्ति तस्यार्थलाभ इति सामान्येन चतुर्था
दिभ्यो पूरणलाभोस्तीति प्रतीयते अतएव तदापि कानिचत्स्वार्थमेतद्वचनमिति युक्तं वच
नद्वयं च योगीश्वरवचनानुसारेण योजनीयं अस्यापवादमाह आधिस्तु भुज्यते ताव
द्यावत्तन्न प्रदीयते सबंधकेपि पत्रारूढकरणे साक्षिभिरेव देयमिति नियमाहणापाकरण
नधिकारेणाहरणेप्यनाधिकार आधानादिदमुच्यते यावच्चतुर्थेन पंचमेन वा करणेन
दीयते तावदेवाधिर्भुज्यत इति वदता सबंधकरणाकरणे चतुर्थादेरप्यधिकारो दर्शितः
नन्वेवदप्युक्तमेव फलभोगेन न नश्यतीति सत्यं तदप्येतस्मिन्नस्त्यपवादवचनेषु
हृषवत्रयविषयमेव स्यादिति सर्वमनवद्यं प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति
देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा भिन्ने दग्धे छिन्ने लेख्यमन्यत्कारये
त् व्यवहाराक्रमे पत्रे पत्रांतरं कुर्यादिति विधीयते व्यवहाराक्रमत्वं वास्तंत व्यवहि
तदेशांतरस्थे पत्रे दुर्लेख्ये दुष्टानि संदिह्यमानान्यवाचकानि वा लेख्यानि लिप्य
क्षराणि पदानि वा यस्मिंस्तद्दुर्लेख्यं तस्मिन्दुर्लेख्ये नष्टे कालवशेन उन्मृष्टे मषीदौ
र्बल्यादिना मृदितं लिप्यक्षरे हृते तस्करादिना भिन्ने विदलिते दग्धे अग्निना छि

त्तेऽरुणोऽचरात्तथैवाहे यदा कृत्स्नमेवर्णं दातुमसमर्थस्तदा किं कर्तव्यमित्यत आह
लेख्यस्य पृष्ठेऽभिलिखेद्दत्वा दत्वार्णिको धनं धनी चोपगतं दद्यात्स्वहस्तपरिचिह्नितं
यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्वा दत्वा पूर्वकृतस्य ले
ख्यस्य पृष्ठेऽभिलिखेदेतावन्मया दत्तमिति उत्तमर्णो वा उपगतं प्राप्तं धनं स्वस्यैव ले
ख्यस्य पृष्ठे दद्यादभिलिखेदेतावन्मया लब्धमिति कथं स्वहस्तपरिचिह्नितं स्वलि
खिताक्षरचिह्नितं यद्वोपगतं पूर्वे प्रापत्रं स्वहस्तलिखितचिह्नितमधमर्णायोत्तमर्णो
दद्यात् ऋणोऽनुकृत्स्ने दत्ते लेख्यं किं कर्तव्यमित्यत आह दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै वा
न्यत्तु कारयेत् क्रमेण सकृदेव वा कृत्स्नमृणं दत्वा पूर्वकृतं लेख्यं पाटयेत् यदा
तु कृत्स्नं दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णस्त्वनिवृत्त्यर्थमन्यल्ले
ख्यं कारयेदुत्तमर्णमधमर्णः पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादि
त्यर्थः ससाक्षिके ऋणे कृत्स्ने दत्ते किं कर्तव्यमित्यत आह ससाक्षिमृणमेव त्य
द्धत्तद्दातव्यं ससाक्षिकं यत्तु ससाक्षिकमृणं तत्साक्षिसमक्षमेव दद्यात् इति
लेख्यप्रकरणं लिखितसाक्षिभुक्तिरूपं त्रिविधं मानुषं प्रमाणमुक्तमथाव
सरप्राप्तं दिव्यप्रमाणमभिधास्यन् तुलाग्न्याप इत्यादिभिरार्द्धैः पंचभिश्लोकैर्दिव्यमा

व्य०
४९

...चहीनः पंचविधः स्मृत इति तत्र...
तानिरत्तरः अहूतव्यपलापी च हीनः ... आद्याय विधिसिद्ध्यर्थमिति विशे
तुहीनपत्रमेव तच्च कालांतरे दंडं वा प्रत्यर्थं जयपत्रं तु ... लिखितादिभिः
षः लेख्यसंदेहे निर्णयनिमित्तान्याह संदिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः
युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः शुद्धमशुद्धं चेति संदिग्धस्य लेख्यस्य शुद्धिः
स्वहस्तलिखितादिभिः स्यात् स्वहस्तेन लिखितं यल्लेख्यांतरं तेन शुद्धिर्यदि सदृशा
न्यक्षराणि भवंति तदशुद्धिः स्यादित्यर्थः आदिशब्दात्साक्षिलेखकस्वहस्तलिखितं
तरसंवादाच्छुद्धिरिति युक्तयाप्राप्तिर्युक्तिप्राप्तिः देशकालपुरुषाणां द्रव्येण सह संबं
धः प्राप्तिः अस्मिन्देशेऽस्मिन्काले अस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिः प्राप्तिः क्रिया तत्साक्षि
परस्परं ... अर्थिप्रत्यर्थिनोः पूर्वमपि परस्पर
मुपन्यासः चिह्नं असाधारणं श्रीकरादि संबंधः आगमोऽस्येतावतोऽर्थस्य संभावितः प्राप्त्युपायः एत
द्विश्वासेन दानगृहणादि संबंधः यदा तु लेख्यसंदेहे निर्ण
एवहेतवः एभिर्हेतुभिः संदिग्धलेख्यशुद्धिः स्यादित्यन्वयः यदा तु लेख्यसंदेहे निर्ण
योन जायते तदा साक्षिभिर्निर्णयः यथाह कात्यायनः दूषिते पत्रके वादी तदारूढांस्तु नि
र्दिशेत् इति साक्षिसंभवविषयं तु दहारीतिर्वचनं नमयेत क्लृतं
एवं शोधिते पत्रे कृते मे तेन कारिते अधरीकृत्य तत्समर्थे दिव्येन निर्णय इति
पत्रे कृटमेतेन कारितं

100
101
४८

103

भियोक्त्रभियुक्तयोः परस्परसंप्रतिपत्त्यान्यतरोऽभियुक्तोऽभियोक्ता वा दिव्यं कुर्यादितरोऽभियु
क्तोऽभियोक्ता वा शिरः शारीरमर्थदंडं वा वर्त्तयेदेनं कुर्यात् अयमभिसंधिः न मानुषप्र
माणाबहिर्दिव्यं प्रमाणं भावैकगोचरं अपि तु भावाभावाविशेषेण गोचरयति अत एव
मिथ्योत्तरे प्रत्यवस्कंदे प्राङ्न्याये चार्थिप्रत्यर्थिनोरन्यतरस्येच्छया दिव्यं भवतीति अल्पा
भियोगे महाभियोगे शंकासावष्टंभयोरप्यविशेषेण कोशो भवतीत्युक्तं तुलादीनि विष
वांतानि तु महाभियोगेष्वेव सावष्टंभेष्वेवेति च नियमो दर्शितस्तत्र सावष्टंभाभियोगे
ष्वेवेत्यस्यापवादमाह विनापि शीर्षकात्कुर्यान्नृपद्रोहेऽथ पातके राजद्रोहाभिशं
कायां ब्रह्महत्यादिकपातकशंकायां च शिरःस्थायिना विनापि तुलादीनि कुर्यात् महा
चौर्याभिशंकायां यथाह राजभिः शंकितानां च निर्दिष्टानां च दस्युभिः आत्मशुद्धिपरा
णां च दिव्यं देयं शिरो विनेति तंडुलाः पुनरत्र चौर्यशंकायामेव चौर्ये तु तंडुला देया ना
न्यत्रेति विनिश्चय इति पितामहवचनात् तप्तमाषस्तु महाचौर्यशंकायां महाचौर्ये
भियुक्तानां तप्तमाषो विधीयत इति स्मरणात् अन्ये पुनः शपथा अल्पार्थविषयाः स
त्यवाहनशस्त्राणि गोबीजकनकानि च देवतापितृपादांश्च दत्तानि सुकृतानि च स्पृ
शेच्छिरांसि पुत्राणां दाराणां सुहृदां तथा अभियोगेषु सर्वेषु कोशपानमथापि वा इत्ये
ते शपथाः प्रोक्ता मनुना स्वल्पकारणे इति नारदादिस्मरणात् यद्यपि तु मानुषप्रमा

व्य० ५०

102

तुलादीनि कोशांतानि पंच दिव्यानीह धर्मशास्त्रे विशुद्धये संदिग्धस्यार्थस्य सदेहने
वर्त्तयेद्राजन्यानि न त्वन्यान्यपि तंडुलादीनि दिव्यानि संति घटोऽग्निरुदकं चैव वि
षं कोशस्तथैव च तंडुलाश्चैव दिव्यानि सप्तमस्तप्तमाषक इति पितामहस्मरणात् ततः
कथमेतावंत्येवेत्यत आह महाभियोगेष्वेतानि एतानि महाभियोगेष्वेव नान्यत्रेति
नियम्यते न पुनरिमान्येव दिव्यानीति महत्त्वावधिं च वक्ष्यति नन्वल्पाभियोगेऽपि
कोशोऽस्त्येव कोशमल्पेऽपि दापयेदिति स्मरणात् सत्यं कोशस्य तुलादिषु पाठेन म
हाभियोगेष्वेवेति नियमार्थः किंतु सावष्टंभाभियोगेऽपि प्राप्त्यर्थः अन्यथा शंका
भियोग एव स्यात् अवष्टंभाभियुक्तानां घटादीनि विनिर्दिशेत् तंडुलांश्चैव
कोशं च शंकास्वेव न संशयः इति स्मरणात् महाभियोगेषु शंकितेषु सावष्टंभेषु
चाविशेषेणाप्राप्तावपवादमाह शीर्षकस्थेऽभियोक्तरि एतानि तुलादीन्यभि
योक्तरि शीर्षकस्थेऽभियुक्तस्य भवंति शीर्षकं शिरो व्यवहारस्य चतुर्थः पादो जय
पराजयलक्षणस्तेन च दंडो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तस्य युक्तदंडभामि
स्पर्शः ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमिति भावप्रतिज्ञावादिन एव कि
येति विवस्था दर्शिता तदपवादार्थमाह रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छिरः रुच्य

५०

घटो देयः क्षत्रियस्य हुताशनः वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेदिति यत्तु स्मा
सव्रतानां भग्नानां तपव्याधितपस्विनां स्त्रीणां च न भवेद्
दीनां दिव्याभावस्मरणं तदुच्छावान्यतरः कुर्यादिति विकल्पनिवृत्त्यर्थं एतदु
वेदितव्यं यदि धर्मस्त्वपेक्ष्यत इति अभियोक्तृत्वेऽभियोज्यानामेव दिव्यमेतेषामभियो
क्तं भवति अत एवं नाभियोगेषु स्त्र्यादीनामभियोगे तु विकल्प एव तत्रापि तुलैवेत्यनेन निय
म्यत्वेष्वभियोक्तृणामेव दिव्यं परस्पराभियोगे स्त्र्यादीनां तुलैवेति एतच्च वचनं सर्वदिव्यसा
म्यते तथा महापातकादिशंकाभियोगस्त्र्यादीनां सर्वदिव्यसमवधाने नियामकतयार्थवत्त्वं न च
धारणेषु मार्गशिरः चैत्र वैशाखेषु स्त्र्यादीनां सर्वदिव्यसमवधाने नियामकतयार्थवत् घटकोशादिभिस्ता
सर्वकालं स्त्रीणां तु तुलैवेति स्त्रीणां तु न विषं प्रोक्तं न चापि सलिलं स्मृतं घटकोशादिभिस्ता
सामं तत्तत्त्वं विचारयेदिति विषसलिलव्यतिरिक्त घटकोशाग्न्यादिभिः शुद्धिविधानात् ए
वं बालादिष्वपि योजनीयं तथा ब्राह्मणादीनामपि न सार्वकालिकस्तुलादिनियमः सर्वे
षामेव वर्णानां कोशशुद्धिर्विधीयते सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विनेति पिता
महस्मरणात् तस्माद्धारणे काले वह्न्यादिव्यसमवधाने तुलानियमार्थमेवेदं वचनं का
लान्तरे तु तत्कालविहितं सर्वेषां तथा हि वर्षास्वग्निरेव सर्वेषां हेमन्तशिशिरयोस्तु रुति
यादि त्रयाणामग्नि विषयोर्विकल्पः ब्राह्मणस्य त्वग्नित्वेन कदाचिद्विषं ब्राह्मणस्य विषं विनेह
द्वि
रेविषं चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च एते साधारणा मासा सादिदिव्यानामविरोधि
नः कोशस्तु सर्वदा देयस्तुला स्यात्सार्वकालिकीति कोशग्रहणं सर्वशपथानामुपलक्ष
णं तण्डुलानां पुनर्विशेषानभिधानात्सार्वकालिकत्वं प्रतिषेधमुखेनापि न शीते तोयशु
द्धिः स्यान्नोष्णकालेऽग्निशोधनं न प्रावृषि विषं दद्यात्प्रवाते न तुलां तथा नापराह्णे न
संध्यायां न मध्याह्ने कदाचनेति न शीते तोयशुद्धिः स्यादित्यत्र शीतशब्देन हेमन्तशिशि
रवर्षाणां ग्रहणं नोष्णकालेऽग्निशोधनमित्यत्रोष्णकालशब्देन ग्रीष्मशरदोः वि
धानत्वस्यापि पुनर्निषेधः अपराह्णादिः प्रयोजनं तु वक्ष्यते अधिकारव्यवस्थामाह तु
लास्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणां अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य च
स्त्रीमात्रं जातिवयोव्यवस्थाविशेषानादरेण बालः आषोडशाद्वृद्धोऽशीतिविशेषाना
दरेणाचवृद्धोऽशीतिकावरः अन्धो नेत्रविकलः पङ्गुः पादविकलः ब्राह्मणो जातिमात्रं रो
गी व्याधितः एतेषां शोधनार्थं तुलैवेति नियम्यते अग्निः फालस्तप्तमाषश्च क्षत्रिय
स्य जलमेव वैश्यस्य वा शब्दोऽवधारणे विषस्य यवाः सप्त परिमाणं सप्तैव शूद्रस्य शो
धनार्थं भवन्ति ब्राह्मणस्य तुलाविधाना शूद्रस्य यवाः सप्तविषस्यापि वेति विषविधाना
दग्निर्जलं चेति क्षत्रियवैश्यविषयमुक्तं एतदेव स्पष्टीकृतं पितामहेन ब्राह्मणस्य

शीतेस्तु विनाशे दैद्याद्व्रीहि नु हुताशनं पस्यानाशे जले देयं चत्वारिंशत्तिर्घटं त्रिंशद्दशवि
नाशे तु कोशपानं विधीयते पंचाद्यधिकस्य वा नाशे ततो र्द्धं द्वि तंडुलाः ततोर्द्धार्द्धविना
शे पि स्पृशेत्सुतादिमस्तकान् ततोर्द्धार्द्ध विनाशे तु लौकिक्यो ग्वक्रियाः स्मृताः एवं विचा
रयन् राजा धर्मार्थौ न हीयतइति ज्ञात्वा संख्या सुवर्णानामिस्त्र सुवर्णः शब्दः
षोडशमाषाः सुवर्ण इत्युक्तपरिमाणवचनः नाशशब्दश्चापहृतवचनः नासहस्रा
द्धरेदिस्यत्र तु नाष्कपणासहस्रं बोद्धव्यं ननु नृपद्रोहे पातके चैतानि दिव्यानुक्तानि
तत्कथं नासहस्राद्धरेत्फालमित्यत्र आह नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा न
पद्रोहेषु महापातकाभियोगे च सदा द्रव्यसंख्यामनपेक्ष्यै चैतानि दिव्यानि कुर्युरुपवासा
दिनासुचयः संतः तथा देशविशेषोपि नारदेनोक्तः सभाराजकुलद्वारे देवायतनचत्व
रे निधेयो निश्चलः पूज्यो धूपमाल्यानुलेपनैरिति निधेयो घटः व्यवस्था च कात्या
यनेनोक्ता इंद्रस्थानेभिशस्तानां महापातकिनां नृणां नृपद्रोहे प्रवृत्तानां राजद्वारे
प्रयोजयेत् प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे अतोन्येषु तु कार्येषु सभामध्ये विदु
र्बुधाः अस्पृश्याधमदासानां म्लेच्छानां पापकारिणां प्रातिलोम्यप्रसूतानां निश्चयो

स्या°
५८

त्यामगन्यादिकालेपि साधारणं तुलाद्येव दिव्यं भवति तथा तोयमग्निर्विषं चैव दातव्यं
बलिनां नृणामिति वचनात् दुर्बलानामपि सर्वथा यदि विधिप्रतिषेधात्तु कालानति
क्रमे राज्ञा तिवयोवस्था श्रितानि दिव्यानि देयानि महाभियोगेष्वेतानि सुक्तं तत्राभियोग
स्य यद पेक्षं महत्वं तदिदानीमाह नासहस्राद्धरेत्फालं न विषं न तुलां तथा परासहस्राद
र्वाक् फालं विषं तुलां न कारयेत् मध्यवर्तिजलमपि यथोक्तं तुलादीनि विषांतानि गुरु
ष्वर्थेषु दापयेदिति अत्र कोशस्याग्रहणं कोशमल्पेपि दापयेदित्यल्पाभियोगेपि तस्य स्मर
णात् एतानि चत्वारि दिव्यानि पणसहस्रादूर्द्ध्वमेव भवंति नार्वागित्यर्थः नन्वर्वागग्न्याद
ग्न्यादीनि पितामहेन दर्शितानि सहस्रे तु घटं दद्यात् सहस्रार्द्धे तथायसं अर्द्धस्यार्द्धे तु स
लिलं तस्यार्द्धे तु विषं स्मृतमिति सत्यं तत्रेयं व्यवस्था यत्र द्रव्यापहारे पातित्यं भवति त
द्विषयं पितामहवचनमितरद्रव्यविषयं योगीश्वरवचनमिति एतद्वचनद्वयं स्तेयसा
हसविषयं अपन्हवे तु विशेषो दर्शितः कात्यायनेन दत्तस्यापन्हवो यत्र प्रमाणं तत्र कल्प
येत् स्तेयसाहसयोर्दिव्यं स्वल्पेप्यर्थे प्रदापयेत् सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत्
हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत् ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतं अ ५८

मतदृत्तिनपपगुक्तं घटनिर्म्माणं पुनरारोहणगार्घ्यं सिद्धमेवपितामहनारदादिभिःस्प
ष्टीकृतं नयथाछित्वातुयाज्ञिकेव संपूपवनंमंत्रपूर्वकं प्रणम्यलोकपालेभ्यस्तुलाका
र्यामनीषिभिः मंत्रः सौम्योवानस्पत्यः छेदनजप्यएवच चतुरस्रा तुला कार्या दृढाऋ
ज्वीतथैवच कटकानिचदेयानित्रिषुस्थानेषुचार्थवत् चतुर्हस्तातुलाकार्यापादौचोप
रितत्समौ अंतरंतुतयोर्हस्तौभवेदध्यर्धमेववा हस्तद्वयंनिखेयंतुपादयोरुभयोरपि तो
रणेचतथाकार्येपार्श्वयोरुभयोरपि घटादुच्चतरेस्यातांनित्यंदशभिरंगुलैः अवलंबौ
चकर्तव्यौतोरणाभ्यामधोमुखौमृन्मयौसूत्रसंबद्धौ घटमस्तकचुंबिनौ प्राङ्मुखोनि
श्चलःकार्यःशुचौदेशेघटस्तथाशिक्यद्वयंसमासाद्यपार्श्वयोरुभयोरपि प्राङ्मुखा
कल्पयेद्दर्भांशिक्ययोरुभयोरपि पश्चिमेतोलयेत्कर्तन्यस्मिन्मृत्तिकांशुभां पिटके
पूरयित्वातस्मिन्शिक्येकार्याचपांसुभिः अत्रचमध्यशिक्येष्टकाग्रावपांसूनांविकल्पः परीक्ष
कानियोक्तव्यास्तुलामानविशारदाः वणिजोहेमकारांश्चकांस्यकारास्तथैवच कार्यः
परीक्षकैर्नित्यंसमलंबसमोघटः उदकंचप्रदातव्यंघटस्योपरिपंडितैः यस्मिन्नसव
तेतोयंसविज्ञेयःसमोघटः तोलयित्वानरंपूर्वंपश्चात्तमवतार्यतु घटंतुकारयेन्नित्यं

ततुराजनितस्त्रासिद्धानिरित्यानिसंशयेतेषुनिर्दिशेत्तद्वति इतिदिव्यमातृका एवंसर्व
दिव्योपयोगिनीदिव्यमातृकामभिधायेदानींधृतादिव्यानांप्रयोगमाह तुलाधारणवि
द्वद्भिरभियुक्तस्तुलाश्रितः प्रतिमानसमीभूतोरेखांकृत्वावतारितः त्वंतुलेसत्यधामा
सिपुरादेवैर्विनिर्मिता तत्सत्यंवदकल्याणिसंशयात्मांविमोचय यद्यस्मिपापकृन्मा
तस्ततोमांत्वमधोनयः शुद्धश्चेद्गमयोर्ध्वंमांतुलामित्यभिमंत्रयेत् तुलायाधारणंतोलनं
येविदंतितेसुवर्णकारप्रभृतयस्तैः प्रतिमानेनमृदादिनासमीभूतः समीकृतस्तुलामा
श्रितोधिरूढोभियुक्तोभियोक्तावादिप्रकारीलेखांकृत्वायेनसंनिवेशेनप्रतिमानस
मीकरणदशायांशिक्यतलेवास्थितस्तस्मिन्पादुलेखांकृत्वाऽवतारितः तुलामभिमं
त्रयेत् प्रार्थयेतानेनमंत्रेणहेतुलेत्वंसत्यस्यस्थानमसि पुराब्रह्मादिसृष्टौदेवैर्निर्मितापरा
र्थ्यभिमतिभिर्विनिर्मिताउत्पादिता ततस्मात्सत्यंसंदिग्धार्थस्यस्वरूपंचवदर्शय कल्या
णिशोभनेअस्मात्संशयात्मांविमोचयाहेमातुः यद्यहंपापकृद्दस्यस्यवादस्मिततोमामाव
मधोनयाऽयद्यशुद्धोस्स्यावाद्यस्मिततोमामूर्ध्वंगमयेति प्राड्विवाकस्यतुलाभिमंत्रणमं
त्राः स्मृत्यंतरोक्ताः अयंतुदिव्यकारिणः जयपराजयलक्षणंतुमंत्रलिंगादेवावगम

राम

113

पतिः स्यात्सुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः प्रेतेशरक्षोमध्ये च मातृस्थानं प्र
कल्पयेत् ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चैव माहेन्द्री चामुंडा ग
णसंयुताः निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः वरुणस्योत्तरे भागे मरुतां स्थानमुच्य
ते पवनश्च श्वसनो वायुरनिलो मारुतस्तथा प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवतानां तु स्वनाम्ना पूजनं विदुः भूषा
वसनं धर्माय दत्वा वा धार्मिकं केवलं तु अर्घादि पश्चादंगानां भूषांतमुपकल्पयेत्
गंधादिकानि चैतेषां तां परिचर्यां प्रकल्पयेदिति अत्र च तुलापेताका ध्वजलंकृतो
विधाय तस्यामेहेहीति मंत्रेण धर्ममावाह्य धर्मायार्घ्यं कल्पयामि नमः स्वाहादि प्रयो
गेणार्घ्यं पाद्यं चाचमनीयं मधुपर्कं चाचमनीयं स्नानं वस्त्रं यज्ञोपवीतं चाचमनीयं पुमु
मुकुटकटकादिभूषांतं दत्वा इंद्रादीनां दुर्गांतानां प्रणवाद्यैः स्वनामभिः चतुर्थ्यंतैर्न
मोंतैरर्घादिभूषांतं पदार्थानुसमयेन दत्वा धर्माय गंधपुष्पधूपदीपनिवेद्यानि
दत्वेंद्रादीनां पूर्ववद्ध्यानं गंधपुष्पाणि च घटपूजापारकानि कार्याणि यथाह नारदः
रत्नैर्गंधैश्च माल्यैश्च दध्यपूपाक्षतादिभिः अर्चयंतु घटं पूर्वं ततः शिष्टांस्तु पूजये

५४

पताकाध्वजशोभितं ततश्चावाहयेद्देवान् विधिनानेन मंत्रवित् वादित्रतूर्यघोषैश्च
गंधमाल्यानुलेपनैः प्रमुखः प्रांजलिर्भूत्वा प्राङ्दिवाकस्ततो वदेत् एह्येहि भगवन्
धर्म प्रसीदं द्यैः समाविश सहितो लोकपालैश्च वस्वादिसमरुद्गणैः अतो घटात्तु
घटे धर्मं पश्चादंगानि विन्यसेत् इंद्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा वरुणं पश्चि
मे भागे कुबेरं चोत्तरे तथा अग्न्यादिलोकपालांश्चादंगानि विन्यसेत् इंद्रः पीतो य
मः श्यामो वरुणः स्फटिकप्रभः कुबेरस्तु सुवर्णाभो वह्निश्चापि सुवर्णाभः तथैव निर्ऋ
तिः श्यामो वायुर्धूम्रः प्रशस्यते ईशानस्तु भवेद्रक्त एवं ध्यायेत् क्रमादिमान् इंद्रस्य
दक्षिणे पार्श्वे वसूनाराधयेद्बुधः धरो ध्रुवो धरास्तोमक प्रपश्चैवानिलोऽनलः प्रत्यूषश्च
प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः देवेशानयोर्मध्यमादित्यांस्तथा यजेत् धाता
र्यमा च मित्रश्च वरुणोंऽशो भगस्तथा इंद्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः इत्येते द्वादशादित्या नामभिः परिकीर्तिताः
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः भुवनाधीश्वरश्चैव कपाली च विशां

112

घटमामंत्रयेत् घटमामंत्रयेच्चैव विधिनानेन शास्त्रवित् इति स्मरणात् मंत्राश्च दर्शि-
ताः एवं घटस्थापनानन्तरं परीक्षार्थं दुरात्मनां घकाराद्धर्ममूर्तिस्त्वं टकाराकुटिलं नर
धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च त्व-
मेव देव जानीषे न विदुर्यानि मानवाः व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति तदेनं
संशयादस्माद्धर्मतस्त्रातुमर्हसीति शोधयस्तु लेखादिना पूर्वोक्तेन मंत्रेण तु समाम-
न्त्रयेत् अनन्तरं प्राड्विवाकः शिरोगतपत्रकं शोधयेत् यथास्थानं यथासन्निवेशं च घट-
मारोपयति पुनरारोपयेत् तस्मिन् शिरोवस्थितपत्रकमिति स्मरणात् आरोपिते च वि-
नाडीपंचकं यावत्तथैवावस्थापयेत् कालपरीक्षां च ज्योतिःशास्त्राभिज्ञः कुर्यात् ज्यो-
तिर्वित्प्राड्विवाकः कुर्यात् कालपरीक्षणं विनाड्यः पंच विज्ञेयाः परीक्षाः कालको-
विदैरिति स्मरणात् दशगुर्वक्षरोच्चारणकालः प्राणः षट्प्राणा विनाडी उक्तं च द-
शगुर्वक्षराः प्राणः षट्प्राणाः स्याद्विनाडिका तासां षष्ट्या घटी घटीनां षष्ट्याहोरात्र
उक्तश्च त्रिंशदहोरात्रैर्मासः इति तस्मिंश्च काले शुध्यशुद्धिपरीक्षणार्थं शुचयः पुरु-
षास्ते ज्ञानिनो यथोक्तव्याख्याताः शुध्यशुद्धिं कथयन्ति यथोक्तं पितामहेन साक्षिणो ब्राह्म-
णाः श्रेष्ठा यथार्थवादिनः ज्ञानिनः शुचयो लुब्धानियोक्तव्यास्तद्रूपेण तु शंसन्ति

इति इन्द्रादीनां तु विशेषाणामभिधानाद्यथा लभ्यते तैरन्यैर्वा पूजनमिति पूजाक्रमः एत-
च्च सर्वं प्राड्विवाकः कुर्यात् यथोक्तं प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः श्रुतवृत्तो-
पसम्पन्नः शान्तचित्तो विमत्सरः सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः उपोषितः
शुद्धवासाः कृतदन्तो तु यावनः सर्वांश्च देवतानां च पूजां कुर्याद्यथाविधि तथाऽग्नौ चि-
त्रैश्चतुर्भिः श्च तिसृषु दिक्षु लौकिकेऽग्नौ होमः कार्यः यथाह चतुर्दिक्षु तथा होमः कर्त-
व्यश्चतुर्भिः प्रतिसमिद्धिर्होमसाधनैः नाविव्यादिव्येनाप स्वाहान्ते
ध्वोदृष्टरोगैः आज्येन हविषा वा समिद्धिर्होमसाधनैः ताविव्यादिव्येन स्वाहान्ते
रुद्रप्रयोगैः आज्येन हविषा समिद्धिर्होमसाधनैः स्वाहाकारान्तं प्रणवमुच्चार्य समिद्धि-
नैव होमयेत् प्रणवादिकानाम्नीमुच्चार्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य समिद्धि-
नैव होमयेत् प्रणवादिकानां पत्रीमुच्चार्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य समिद्ध-
नैव होमयेत् प्रणवादि काणापत्रीमुच्चार्य इत्यर्थः एवं हवनान्ते चपूजां विधाय नन्तरमा-
ज्यवरुणस्य सेकमष्टोत्तरशतं जुहुयादित्यर्थः एवं हवनान्ते च पूजां विधायानन्तरमा-

117

घातानिरासार्थं कपाटादिसहितां शालां कुर्यात् विशालामुच्छ्रितां शुभां धटशालां तु
कारयेत् यत्रस्थानोपहन्येत श्वभिश्चाण्डालवायसैः तत्रैव लोकपालादीन् सर्वदिक्षु नि
वेशयेत् त्रिसंध्यं पूजयेच्चैनां गंधमाल्यानुलेपनैः कपाटबीजसंयुक्तां परिचारकरक्षि
तां मरुत्स्थानीयानि संयुक्तामभ्यां कारयेत् स्पष्टमिति स्मरणात् बीजानि यच्च व्रीह्या
दीनां धृतिधटविधि इदानीं क्रमप्राप्तमग्निविधिमाह करौ विमर्दितव्रीहेर्लक्षयित्वा
ततो न्यसेत् सप्ताश्वत्थस्य पात्राणि तावत् सूत्रेण वेष्टयेत्॥ दिव्यमार्गकोत्कसा
धारण धर्मेषु ससुतुलाविधानोक्तधर्मावाहनादिशिरः पत्रारोपणं तेच विध्यं
ते सप्तपमाग्निविधौ विशेषः विमर्दितव्रीहेः विमर्दिता व्रीहयः कराभ्यां येनासौ
विमर्दितव्रीहिः तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थाने वलक्त
करसादिनांकयित्वा यथाह नारदः हस्तक्षतेषु सर्वेषु कुर्यादंकसपदानि विति
अनंतरं सप्ताश्वत्थपत्राणि हस्तयोरंजलौ स्तयोर्न्यसेत् पत्रैरंजलिमापूर्य ग्र
स्वचैः सप्तभिः समैरिति स्मरणात् तानि च हस्तसहितानि सूत्रेण तावद्वेष्टये
यावत् सप्ताश्वत्थपत्राणि सप्तसंख्यो वेष्टयेदिति सर्पः सूत्राणि च सप्त संयुक्तानि भवंति

५७

साक्षिणः सर्वशुद्ध्यशुद्धी रूपेत इति शुद्ध्यशुद्धिनिर्णयकारणं चोक्तं तुलितो य
दि वर्द्धेत शुद्धः स्यात्र संशयः समो वा हीयमानो वा न विशुद्धो भवेन्नरः इति यत्तु पि
तामह वचनं अल्पदोषः समो ज्ञेयो वहुदोषस्तु हीयत इति तत्र यद्यप्यभियुक्तस्या
र्थस्याल्पत्वं वहुत्वं च न दिव्येनावधारयितुं शक्यते तथापि सकृदमतिपूर्वत्वेनाल्प
त्वमसकृन्मतिपूर्वत्वेन च महत्त्वमिति दर्शनायाभिहितात्मत्वमहत्त्वमवधार्यते यदा
चानुपलक्ष्यमाणदृष्टकारणएव कक्ष्यादीनां छेदो भंगो वा भवति तदाप्यशुद्धि
रेव कक्ष्याछेदे तुलाभंगे घटकर्कटयोस्तथा रज्जुच्छेदेक्षभंगे च तथैवाशुद्धिमा
दिशेदिति स्मरणात् कक्ष्याशिक्यतले कर्कटौ तुलांतयोः शिक्यधाराबीषदक्रौवा
यस कीलकौ कर्कटशृंगसन्निभौ अक्षः पादस्तंभयोरुपरिनिविष्टस्तुलाधार
पटः शुद्धातु दृश्यमानकारणकएषां भंगस्तदा पुनरारोपयेत् शिक्यादिच्छेदभंगे
षु पुनरारोपयेन्नरमिति स्मरणात् ततश्चवक्ष्यति सुरोहिताचार्यान् दक्षिणाभिश्च
तोषयेत् एवं कारयिता राजा भुक्त्वा भोगान् मनोरमान् महतीं कीर्तिमाप्नोति ब्रह्म
भूयाय कल्पते यदा तूक्तलक्षणघटे तत्पेव स्थापयितु मिच्छति तदा वायसाद्युप

116

राम

प

117

स्तसेसे दंशेन पुरात्तआनीते कर्त्ता पश्चिमे मंडले प्राङ्मुखस्तिष्ठन्नेनेन मंत्रेणाग्निमभिमंत्र
येत् यथाह नारदः॥ अग्निवर्णमयः पिंडः सस्फुलिंगः सुरंजितः तापेस्तीयसंताप्य वृषा
न्नस्स सपुरस्सरनमिति अस्यार्थः लोहस्य अयं सुत्त संलोहपिंडमुदके निक्षिप्य पुनः
संताप्योदके निक्षिप्य स्तीयत्तापे संताप्य संदंशेन महीतलापुरत आनीतेस सपुरस्सर
तेस सशब्दयुक्ते त्वमग्ने सर्वभूतानामित्यादिमंत्रं कर्त्ता ब्रूयादिति प्राङ्मुखावा
स्तन्मंडलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधाय पोत्रये पावकाय स्वा
हे स्वाज्येनाष्टोत्तरशतवारं जुहुयात् शांसपर्जहुयादग्नौ घृतमष्टोत्तरंशत
मितिस्मरणात् हुतावशिष्टेन तप्तवपः पिंडं प्रक्षिप्य तस्मिंस्तप्यमानेधर्मावाहना
दिरूवनात्तपूर्वोक्तं विधिं विधाय स्तीयवर्त्तमानेयः पिंडस्य मग्निमेमभिमंत्रे रभि
मंत्रयते त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे त्वंमुखं सर्वदेवानां त्वमुखं
ब्रह्मवादिनां जठरस्योसिभूतानां ततोवेत्सि शुभाशुभं पापं पुनासि वै यस्मात्तस्मा
त्पावक उच्यसे पापेषु दर्शयात्मानमर्चिष्मान्भव पावक अथवा शुद्धभावेषु
शीतो भव हुताशन त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत् त्वमेव देवजानी

५८

षे न विदुर्मानवा बुधाः व्यवहाराभिशस्तोयं मानुषस्तुध्यतामिह
तन्मुक्तमविमुक्ते वा पायवा सत्यतो नयेत् इति अथ तस्यांजलि प्रसारयेत्
दूर्वापत्राणि चाक्षतान्स्वाद्यक्तान्मुक्तान्अश्वत्थपत्राणामुपरि विन्यसेत् ससप्ति
प्पलपत्राणि शमीपत्राण्यथाक्षतान् दूर्वाप्रांसेसपत्राणि दध्यक्तान्क्षाक्षतान्न्यसे
दितिस्मरणात् तथाकुसुमानि च विन्यसेत् सप्तपिप्पलपात्राणि अक्षतान् सुमनो
दधि हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टयेत्तयेति पितामहवचनात् सुमनसः पुष्पा
णि पद्मपिस्मरणं अपस्तसंतुपाणिभ्यां मयं पत्रैस्तुसप्तभिः अत्रैतौ हस्तौ हरेच्छङ्कस्त
णिपद्मसप्तभिः तदेतत्रस्पष्टपात्राभावेक पत्रविपर्ययं वेदितव्यं अश्वत्थपत्राणांपि
दृध्यः सप्तभिपद्मपुमितितत्र पत्राभावेकपत्रविपर्ययवेदितव्यं अश्वत्थपत्राणांपि
तामहप्रसंसाच्चवनेनमुख्याचावगमात् पिप्पलाज्जायते वह्निः पिप्पलोवृक्षराट् स्म
नः अतस्तस्य तु पात्राणि हस्तयोर्निक्षिपेद्बुध इति कर्तुरग्न्याभिमंत्रणमाह त्वमग्ने सर्व
भूतानामंतश्चरसि पावक साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम हे अग्ने त्वं सर्व
भूतानां जरायुजांडजस्वेदजोद्भिज्जानां मनः शरीराभ्यंतरे संचरसि उपभुक्तान्नपानादी
नां पावकत्वेन वर्तसे पावक शुद्धिहेतो कवे क्रांतदर्शिन साक्षिवत्पुण्यपापेभ्यः इद
मस्य त्वोपपंचमी पुण्यपापाभ्यां वेच्छ्यस सत्यं ब्रूहि दर्शय सर्थः अयः पिंडे त्रिभिस्तापि

राम

118

५८

121

शांगुलप्रमाणं मंडलं वोढव्यं मंडलयोरंतरं मध्यं तावदेव षोडशांगुलं एवमेव सप्त
मंडलानि व्रजेदिति वदता प्रथममवस्थानमंडलमेकमुक्तमन्यान्यष्ट मंडलानि षोड
शांगुलकानि मंडलांतराणि तु सप्त तावत्प्रमाणानि एतदेव नारदेन परिस्फुटमु
क्तं द्वात्रिंशदंगुलं प्राहुर्मंडलान्मंडलांतरं अष्टाभिर्मंडलैरेवमंगुलानां शतद्वयं
चत्वारिंशत्समधिकं भूमेरंगुलमानतः इति अयमर्थः प्रथमवस्थानमंडलात्षोडशांगु
लान्मंडलांतरमन्यमंडलं द्वितीयाद्येकमेकं द्वात्रिंशदंगुलं सांतरालं तदेवमवस्था
नमंडलं षोडशांगुलं तथ्यानि च सप्त मंडलानि सांतरालानि द्वात्रिंशदंगुलान्ये
वमष्टाभिर्मंडलैश्चत्वारिंशदधिकं शतद्वयं भूमेरंगुलमानं तत्तोगुलमानमिति सा
र्वविभक्तिकस्तसिः अस्मिन्पक्षे अवस्थानमंडलं षोडशांगुलं विधाय द्वात्रिं
शदंगुलप्रमाणानां सप्तानां सांतरालमंडलभूभागानामेकैकं भूभागं द्विधा विभ
ज्यांतरालभूभागान्षोडशांगुलप्रमाणान्विहाय मंडलभूभागेषु षोडशांगुलप्रमाणे
षु गंरूपदप्रमाणानि सप्त मंडलानि कार्याणि यथा तेनैवोक्तं मंडलस्य प्रमाणं
तु कुर्यात्तत्पदसम्मितमिति यत्तु पितामहेनोक्तं कारयेन्मंडलान्यष्टौ पुरस्तात्

५७ 120

येनाविदुर्यानि मानुषाः व्यक्तार्थमभिशस्तोयं मानुषः शुद्धिमिच्छति तदेतेन संशया
दस्मान् धर्मतस्त्रातुमर्हसीति अपि च तस्य पुरस्तात्तु लोहं पंचाशत्पलिकं सम
मं अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि तस्य कर्तुः स्तुवं च तत्समयेत्सर्वभू
तानीमि साधभिमंत्रणं तेन वत्तः लोहं लोहविकारपिंडं पंचाशत्पलिकं पंचाश
त्पलसम्मितं समसमं अश्रिरहितं सर्वतस्समं वृत्तं श्लक्ष्णं च तथाष्टांगुलायाम
अश्रिहीनं समं वृत्तं चाष्टांगुलमयोमयं पिंडं तापयेदग्नौ पंचाशत्पलिकं सममिति
पितामहस्मरणात् अग्निवर्णमग्निसदृशमुभयोर्हस्तयोः स्वच्छपत्रदधिदूर्वा
युतं तिलयोर्न्यसेन्निक्षिपेत्प्राड्विवाकः ततः किं कुर्यादित्यत आह स तमादाय सप्तै
व मंडलानि शनैर्व्रजेत् स पुरुषस्तं लोहपिंडमंजलिना गृहीत्वा सप्त मंडलानि शनैर्व्र
जेत् एकैकारेण मंडलेष्वेव पदन्यासं मंडलानतिक्रमणं च दर्शयति यथाह पिता
महः न मंडलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदमिति सप्तैव मंडलानि शनैर्व्रजेदि
त्युक्तं तत्रैकैकं मंडलं किंप्रमाणं कं मंडलयोरंतरं च किं प्रमाणमित्यत आह
षोडशांगुलकं ज्ञेयं मंडलं तावदंतरं षोडशांगुलानि यस्य तत्षोडशांगुलकं षोड

राम

५७

१२३

मंडलेग्नित्तस्यः पिंडं स्वकावीहीकराभ्यां मर्दयित्वा अग्रदग्धहस्तश्चैव घृदिता प्रथा
न्तू दग्धहस्तश्चैव स्तुदः इत्यस्य पीसिद्धं यत्तु सेत्रासोऽत्र स्खलन्नूहस्ताभ्याममत्र दस्
नेत्तथाप्यस्युद्धोनभवति यथालकासायनः प्रस्खलेन्नोभिशस्तश्चैव तस्यानादन्य
त्रदह्यते अग्रदग्धं तं विदुर्देवा सत्यस्य भूयोपि दापयेदिति अत्र नरापतिनेनपिंडो संदेहंच्या
पुनर्हेतू यदागच्छन्तो नरा अष्टम मंडलादर्वागेव पिंडः पततितदग्धनेत्तवासेरायस्त
दापुनर्हरेदित्यर्थप्रासमुक्तं नन्वचापमनुष्यानन्त्रेमः पूर्वं घृभूस्युद्धिं विधायापरे
घुर्मंडलानि यथाशास्त्रं निर्माय मंडलाधिदेवताश्च नक्षेत्र संपूज्याग्निमुपस
माधाय शांतिहोमं निर्वर्त्यीग्रानयः पिंडं निधाय धर्मावाहनादि सर्वदेवता पूजां
हवनांतानि विसर्जयेत् पोषित्तस्य स्नातस्याद्रवाससः पश्चिमे मंडले तिष्ठतो व्रीहिम
र्दनादि कर संस्कारं विधाय प्रतिज्ञापत्रं समंत्रकं कर्तुः शिरसि बध्वा अग्निं वा कस्त
नीयेत्तावेडग्नीमभिमंत्र्य तस्य मयः पिंडं संदेशेन यहीत्वा कर्तभिमंत्रित्तं तस्यांज
लोनिदध्यात् सोपि मंडलानि सप्त गत्वा नवमे मंडले प्रक्षिप्यादग्धः शुद्धो भव
तीति दिव्यग्निविधिः साम्प्रतुदकविधिमाह स ह्येन माभिरक्षस्वंच वरुणस्य मिरा

६०

नवमंतथा आग्नेयं मंडलं वायव्यं द्वितीयं वारुणं स्मृतं सत्तीयं वासुदेवस्य चतुर्थं
यमदैवतं पंचमं त्रिंशदेवस्य षष्ठं कौबेरमुच्यते सप्तमं सोमदेवस्य सावित्रं त्वष्टमं
तथा नवमं सर्वदेवस्यामित्तिदिव्यविदो विदुः द्वात्रिंशदंगुलंप्राहुर्मंडलान्मंडलांत
रं अष्टभिर्मंडलैरेवमंगुलानां शतद्वयं षट्पंचाशत्समधिकं भूमेस्तु परिकल्पना
कर्त्तुः पदसमं कार्यं मंडलं तु प्रमाणतः मंडले मंडले देयाः कुशाः शास्त्रप्रचोदिताः इति
तेन नवमं सर्वदेवस्य मपरिमितांगुले प्रमाणं मंडलं विहायाष्टाभिर्मंडले रष्टाभिश्चां
तरैः प्रत्येकं षोडशांगुलप्रमाणैरंगुलानां षट्पंचाशदधिकं शतद्वयं सम्पाद्य राम
नेतत्रापिगंतव्यानि सप्तैव मंडलानि यतः प्रथमे तिष्ठतीनवमे क्षिपतीति न विरु
ध्यते अंगुलप्रमाणं च तिर्यक्पर्वोदराण्यष्टावूर्ध्वा वा व्रीहयस्तुयः प्रमाणमंगु
लस्योक्तं वितस्तिर्द्वादशांगुल हास्तो वितस्तिद्वितयं दंडो हस्तचतुष्टयं तत्सहस्र
द्वयं क्रोशो योजनं तच्चतुष्टयमिति चोद्धर्मं सप्तमंडलानि गत्वा किं कर्तव्यमित्यत
आह मुक्ताग्निर्मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् अष्टमे मंडले स्थित्वा नवमे

१२२

125

हार्यंतडागादिष्वप्याहृतं तास्त्रकटाहादिक्षिप्तं जलं नाभिप्रमाणोदकस्य स्थ्वतुपवित्रियव
स्तोमदेवं धर्म्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् उदके प्राङ्मुखस्तिष्ठेत् धर्म्मस्थूणां
प्रगृह्य चेति स्मरणात् ततः किं कर्त्तव्यमित्यत आह समकालमिषुमुक्तमानीयाप्यै
जीनरः गतेतस्मिन्निमग्नांगं परपेच्छेद्दिमामुपानं विमज्जनसमकालं गते तस्मिंज
वनोकस्मिंस्पुरुषोन्योजवीशरपातस्यानंस्थितः पूर्वमुक्तमिषुमानीयजलेनिमग्नां
गं यदि पश्यति तदासशुद्धो भवति एतदुक्तं भवति त्रिषु मुक्तेषु एको वेगवानन्यस्य
शरपातस्थाने गत्वा तमादाय तत्रैव तिष्ठत्यन्यस्तु पुरुषो वेगवांश्चरमोस्य स्था
नेतोरणमूले तिष्ठति एवं स्थितयोस्तृतीयस्यां करतालिकायां शोध्यो निमज्ज
ति तत्समकालमेव तोरणमूलस्थितोपि द्रुततरं मध्यमशरपातस्थानं गच्छति शर
ग्राही च तस्मिन्नासेद्रुततरं तोरणमूलं प्राप्य तत्र जलगतं यदि न पश्यति तदा शुद्धो
भवतीति एतदेव स्पष्टीकृतं पितामहेन गंतुश्चापि च कर्तुश्च समं गमनमज्जनं ग
च्छेत्तोरणमूलात्तु लक्ष्यस्थानं यवीनरः तस्मिन्गते द्वितीयोपि वेगादादाय साय
के गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः आगतस्तु शरग्राही न पश्यति यदा जले

६१ पूर्वं नाभिदघ्नोदकस्य स्यगतह्मीयोत्पजले विशेत् देव रुणसत्येनतर्मनमिरक्षस्व
मित्यनेन मंत्रेणाकमुदकमभिशाप्यामिमंत्र्य नाभिदघ्नोदकस्य स्य नाभिप्रमाणो
दकस्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जलं प्रविशेत् जले निमज्जेत् एतच्च वरु
णपूजायां सत्यां गंधमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः वरुणाय प्रकुर्वीत
पूजामादौ समाहित इति नारदस्मरणात् तथा साधारण धर्मेषु धर्मावाहनादि स
कलदेवतापूर्वा होमसमंत्रकः प्रतिज्ञापत्रशिरोनिवेशनांतेषु सत्स्वेव तथा तोय
स्वेषु प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितं शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथाग्र
तस्त्वं दर्शयात्मानं शुभाशुभपरीक्षिणे इति प्राद्विवाकेनोदकाभिमंत्रणे कृते शोध्यः
तस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे इत्युदकं प्रार्थयते उदकस्थानानि च नारदेनोक्तानि न
सत्येन माभिरक्षस्व वरुणेत्युदकं प्रार्थयते उदकस्थानानि च नारदेनोक्तानि न
दीषु न तु वेगासु सागरेषु वहेषु च ह्रदेषु देवखातेषु तडागेषु सरस्सु चेति तथा
पितामहेनापि स्थिरे तोये निमज्जेत न ग्राहिणि न चाल्पके तृणशैवालरहिते ज
लूकामत्स्यवर्जिते देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनं आहार्यं वर्जयेत्
न्नित्यं शीघ्रगासु नदीषु च आविशेत्सलिले निस्तरंगे भूमिपं कविवर्जितमिति आ

124

राम

६१

127

सुहृदं क्षिपेदिति स्मरणात् क्षेसाच्च क्षत्रियस्तद्वृत्तिर्वा ब्राह्मणः सोपवासो नियोक्तव्यः
यथाह क्षेसाच्च क्षत्रियः प्रोक्तस्तद्वृत्तिर्ब्राह्मणोऽपि वा अक्रूरहृदयः शांतः सोपवास
स्ततः क्षिपेदिति त्रिषु मुक्तेषु मध्यमः शरो ग्राह्यः तेषां च प्रविनानां च शराणां शास्त्र
चोदनात् मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसेति वचनात् तत्रापि पतनस्थाना
दनेन व्योनसर्पणस्थानात् शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत् सर्पं सर्पं
च्छरो यायात् दूराद्दूरतरं पतत् इति वचनात् वाते च प्रवाति निर्विषमादि देशे च शरमो
क्षेन कर्तव्य इषुं न प्रक्षिपेद्विद्वान् मारुते चातिवायति विषमे भूप्रदेशे च वृक्षस्था
णुसमाकुले तृणगुल्मलतावल्लीपंकपाषाणसंयुते इति पितामहवचनात् नि
मग्नांगं पश्येच्चेच्छुद्धिमान् स्यादिति वदता उन्मज्जितांगस्याशुद्धिर्दर्शिता स्थानांत
रगमने चाशुद्धिः पितामहेनोक्ता अन्यथा न विशुद्धः स्यादेकांगस्यापि दर्शनात्
स्थानाद्वान्यत्र गमनाद्यस्मिन् पूर्वं निवेशितः इति एकांगस्यापि दर्शनादिति वक
र्णाद्यभिप्रायेण शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका अप्सु प्रवेशने यस्य
शुद्धं तमपि निर्दिशेदिति विशेषाभिधानात् अथ मत्र प्रयोगक्रमः उक्तलक्ष

६२ अंतर्जलगतं सम्यक् तच्छुद्धं विनिर्दिशेत् जविनोश्च पुरुषयोर्निर्धारणं कृतं नारदेन
पंचाशतो धावकानां यो स्यात्तं मधिकं जवे तौ च तत्र नियोक्तव्यौ शरानयनकारणा
दिति तोरणं च मज्जनसमीपस्थाने समे शोध्यकर्णप्रमाणोच्छ्रितं कार्यं गत्वा तु त
त्रोक्तस्थानं तत्तोरणमुच्छ्रितं कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचाविति नारद
स्मरणात् शस्त्रपर्वणं वंचयनुमंगलद्रव्यैः श्वेतपुष्पादिभिः प्रथमं पूजयेत् श
रान्संपूज्य वैसर्वं वैणवं चयनस्तथा मंगलैर्धूपपुष्पैश्च ततः कर्म समाचरेदिति
126
पितामहवचनात् धनुषः प्रमाणलक्षणं स्यात्तं च नारदेनोक्तं क्रूरं धनुः सप्तशतं म
ध्यमं षट्शतं स्मृतं मंदं पंचशतं ज्ञेयमेषत्रयो धनुर्विधिः मध्यमेन तु चापेन प्रक्षि राम
पेच्च शरत्रयं हस्तानां तु शते सार्धे लक्ष्यं त्वाविचक्षणः न्यूनाधिके तु दोषः स्या
त् क्षिपतः सायकांस्त्रयोऽति अंगुलासमाधिकं शतं क्रूरं धनुः एवं षट्शतं पंचश
तं च एवं चैकादशांगुलाधिकं हस्तचतुष्टयं क्रूरस्य धनुषः प्रमाणं मध्यमस्य दशां
गुलाधिकं मंदस्य नवांगुलाधिकमित्युक्तं भवति शरांश्चानायसाग्रा वैणवाः
कार्याः शरांश्चानायसाग्रास्तु प्रकुर्वीत विशुद्धये वेणुकांडमयांश्चैव क्षेमानु

129

णानिषघगेन्च विषतंत्रे कथितानि वेगो रोमांचमाद्यो स्वपतिविषजः स्वेदवक्त्रोप
शोषौ तस्योर्ध्वस्तत्सरो द्वौ वपुषि जरयतो वर्णभेदप्रवेपौ यो वेगः पंचमोऽसौ नयनविव
शतां कंठभंगं च हिक्कां षष्ठो निश्वाससंमोहौ वितरति च मृतिं सप्तमो भक्षकस्येति अत्र
च महादेवस्य पूजा कर्तव्या यथाह नारदः दग्धादिविषसोषवासे देवब्राह्मणसन्निधौ
धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरमिति प्राड्विवाकः हुतोपवासो महादेवं पूजयि
त्वा तस्य पुरतो विषं यो यस्याप्पयमादि पूजा हवनानां विधाय प्रतिज्ञापत्रं शोध्यस्य
शिरसि निधाय विषमभिमंत्रयेत् त्वं विष ब्रह्मणः सृष्टं परीक्षार्थं दुरात्मनां पापा
नां दर्शयात्मानं शुद्धानाममृतं भव मृत्युभूतो विष त्वं हि ब्रह्मणा परिनिर्मितं त्रायस्वै
नं नरं पापात् सत्येनास्यामृतं भवेति एवमभिमंत्र्य दक्षिणाभिमुखावस्थिताय दद्या
त् नारदवचनात् द्विजानां सन्निधावेव दक्षिणाभिमुखेऽवस्थिते उदङ्मुखः प्राङ्मुखो
वा विषं दद्यात् समाहितः इति विषं च वत्सनाभादि ग्राह्यं शृंगिणो वत्सनाभस्य हैमवत
स्य विषस्य वेति पितामहवचनात् वर्ज्यानि चात्र नैवात्र कानि चारिजानि च जीर्णानि
कृत्रिमाणि तथैव च भूमिजानि च सर्वाणि परिवर्जयेदिति तथा नारदेनापि भक्षं

६२

लक्षणान्नात्राशयसान्निधावुक्तलक्षणतोरणं तोरणं विधाय तत्राग्रदेशे लक्ष्यानि ध्या
यतो रणसान्निध्ये ससुशरं धनुः सप्तव्यज्जलाशये ~~[illegible]~~ वरुणमावाह्य पू
जयित्वा तत्तीरे धर्मादीन् देवान् हवनं तन्मिश्याश शोध्यस्य शिरसि प्रतिज्ञापत्रमावे
ध्य प्राड्विवाको जलमभिमंत्रयेत् तोयस्त्व प्राणिनां प्राण इत्यादिना मंत्रेण अथ शोध्यः
सत्येनेत्यादिना मंत्रेण जलमभिमंत्र्य गृहीतस्थूणस्य नाभिमात्रोदकावस्थितस्य च
वलीयसः पुरुषस्य समीपमुपसर्पेत् ततः प्रथम शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने
मध्यमं शरं गृहीत्वा जविनो कस्मिन् पुरुषे स्थिते तन्यस्मिंश्च तोरणमूलेऽवस्थिते प्राड्विवाके
नतालत्रयेदत्ते युगपत् मज्जनं शरानयनमिति इत्युदकविधिः इदानीं विष
विधानमिह त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः त्रायस्वास्मादभीशापात्सत्येन
भवामृतं एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजं यस्य वेगैर्विना जीर्येत् शुद्धिं तस्य विनि
र्दिशेत् त्वं विषेत्यादि मंत्रेणाविषमभिमंत्र्य कर्ता विषं हिमशैलजं शृंगप्रभवं भक्षये
त् तच्च भक्षितं सत् न यस्य विषवेगैर्विना जीर्यतीति स शुद्धो भवति विषवेगो नाम यत्तु धा
त्वंतरप्राप्तिः धातोर्धात्वंतरप्राप्तिर्विषवेग इति स्मृतं वचनात् धातवश्च त्वगसृङ्मां
समेदोऽस्थिमज्जाशुक्राणीति सप्त एवं च सप्तैव विषवेगा भवंतीति तेषां च लक्ष

राम

128

131

ञ्चाधारयेद्दिव्यकारिणं औषधीर्मंत्रयोगांश्च मणीन्यावद्विषापहान् कर्त्तुः शरीरसं
स्थांश्च गूढोत्सर्वान्परीक्षयेदिति पितामहस्मरणात् तथा विषमपि परीक्षणीयं शार्ङ्गं
हैमवतं शस्तं गंधवर्णरसान्वितं अत एव विमसंगूढ मंत्रोपहतं च यदिति नारदस्म
रणात् तथा विषपीतं यावत्करतालिकाशतं पंचकं तावत्तीक्ष्णो योऽनंतरं चि
कित्सनीयः यथाह नारदः पंचतालशतं कालं निर्विकारो यदा भवेत् तदा भवति सं
शुद्धः ततः कुर्याच्चिकित्सितमिति पितामहेन तु दिनांते बोधिरल्पोऽल्पमात्रा विषयः
भक्षिते तु यदा स्वस्थो मूर्च्छाछर्दिविवर्जितः निर्विकारो दिनस्यांते शुद्धं तमपि निर्दिशे
दिति अत एव प्राड्विवाकः सोपवासो महादेवं पूजयन्तु सुस्नो विषस्यापि पयि वांध
मोदीनिष्ठाशोध्यस्य शिरसि प्रतिज्ञापत्रं तेन याव्याविषमभिमंत्रिदक्षिणाभिमुखा
वस्थितेनाप विषं प्रपद्यतिसच्च शोध्य विषमभिमंत्र भक्षायतीतिक्रमः इति विषविधा
नं कोशविधिमाह देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् संप्राव्य पाययेत्तस्मा
ज्जलात्तु प्रसृतित्रयं उग्रान्देवान् दुर्गादीन् समभ्यर्च्य गंधपुष्पादिभिः पूजयित्वा सं
स्नाप्य तत्स्नानोदकमाहरेत् आहूय सचनोयवं प्राङ्मुखेन प्राणरसादिना तत्तोयं प्रा

६७

चवारिजं चैव धूपितं मिश्रितं तथा कालकूटमालावुं च विषं पलेन वर्जयेदिति का
लश्च नारदेनोक्तः तौलयित्वा क्षिप्तं काले देयं तद्विभागमेनापरह्ने न मध्याह्ने न संध्या
यां तु धर्मविदिति कालांतरे तु लक्ष्मणा दत्वा देयं वर्षे चतुर्या मात्रा गीयो पंच
यवास्मृता हेमंते स्युः सप्तयवाः शरद्यल्पा नतोपि हीति स्मरणात् अत्रापि षड्भवे
त्सर्चः हेमंतग्रहणे न शिशिरस्यापि ग्रहणं हेमंतशिशिरयोः सलषड्भागाभ्दागो विंश
तिमस्तु यः तमष्टभागहीनं तु शोध्ये दद्यात् घृतप्लुतमिति पलं चात्र चत्तुः सुवर्णकं
तस्य षष्ठो माषो दमाषो दशयवा भवति त्रियवं चैव कृष्णलं पंचकृष्णलिको माषः
पंचदशयव भवेति एवं दशानां माषाणां यवाः सार्द्धशतं भवति पूर्वं च दशयवा इति ष
ष्ठ्यधिकं शतं यवाः पलस्य षष्ठो भागस्तस्माद्विंशतितमो भागोऽष्टयवास्तस्याष्ट
मभागहीनं एकयवहीनं विंशतितमं भागं सप्तयवं घृतप्लुतं दद्यात् घृतं च विषा
त्रिंशद्गुणं ग्राह्यं पूर्वाह्णे शीतले देशे विषं देयं तु देहिनां घृतेन योजितं श्लक्ष्णं पिष्टं
त्रिंशद्गुणान्वितमिति कात्यायनवचनात् त्रिंशद्गुणघृतेनान्वितं विषं शोध्यश्चवक्त
हकादिभ्यो रक्षणीयः त्रिरात्रं पंचरात्रं चापुरुषैः स्वैरधिष्ठितं कुहकादिभयाद्

130

राम

६८

133

ड्स्यधिकारिनियमः नपाणोमयेनमंडलंकृत्वातत्रशोध्यमादित्साभिमुखंस्थापयि
त्वपापयेदितिचनारदवचनादवगंतव्यं यथाह नमाहृयामिशस्तंतुमंडलाभ्यंतरेस्थि
तं ग्रदित्साभिमुखंसत्यापायये त्रसत्तिंत्रयमिति नहुतुलादिषुविषांतेषुसमनंतत्
रमेवमनुअशुद्धिविभावनाकोशेनुकर्षमिसत्कप्राहसर्वाकृचतुर्दशादकोयस्यनोरा
जदैविकंव्यसनंजायते घोरंसमशुद्धः स्यान्नसंशयः चतुर्दशादूर्ध्वः पूर्वंयस्यराजि
कं राजनिमित्तंदैविकं दैवप्रभवंव्यसनंदुःखंघोरं महत्तेनोनैवजायतेतो ग्रलस्यदे
हिनामपरिहार्यंसशुद्धोवेदितव्यः ऊर्ध्वंपुनरवधेर्नदोषः यथाहनारदः ऊर्ध्वंय
स्याद्विसप्ताहाद्वैकृतंतुमहद्भवेत् नाभियोज्यःसविदुषाकृतकालव्यतिक्रमादित्सिर्थः
सिद्धमेषोक्तं ग्रर्वाक्चतुर्दशादहस्येतन्महाभियोगविषयंमहाभियोगेषुतानीति
प्रस्तुत्याभिधानात् ग्रवध्यंतरालेपिनामहेनोक्ताम्यल्पविषयाणि कोशमल्पेपिदाप
यपेदितिस्मरणात् तानिचत्रिरात्रात्सप्तरात्राद्वादशाहाद्वादिसप्ताकान् वेतंयस्य
दृश्येतपापरक्तस्यउदाहृतइतिमहाभियोगोक्तेरूर्ध्वादर्वाचीनेऽत्रव्यतिरिधाविभज्यत्रिरा

त्रि वाक्यः संश्राव्यशोध्यमन्चततोयंपात्रांतरेकृत्वासत्येनमामिरक्षस्वेवरुणोस्वनेन
मिमंत्रितंपाययेत्प्रस्थतित्रयं एतत्तुसाधारणधर्मेषुधर्मावाहनादिसकलदेवता
पूजाहोमसमंत्रकप्रतिज्ञापत्रशिरोनिवेशनांतेषुसत्सु ग्रत्रचस्नापदेवतानियमः
कार्यनियमोऽधिकारिनियमश्चपितामहादिभिरुक्तः भक्तोयोयस्यदेवस्यपाययेत्
तस्यतज्जलं समभावेतुदेवानामनामादित्यस्यतुपाययेत् दुर्गायाः पाययेच्चोरान्
चशास्त्रोपजीविनः भास्करस्यतुयत्तोयंब्राह्मणंतंनपाययेत् दुर्गायाःस्नापयेच्छ
लमादित्यस्यतुमंडलं ग्रभेषमापिदेवानांस्नापयेदायुधानिवितिदेवतानियमः
विसंभेसर्वशंकासुसंधिकार्येतथैवच एषुकोशःप्रदातव्योनित्यंचित्तविशुद्धये इति
कार्यनियमः पूर्वदिसोपवासस्यस्नातस्यार्द्रपटस्यचसशूकस्यव्यसनिनः कोशो
पानंविधीयते सशूकःग्रास्तिकः मद्यपस्त्रीव्यसनिनांकितवानांतथैवच कोशः
प्राज्ञैर्नदातव्योयेचनास्तिकवृत्तयः महापराधेनिर्धर्मेकृतघ्नेक्लैव्यकुत्सिते नास्ति
कव्रात्यदासेषु ~~नाननतोवनचेजौस~~ सेषुकोशपानंविवर्जयेदिति महापराधोमहापा
तकीनिर्धर्मोवर्णाश्रमधर्मरहितः पापकर्मी प्रतिलोमजः दासाःकैवर्त्ताः

132 राम

कराग्रंयोन धनुर्यादिविस्फोटो यानजायते शुद्धो भवति धर्मेण निर्विकारकरांगुलिरिति
उद्धरेदिति वचनात्सात्रादुत्क्षेपणमात्रेण न बहिः प्रक्षेपणमादरणीयं अपरः कल्पः सौ
वर्णे राजते ताम्रे वा आयसे मृन्मये पि वा गव्यघृतमुपाहृत्य तदग्नौ तापयेच्छुचिः सौव
र्णे राजते ताम्रे आयसे वा सुशोधितां सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकां भ्र
मद्वीचीतरंगाढ्ये सनखस्पर्शगोचरे परीक्षेतार्द्रपर्णेन चुरुकारं सघोषकं ततश्चा
नेन मंत्रेण सकृदभिमंत्रयेत् परं पवित्रममृतं घृत त्वं यज्ञकर्मसु दह पावक पा
पं त्वं हिमशीतं शुचौ भव उपोषितं ततः स्नातमार्द्रवाससमागतं ग्राहयेन्मुद्रिकां तां
तु घृतमध्यगतां तथा प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः यस्य विस्फोटका न स्युः
शुद्धोसावन्यथाशुचिरिति अत्रापि धर्मावाहनाद्यनुसंधातव्यं घृतानुमंत्रणं प्राड्वि-
वाकस्य त्वमग्ने सर्वभूतानामिति शोध्यस्याप्यभिमंत्रणमंत्रः प्रदेशिनीं परिक्षेपु
रिति वचनात्प्रदेशिन्यैव मुद्रिकोद्धरणं इति तप्तमाषविधिः धर्माधर्माख्यदिव्यवि
धिविधिश्च पितामहेनोक्तः यथाच अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणं ह
न्तृणां याचमानानां प्रायश्चित्तार्थिनां नृणां हन्तृणामिति साहसाभियोगेषु याच

६६

त्राद्यपीयस्त्वयं व्यवस्थापनीयं इति कोशविधिः तुलादीनि कोशांतानि पंच महादिव्यानि
यथोपदेशं योगीश्वरेणव्याख्यातानि स्मृत्यंतरे त्वल्पाभियोगविषयाण्यन्यपि
दिव्यानि कथितानि यथाह पितामहः तंदुलानां प्रवक्ष्यामि विधिं भक्षणचोदितं
चौरे तु तंदुला देया नान्यस्येति विनिश्चयः तंदुलाकारयेच्छुक्लान्शालेर्नान्यस्य
चित्त् मृन्मये भाजने स्थाप्य आदित्यस्याग्रतः शुचिः स्नानोदकेन संमिश्रान्रा
त्रौ तत्रैव वासयेत् प्राङ्मुखोपोषितं शिरोरोपितपत्रकं तंदुलान्भक्षयित्वा तु प
त्रे निष्ठीवयेत्ततः पिप्पलस्य तु नान्यस्य अभावे भूर्जएव तु लोहितं दृश्यते यस्य हनुस्ता राग्र
लु च शीर्यते गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेदिति शिरोरोपितपत्रकेन तं
दुलान्भक्षयित्वा निष्ठीवयेत्प्राड्विवाकः भक्षयेदिति एवं ताणि विरूपं सर्वदिव्यसा
धारणं च धर्मावाहनादि पूर्ववदिहापि कर्त्तव्यं इति तंदुलविधिः तप्तमाषकविधिः
पितामहेनोक्तः यथाहि सौवर्णे राजते वापि ताम्रे च षोडशांगुलां चतुरंगुलखातं
तु मृन्मये वाथ मंडलं वर्तुलमित्यर्थः पूरयेद्घृततैलाभ्यां विंशत्या तु पलैस्तु तत्
तु चर्णमाषकं तस्मिन्सुतप्ते निक्षिपेत्ततः अंगुष्ठांगुलियोगेन उद्धरेत्तप्तमाषकं

137

शपथेश्रुचिरिति ॥ आर्त्तिरपिमस्पनोराजदैविकं व्यसनंजायतेघोरमिसलैव का
लनियमश्च एकरात्रमारभ्यत्रिरात्रपर्यंतत्रिरात्रमारभ्यपंचरात्रप्रभृतिः कार्यला
घवगौरवपर्यालोचनयाद्रष्टव्यः एवंदिव्यैर्जयपराजयावधारणे दंडविशेषो
पिदर्शितिः कात्यायनेन शतार्द्धंदापयेच्छुद्धमशुद्धोदंडभाग्भवेदिति तंदंडमाहवि
षेतोयेहुताशेचतुलाकोशेचतंडुले तप्तमाषकदिव्येचक्रमाद्दंडप्रकल्पयेत् सह
स्रंषट्शतंचैवतथापंचशतानितु चतुस्त्रिद्येकमेवंचहीनेहीनेषुकल्पयेदिति
निह्नवेभावितोदद्याद्दिसाधुक्तंदंडेनायंदिव्यानिवंधनोदंडः समुच्चीयते इतिदिव्य
प्रकरणं प्रमाणंमानुषंदैवमितिभेदेनवर्णितं अधुनावर्ण्यतेदायविभागोयोग
मूर्तिना तत्रदायशब्देनयद्धनंस्वामिसंबंधादेवनिमित्तादन्यस्यस्वंभवतितदु
च्यते सचद्विविधः अप्रतिबंधः सप्रतिबंधश्च तत्रपुत्राणांपौत्राणांचपुत्रत्वे
नपौत्रत्वेनचपितृधनेपितामहधनेचस्वंभवतीत्यप्रतिबंधोदायः पितृव्य
भ्रात्रादीनांतुपुत्राभावेस्वाम्यभावेचस्वंभवतीतिपुत्रसद्भावः स्वामिस
द्भावश्चप्रतिबंधस्तदभावेपितृव्यत्वेनभ्रातृत्वेनचस्वंभवतीतिसप्रतिबंधो

६०

मानानामिसचीभियोगेषु प्रायश्चित्तार्पितानिलिसा[illegible]कामियोगेषु राजतेकारयेद्
मेमधर्मसीसकायसमितिप्रतिमाविधानंसीसकंवाभ्यायसंचेतिवक्ष्यतरमाह सि
तेनभूर्यपत्रेवापिधर्माधर्मौलिखितासितौ अभ्युक्ष्यपंचगव्येनगंधमाल्यैःसमर्चयेत् सि
तपुष्पस्तुधर्मःस्यादधर्मोसितपुष्पधृक् एवंविधायोपलिख्यपिंडयोस्तौनिधापये
त् गोमयेनमृदावापिपिंडौकार्यौसमंततः मृद्भांडकेऽनुपहतेस्थाप्योचानुपलक्षितो
उपलिप्तेशुचौदेशेदेवब्राह्मणसन्निधौ आवाहयेत्ततोदेवांल्लोकपालांश्चपूर्ववत्
त् धर्मावाहनपूर्वंतुप्रतिज्ञापत्रकंलिखेत्ततः यदिपापविमुक्तोहंधर्मस्त्वायातु
मेकरं इत्यभिशस्तोभिमंत्रपत्र अभियुक्तस्तयोश्चैकंप्रगृह्णीतविलंबितः धर्मग्र
हीतेशुद्धःस्यादधर्मेतुसहीयते एवंसमासतःप्रोक्तंधर्माधर्मपरीक्षणमिति इति
धर्माधर्मदिव्यविधिः अत्रैवचशपथाद्र्व्यारल्पत्वमहत्वविषयाजातिविशेषविष
याश्चमन्वादिभिरुक्ताः यथा निकेतुसत्यवचनंक्षोपादलंभनं त्रिकादर्वाक्पुष्पस्या
तत्कोशपानमतः परंसत्यनशापयेद्विप्रंवाहनायुधैः गोबीजकांचनैर्वैश्यंशूद्रंसर्वै
स्तुपातकैरसादयः अत्रचशुद्धिविभावनामनुनोक्ता। नचार्तिरच्छतेक्षिप्रंसज्ञेयः

136

राम

६७

139

लौकिकं चेत्स्वत्वं मनोनापहृतमितिनब्रूयात् अपहर्तुरेवस्वत्वात्ध्यानस्यस्वं
तेनापहृतमितिनापहर्तुः स्वं एवं नहि सुवर्णरजतादि स्वरूपवदस्यवास्वम
स्यवास्वमितिसंशयानस्यानस्माच्छास्त्रैकसमधिगम्यंस्वत्वमिति अत्रोच्यते
लौकिकमेवस्वत्वं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवत् आहवनीयादीनांहि
शास्त्रगम्यानामलौकिकक्रियासाधनत्वमस्ति नत्वाहवनीयादीनामपिपाको
दिसाधनत्वमस्त्येव नैतत् नहि तत्राहवनीयादिरूपेणपाकादिसाधनत्वं किं
तर्हि प्रत्यक्षादिपरिदृश्याग्न्यादिरूपेण इह तु सुवर्णादिरूपेण न क्रयादिसाध
नत्वमपितुस्वत्वेनैव नहियस्ययत्स्वंनभवति तत्तस्यक्रयाद्यर्थक्रियांसाधयति
अपिचप्रत्यंतवासिनामप्यदृष्टशास्त्रव्यवहाराणांस्वत्वव्यवहारोदृश्यते क्रय
विक्रयादिदर्शनात् किंचनियतोपायकंस्वत्वंलोकसिद्धमेवेतिन्यायविदोम
न्यते नयायाहिलिप्सासूत्रेतृतीयेवर्णकेद्रव्यार्जननियमानांक्रत्वर्थत्वेस्वत्वमेव
नस्यात्स्वत्वस्यलौकिकत्वादितिपूर्वपक्षासंभवमाशंक्यद्रव्यार्जनस्यप्रतिग्रहा-
हादिनास्वत्वसाधनत्वंलोकसिद्धमितिपूर्वःपक्षःसमर्थितोगुरुणानुच्चट

68

दायः एवंतत्पुत्रादिधर्मस्वत्वनीयः विभागोनामद्रव्यसमुदायविषयाणामनेक
स्वाम्यानांतद्देशेषुव्यवस्थापनं एतदेवाभिप्रेत्योक्तंनारदेनविभागोर्थस्यपैत्र
स्यपुत्रैर्यत्रप्रकल्प्यते दायभागइतिप्रोक्तं व्यवहारपदंबुधैरिति पैत्रस्येतिस्व
त्वनिमित्तसंबंधोपलक्षणं तनयैरितिसपिंडाद्युपलक्षणं इदमेवनिरूपणी
यं कस्मिन्कालेकस्यकथंकैश्चविभागःकर्तव्यइति तत्रकस्मिन्कालेकथंके
श्चेति तत्रतत्रश्लोकव्याख्यानएववक्ष्यते कस्यविभागइत्येतदिहत्वोच्यते किं
विभागात्स्वत्वस्यस्वत्वाद्विभागइति तत्रस्वत्वमेवतावन्निरूप्यते किंशास्त्रैकसम
धिगम्यंस्वत्वमुतप्रमाणान्तरसमधिगम्यमिति तत्रशास्त्रैकसमधिगम्यमितिता
वद्युक्तं गौतमवचनात् स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमेषुब्राह्मण
स्याधिकंलब्धंक्षत्रियस्यविजितंनिर्विष्टंवैश्यशूद्रयोरिति प्रमाणान्तरगम्य
स्वत्वेनेदंवचनमर्थवत्स्यात् तथायोदत्तादायिनोहस्तात्फलिप्सेतब्राह्मणोधनं
याजनाध्यापनेनापियथास्तेनस्तथैवसइत्युदत्तादायिनःसकाशाद्याजनादिद्वारे
णापिद्रव्यमर्जयतोदंडविधानमनुपपन्नंस्यात्स्वत्वस्यलौकिकत्वे अपिच

राम

138

68

कारः ॥ अधिगमो निध्यादेः प्राप्तिः एतेषु निमित्तेषु सत्सु स्वामी भवति ज्ञातेषु ज्ञायते
बुद्ध्यते स्वामी ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधि
कमसाधारणं क्षत्रियस्य विजितमिति अधिकमित्यनुवर्तते क्षत्रियस्य विजयदं
डादिलब्धमसाधारणं निर्विष्टं वैश्यशूद्रयोरिति अत्राप्यधिकमित्यनुवर्तते वै
श्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणं शूद्रस्य द्विजशुश्रूषादिना भृत्यारू
पेण यल्लब्धं तदसाधारणमेव सूत्रानामवसारस्यामि सादि तत्सर्वं निर्विष्टशब्देनो
च्यते सर्वस्यापि भृतिरूपत्वान्निर्वेशो भृतिर्भाग इति निर्विकोडी स्मरणात्तदसाधा
रणं वेदितव्यं यद्यपि पत्नी दुहितरश्चेत्यादिस्मरणं तत्रापि स्वामिसंबंधितया यावद्बुदाय
विभागित्तया प्राप्तेषु लोकप्रसिद्धोपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यं
यदपि मम स्वमनेनापहृतमिति ब्रूयात्स्वत्वस्य लौकिकत्वे हेतुः तदप्यसत् स्वत्वे हेतुभू
तक्रयादिसंदेहात्स्वसंदेहोपपत्तेः विचारप्रयोजनं तु यद्गर्हितेनार्जयंति कर्मणा धनं
तस्योत्सर्गेण शुध्यंति जप्येन तपसैव चेति शास्त्रोक्तसमधिगम्यस्वत्वे गर्हितेनासत्प्र
तिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति तस्य त्राणेन तद्विभाज्यमेव यदा तु

६७

आर्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संवर्तेत इति प्रलपितमिदं केनापि
अर्जनस्य स्वत्वं नापादयतीति विप्रतिषिद्धमिति वदता तथा सिद्धांतेपि स्वत्वस्य लौकिकत्व
मंगीकृत्यैव विचारप्रयोजनमुक्तं अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति अस्य
चार्थ एवं विवृतः यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतु
सिद्धिर्नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति न पुरुषस्य नियमातिक्रमदोषः
पूर्वपक्षे सिद्धांते तु अर्जननियमस्य पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्र
तुसिद्धिर्भवति पुरुषस्यैव नियमातिक्रमदोष इति नियमातिक्रमार्जितस्य स्वत्वमंगी

राम

कृतमन्यथा क्रतुसिद्ध्यभावात् चौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मंतव्यं
लोके तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादात् एवं प्रतिग्रहाद्युपायकं स्वत्वं
लौकिकं स्थिते ब्राह्मणस्य प्रतिग्रहाद्य उपायाः क्षत्रियस्य विजितादयः वैश्यस्य
कृष्यादयः शूद्रस्य शुश्रूषादयः स्वद्वार्थो नियमः रिक्थाद्यस्तु सर्वसाधारणाः
स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेष्विति उक्ताः तत्राप्रतिबंधो दायो रिक्थं क्रयः
प्रसिद्धः संविभागः सप्रतिबंधो दायः परिग्रहो नन्यपूर्वस्य जलतृणकाष्ठादेः स्वी

६७

143

पैतृके प्रतिस्थावरस्य प्रसाददानप्रतिषेधवचनं तदपि तामहोपात्तस्थावरविषयं
प्रतीतेः पितृाद्धनं पितापुत्रयोः साधारणं मणिमुक्तादि पितुरेव स्थावरं तु साधारण
मिति तस्मादेव वचनादवगम्यते तस्माज्जन्मना स्वत्वं किं तु स्वामिनानद्विभागदर्शनात्
अतएव पितुरूर्ध्वं विभागात्प्रागूर्ध्वस्य ग्रहेतैवादन्येन जगृहुमाणं न तीवार्थेनेति
चोद्यस्यानवकाशः तथैव पुत्रस्यापि पितृप्राप्तस्यादेव पुत्रस्य स्वत्वमिति नाविभा
गमपेक्षत इति अत्रोच्यते लोकप्रसिद्धमेव स्वत्वमित्युक्तं लोके च पुत्रादीनां ज
न्मनैव स्वत्वं प्रसिद्धतरं नापह्नवमर्हति विभागशब्दश्च बहुस्वामिकधनविषयः
प्रसिद्धो नान्यदीयविषये न प्रहीणविषयः तथा सर्वेऽपि स्वामित्वान्मने तेसा
चार्य इति गौतमवचनात् मणिमुक्ताप्रवालानामित्यादिवचनं च जन्मनास्व
त्वपक्ष एवोपपद्यते न च पितामहोपात्तस्थावरविषयमित्युक्तं न पिता न पि
तामह वचनात् पितामहस्यापि स्वार्जितमपि पुत्रे पौत्रे च सत्यदेयमिति वचनं
जन्मनास्वत्वं गमयति यथा परमते मणिमुक्तावस्त्राभरणादीनां पैतामहाना
मपि पितुरेव स्वत्वं वचनादेव तस्मात् जन्मना पित्रार्जितानामप्येतेषां पितुर्दाना

७०

स्वत्वं लौकिकं तद्द्वारा स्वत्वमिति ग्रहादिलब्धस्यापि स्वत्वात् तत्पुत्राणां तद्विभाज्यमेव तस्योत्प
न्नेऽप्युद्धृतीतिप्रायाश्चित्तमर्जयितुरेव तत्पुत्रादीनां तु दायत्वेन स्वत्वमिति तत्तेषां दोष
संबंधः सत्सवितागमाधर्म्यादायोलाभ्यः क्रमोजयः प्रयोग कर्मयोगश्च सत्प्रतिग्रह एव
वचेति मनुस्मरणात् इदानीमिदं संदिह्यते विभागात्स्वमुत स्वस्य सतो विभाग इति त
त्र विभागात्स्वमिति तावद्युक्तं जातपुत्रस्याधानविधानात् यदि जन्मनैव स्वत्वं स्यात्तदा
सन्नस्य पुत्रस्यापि तत्स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरनधिकारः स्या
त् तथा विभागात्प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्यते सर्वांशुमत्स्या
दत्तत्वाद्विभागप्राप्त्यभावात् यथाह शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् त्रीण्ये
तान्यविभाज्यानि प्रसादो यश्च पैतृक इति तथा भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि
तत्र साय यथाकाममश्नीयाद्द्याद्वा स्थावराद्दृत इति प्रीतिदानवचनं नोपपद्यते जन्म
नैव स्वत्वे न च स्थावरादृतेऽपदत्तमिति संबंधोपुक्तो व्यवहितयोजनाप्रसंगात् यद
पि मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः स्थावरस्य तु सर्वस्य न पिता न पितामह
हः तथापि तत्प्रसादाद्व्ययेतवस्त्राभरणानि च स्थावरं तु न भुंजेत प्रसादे सति

142

राम

७०

145

कुर्यादिति यत्तु वचनं विभक्ता वाविभक्ता वा: सपिंडाः स्थावरे समाः एकोप्यनीशः स
र्वत्र दानाधमनविक्रयइति तदप्यविभक्तेषु द्रव्यसमर्थ्यस्यौर्ध्वदेहिकस्यानीश्वरत्वात्स
र्वाभ्यनुज्ञावमं कार्या विभक्तेषु तूत्तरकाले विभक्ताविभक्तसंशयव्युदासेन व्यवहा
रसौकर्याय सर्वाभ्यनुज्ञानं पुनरेकस्यानीश्वरत्वेनाविभक्तानुमतिं व्यतिरेकेणापि
व्यवहारः सिध्यत्येवेति व्याख्येयं यदपि स्वग्रामज्ञातिसामंतदायादानुमतेन च हि
रण्योदकदानेन षड्भिर्गच्छति मेदिनीति तत्रापि ग्रामानुमतिः प्रतिग्राहः प्रकाशः स्था
वरस्य विशेषनतरिति स्मरणं व्यवहारप्रकाशनार्थमेवापेक्ष्यते न पुनर्ग्रामानु
पयसा विना व्यवहारासिद्धिः सामंतानुमतिस्तु सीमाविप्रतिपत्तिनिरासाय ज्ञातिदा
यादानुमतेस्तु प्रयोजनमुक्तमेव हिरण्योदकदानेन तु स्थावरे विक्रयो नास्ति कु
र्यादाधमनं इति स्थावरस्य विक्रयप्रतिषेधात् भूमिपः प्रतिगृह्णाति यस्तु भूमिं प्र
यच्छति उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ इति दानप्रशंसादर्शनाच्च वि
क्रयेपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः येत्त
के पैतामहे च धनेन्नेमनेव स्वत्वेपि विशेषं मूल्यं पितामहे पितृतत्र वक्ष्यामः इदानी

७१ धिकारीवचनादिसाविशेषः यत्तु मनुनोक्तं प्रीतेनैनसादिविसृष्टं च नेस्थावरस्य प्रीति
दानज्ञापनं तत्स्वोपार्जितस्यापि पुत्राद्यनभ्यनुज्ञयैवेति व्याख्येयं पूर्वोक्तैर्मालिमुक्ता
दिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वेनश्रूयमाणत्वात् यदप्यर्थसाध्येषु
वैदिकेषु कर्मस्वनधिकार इति तत्र न विधानबलादेवाधिकारो गम्यते न स्मार्तेष्वेव
के पैतामहे च द्रव्ये जन्मनैव स्वत्वं तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिके
षु प्रसाददानकुटुंबभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वा
तंत्र्यमिति स्थितं स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतंत्र्यमेव स्था
वरं द्विपदं चैव यद्यपि स्वयमर्जितं असंभूय सुतान्सर्वान्न दानं न च विक्रयः ये जा
ता ये च्याजाता ये च गर्भे व्यवस्थिताः वृत्तिं च ते भिकांक्षंति न दानं न च विक्रय इत्यादि
स्मरणात् अस्यापवादः एकोपि स्थावरे कुर्याद्दानाधमनविक्रयं आपत्काले कुटुं
बार्थे धर्मार्थे च विशेषत इति अस्यार्थः अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु वानुज्ञानादा
वसमर्थेषु भ्रातृषु वा तथाविधेषु विभक्तेष्वपि सर्वेकुटुंबव्यापिन्यामापदि तत्पोष
णे वावश्यकर्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोपि समर्थः

144

राम

पितर्युपरतस्पृहे इति दर्शितं अत्र पुत्रा धनं समं विभजेयुरित्यनुषज्यते गौतमेनापि
ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन्निवृत्ते चापि रजसि तिष्ठति द्वितीयः कालो दर्शितः
जीवति चेच्छतीति तृतीयः न चास्य रजस्कायामपि पितर्यधर्मवर्त्तिनि दीर्घरोगग्रस्ते च
पुत्राणामिच्छया भवति विभागः यथाह शंखः अकामे पितरि रिक्थविभागो वृद्धे विपरी
तचेतसि रोगिणि चेति पितुरिच्छया विभागो द्विधा दर्शितः समो विषमश्च तत्र समविभा
गे विशेषमाह यदि कुर्यात्समानंशान्पत्न्यः समांशिकाः न दत्तं स्त्रीध आह दर्शितः समो
विषमश्च तत्र समविभागे विशेष नं यासां भर्त्रा वा श्वसुरेण वा यदा स्वेच्छया पिता
सर्वानेव सुतान्समभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्त्तव्याः यासां
पत्नीनां भर्त्रा श्वसुरेण वा स्त्रीधनं न दत्तं दत्ते तु स्त्रीधने वक्ष्यति दत्ते त्वर्द्धं प्रकल्पयेदिति
यदा तु ज्येष्ठभागादिना ज्येष्ठादीन्विभजति तदा पत्न्यः श्रेष्ठादिभागं न लभन्ते किं तु य
तोद्धारात्समुदायात्समानेवांशाल्लभन्ते स्वोद्धारश्च यदाह आपस्तंबः परिभांडं च गृहेऽ
लंकारो भार्यायाः इति ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिन इति पक्षद्वयेऽप्यपवाद
माह शक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया स्वयमेव द्रव्यार्जनसमर्थस्य पितृद्र

७२

यस्मिन्काले येन च यथा विभागः कर्त्तव्यस्तद्दर्शयन्नाह विभागं चेत्पिता कुर्यादिच्छया वि
भजेत्सुतान् ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः यदा विभागं पिता चिकीर्षति
तदा इच्छया विभजेत्सुतानात्मनः सकाशात्पुत्रैः पुत्रान् इच्छायाः निरंकुशत्वाद
नियमप्राप्तौ नियमार्थमाह ज्येष्ठं वा श्रेष्ठभागेनेति ज्येष्ठं श्रेष्ठभागेन मध्यमं मध्य
भागेन कनिष्ठं कनिष्ठभागेन विभजेदित्यनुवर्त्तते श्रेष्ठादिविभागश्च मनुनोक्तः
ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याच्च यद्वरं ततोऽर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयस
इति वा शब्दो वक्ष्यमाणापेक्षः सर्वे वा स्युः समांशिनः सर्वे वा ज्येष्ठादयः
समांशभाजः कर्त्तव्याः अयं च विषमो विभागः स्वार्जितद्रव्यविषयः पितृक्रमाया राम
ते तु समस्वाम्यस्य वक्ष्यमाणत्वान्नेच्छया विषमो विभागो युक्तः विभागं चेत्पिता
कुर्यादिति यदा पितुर्विभागेच्छा स तावदेकः कालः अपरोऽपि जीवत्यपि पितरि द्रव्य
निस्पृहे निवृत्तरमणे मातरि वा निवृत्तरजस्कायां पितुरनिच्छायामपि पुत्रेच्छयैव वि
विभागो भवति यथा नारदेन अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं सममिति पित्रोरू
र्द्ध्वं विभागं प्रतिपाद्य मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च निवृत्ते वापि रमणे

149

येभ्यस्त्वपृथक् ज्येष्ठं तज्ज्येष्ठाय दातव्यं तदर्द्धं चत्वारिंशत्तमो भागो मध्यमाय यावद्दातव्यं तुरीय
मसौ इति तमो भागो हीने च द्रव्यके निष्कापदातव्यमिति मातापित्रोरूर्द्ध्वं विभाजतामुद्धारवि
भागो मनुना दर्शितः यथा उद्धारेनुद्धृते त्वेषामियं स्यादंशकल्पना एकाधिकं हरेज्ज्येष्ठः पुत्रो
ध्यर्द्धं ततोनुजः अंशमंशं यवीयांस इति धर्मो व्यवस्थितः इति ज्येष्ठस्य द्वौ भागौ तदनन्तर
दनन्तरजातस्य सार्द्ध एको भागस्ततोनुजानामेकैको विभाग इत्युद्धारव्यतिरेकेणापि विष
मो विभागो दर्शितः पित्रोरूर्द्ध्वं विभाजतां जीवद्विभागे च स्वयमेव विषमो विभागो दर्शितो
ज्येष्ठं वा श्रेष्ठभागेनेति अतः सर्वस्मिन्नपि काले विषमो विभागोस्तीति कथं सममेव वि
भजेरन्निति नियम्यते अत्रोच्यते सत्यमयं विषमो विभागः शास्त्रदृष्टस्तथापि लोकवि
द्विष्टत्वान्नानुष्ठेयः अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नतु इति निषेधात् यथा महोक्षं
वा महाजं वा श्रोत्रियायोपकल्पयेदिति विधानेपि लोकविद्विष्टत्वादननुष्ठानं यथा च मै
त्रावरुणीं गां दशामनुवन्ध्यामालभेतेति भागवालभन विधानेपि लोकविद्विष्टत्वादन
नुष्ठानं उक्तं च यथा नियोगधर्मेनिनानुबन्ध्यावधोपि वा तथोद्धारविभागोपि नैव संप्र
प्रतिवर्त्तते इति आपस्तम्बोपि जीवन्वस्तु पुत्रेभ्यो दायं विभजेत्सममिति स्वमतमुक्तोज्ये
ष्ठो दायाद इत्येके [illegible] देशविशेषेसु

७२

[illegible] यो विभागः कर्तव्यः पित्रा
नुसुत्रादीनां दायजिघृक्षमाभूदिति ज्येष्ठं वा श्रेष्ठभागेनेति न्यूनाधिकविभागो दर्शितस्त
त्रेशास्त्रोक्तोद्धारादिविषमविभागव्यतिरेकेणान्यथा विषमविभागनिषेधार्थमाह न्यू
नाधिकविभक्तानां धर्म्यः पितृकृतः स्मृतः न्यूनाधिकविभागेन विभक्तानां पुत्राणां
सोन्यूनाधिकविभागो यदि धर्म्यः शास्त्रोक्तो भवति तदासौ पितृकृतः कृत एव न नि
वर्त्तते इति मन्वादिभिः स्मृतः अन्यथा पितृकृतोपि निवर्त्तत इत्यभिप्रायः यथाह ना
रदः व्याधितः कुपितश्चैव विषयासक्तमानसः अन्यथा शास्त्रकारी च न विभागे
पिता प्रभुरिति इदानीं विभागस्य कालान्तरं कर्त्तारं प्रकारनियमं च हत्वा विभजेरन्सु राम
ताः पित्रोरूर्द्ध्वं रिक्थमृणं समं पित्रोर्मातापित्रोरूर्द्ध्वं प्रायणादिति कालो दर्शितः सु
ता इति कर्त्तारो दर्शिताः सममिति प्रकारनियमः सममेव रिक्थमृणं च विभजेरन्
नूर्द्ध्वं पितुश्च मातुश्च समेत्य ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः शेषास्तमुप
जीवेयुर्यथैव पितरं तथेत्युक्तो ज्येष्ठस्य विशेषोद्धारः सर्वद्रव्याच्च यद्वरं ततोर्द्धं मध्य
मस्य स्यात्तुरीयं तु यवीयस इति सर्वस्माद्द्रव्यसमुदायाद्विंशतितमो भागः सर्वद्र

148

ज्येष्ठो वा कनिष्ठो वा मध्यमो वा पितरि प्रेते वायवीयसी वर्षीयसां चेति व्याख्यानेन पितरि
सत्यसति च मैत्रादीनां विभाज्यत्वप्रसक्तौ तद्विधीयत इति तस्मात् नसत्वप्रसक्तस्य प्रतिषेधः
किंतु सिद्धस्यैवानुवादोयं लोकसिद्धस्यैवानुवादकान्येव प्रायेणास्मिन् प्रकरणे वचना
नि अपवादसमवैतस्तुपत्नासंसर्गे न तत्स्वमासिन इत्ति प्रसक्तस्यापवाद इति संक्षेपस्तु भवा
नु अत्रत्त्र पत्निकंचित्सितनरि प्रेत इत्यस्मिन्वचने ज्येष्ठादिपदाविवक्षया प्राप्तैरित्ति व्यामो
हमात्रं अत्तो मैत्रादिवचनैः पितुः ऊर्ध्वं वा विभाज्यत्वेनोक्तस्य पाक्षिकत्वे सितरि प्रेत इत्यस्य
वाद इति व्याख्येयं तथा अस्मदप्यविभाज्यमुक्तं मनुना वस्त्रं पत्रमलंकारं कृतान्नमुद
कं स्त्रियः योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते इति धृतानामेव वस्त्राणामविभाज्य
त्वं पर्यधानधृतं तत्तस्यैव पितृधृतानि तु पितुरूर्ध्वं विभजतां श्राद्धभोक्त्रे दातव्यानि यथा
ह बृहस्पतिः वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकं गंधमाल्यैः समभ्यर्च्य श्राद्धभो
क्त्रे तद्दापयेदिति अभिनवानि तु वस्त्राणि विभाज्यान्येव पत्रं वाहनमश्वशिविकादि त
दपि यद्येनारूढं तत्तस्यैव पित्र्यं तु वस्त्रवदेव अश्वादीनां बहुत्वे तु तद्विक्रयोपजीविनो
विभाज्यत्वमेव वैषम्येणाविभाज्यत्वं ज्येष्ठस्य अजाविकं सैकशफं न जातु विषमं भजेत् अ
जाविकं सैकशफं ज्येष्ठस्यैव विधीयत इति मनुस्मरणात् अलंकारोपि योयेन धृतः

७५

रादिविवाहेषु पल्लब्धं तथा पितृद्रव्याव्ययेन यत्क्रमायतमुद्धृतं तथा पितृद्रव्याव्ययेन लब्धं यया
विद्यया च लब्धं तत्सर्वं सर्वैर्भ्रातृभिः पित्रा च न विभजनीयं तथा पितृद्रव्याविरोधेन तु
स्य सर्वशेषत्वादेव पितृद्रव्याविरोधेन प्रतिग्रहलब्धमपि विभजनीयं अस्य च सर्वशे
षत्वाभावे मैत्रमौद्वाहिकमित्यादिनारब्धव्यं अथ पितृद्रव्याविरोधेनापि यन्मैत्रादिलब्धं
तस्याविभाज्यत्वार्थं मैत्रादिवचनमर्थवदित्युच्यते तथा सति समाचारविरोधः विद्यालब्धे
नारदवचनविरोधश्च कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः भागं विद्याधनात्तस्मा
ल्लभेताश्रुतोपि सन्निति तथा विद्याधनस्याविभाज्यस्य लक्षणमुक्तं कात्यायनेन प
रभक्तोपयोगेन विद्याप्राप्तान्यतस्तु या तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यत इति तथा

राम

पितृद्रव्याविरोधेनेत्यस्याभिन्नवाक्यत्वे प्रतिग्रहलब्धस्याविभाज्यत्वं समाचारविरुद्धमा
पद्येत एतदेव स्पष्टीकृतं मनुना अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जयेत् दायादे
भ्यो न तद्दद्याद्विद्यया लब्धमेव चेति श्रमेणासेवायुद्धादिना ननु पितृद्रव्याविरोधे
न यन्मैत्रादिलब्धं द्रव्यं तदविभाज्यमिति न वक्तव्यं विभागप्राप्त्यभावात् यद्येन लब्धं त
तस्यैव नान्यस्येति प्रसिद्धतरं प्राप्तिपूर्वकश्च प्रतिषेधः अत्र कश्चिदिदं प्राप्तिमाह य-
त्किंचित्सितरि प्रेते धनं ज्येष्ठोधिगच्छति भागो यवीयसां तत्र यदि विद्यानुपालिन इति

स्यात्क्षत्रियादिपुत्रविषयं न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै यद्यप्येषां पिता दद्या
न्मृते विप्रासुतो हरेदिति स्मरणम् याज्ञे याजनलब्धं पितृप्रसादलब्धं स्याविभाज्यत्वं
वक्ष्यते नियमात्तेन मार्जितस्याविभाज्यत्वमनेनैव निरासि पितृद्रव्याविरोधेनय
दर्जितं तद्विभजनीयमित्युक्तं स्थितं तत्रार्जकस्य भागद्वयं वसिष्ठवचनात् येन चैषां स्व
यमुपार्जितं स्यात्स द्व्यंशमेव लभेतेति अस्यापवादमाह सामान्यार्थसमुत्थाने वि
भागस्तु समः स्मृतः अविभक्तानां भ्रातॄणां साधारणस्यार्थस्य स्पष्टविवाहिज्यादिना स
मुत्थाने सम्यग्वर्द्धने केनचित्कृते सम एव विभागो नार्जयितुरंशद्वयं पितृद्रव्ये पुत्राणां
विभागो दर्शितः इदानीं पैतामहे पौत्राणां विभागे विशेषमाह अनेकपितृकाणां तु पि
तृतो भागकल्पना यद्यपि पैतामहे द्रव्ये पौत्राणां जन्मना स्वत्वं पुत्रैरविशिष्टं तथापि ते
षां पितृद्वारेणैव पैतामहद्रव्यविभागकल्पना न स्वरूपापेक्षया एतदुक्तं भवति य
दा विभक्ता भ्रातरः पुत्रानुत्पाद्य परोक्षं गतास्तत्रैकस्य द्वौ पुत्रावन्यस्य त्रयोपरस्य
चत्वार इति पौत्राणां वैषम्ये तत्र द्वावेकं स्वपित्र्यंशं लभेते अन्ये त्रयोप्येकमंशं पित्र्यं
चत्वारोप्येकमेवांशं पित्र्यं लभन्त इति तथा केषुचित्पुत्रेषु ध्रियमाणेषु केषुचित्सु

स्तस्यैव अधृतस्तु साधारणो विभाज्य एव पत्युर्जीवति यः स्त्रीभिरलंकारो धृतो भवेत् न
तं भजेरन्दायादा भजमानाः पतन्ति तदिति अलंकारो धृतो भवेदिति विशेषणोपादानादधृ
तानां विभाज्यत्वं गम्यते कृतान्नं तण्डुलमोदकादि तदप्यविभाज्यं यथासंभवं भोक्तव्यं
उदकं उदकाधारः कूपादिस्तच्च विषममूल्यादिद्वारेण न विभाज्यं पर्यायेण पयो भोक्तव्यं
स्त्रियश्च दास्यो विषमा न मूल्यद्वारेण विभाज्याः पर्यायेण कर्म कारयितव्याः अवरु
द्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः स्त्रीपुंसंग अवरुद्धास्त्वविभाग
इति गौतमस्मरणात् योगक्षेमयोगशब्देनालब्धलाभकारणं श्रौतस्मा
र्ताग्निसाध्यमिष्टकर्म लक्ष्यते क्षेमशब्देन लब्धपरिरक्षणहेतुभूतं वहिर्वेदिदानतडा रामं
गारामनिर्माणादि पूर्वकर्म लक्ष्यते तदुभयं पैतृकमपि पितृद्रव्याविरोधेनार्जितमवि
भाज्यं यथाह लौगाक्षिः क्षेमं पूर्त्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः अविभाज्ये च ते प्रो
क्ते शयनासनमेव चेति योगक्षेमशब्देन योगक्षेमकारिणो राजमंत्रिपुरोहितादय उ
च्यन्त इति केचित् शस्त्रचामरछत्रोपानत्प्रभृतय इत्यन्ये प्रचारो गृहारामादिषु प्रवेश
निर्गममार्गः सोप्यविभाज्यः यत्तूशनसा क्षेत्रस्याविभाज्यत्वमुक्तं अविभाज्यं सगो
त्राणामासहस्रकुलादपि याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः इति तद्ब्राह्मणो

ननिषेधाधिकारस्तत्परतंत्रत्वादनुमतिस्तु कर्तव्या तथाहि पैतृके पैतामहे च स्वाम्यं
यद्यपि जन्मनैव तथापि पैतृके पितृपरतंत्रत्वात्पितुश्चार्जकत्वेन प्राधान्यात्पित्रा विनियुज्य
माने स्वार्जिते द्रव्ये पुत्रेणानुमतिः कर्तव्या पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति नि
षेधाधिकारोप्यस्तीति विशेषः मनुरपि पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् न त
त्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितमिति यत्पितामहार्जितं केनाप्यपहृतं यदि पि
ताहरति तत्स्वार्जितमिव पुत्रैः सार्द्धमकामः स्वयं न विभजेदिति वदन्नपि पिता
महार्जितमकामोपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति विभागोत्तरकालमु
त्पन्नस्य कथं भागकल्पनेत्यत आह विभक्तेषु सुतो जातः सवर्णायां विभागभाक्
विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक् विभज्यत इति विभा
गः पित्रोर्भागस्तं भजत इति विभागभाक् पित्रोरूर्ध्वं तयोरंशं लभत इत्यर्थः मातुर्भाग
श्चासत्यां दुहितरि मातुरिह हितरः शेषं स्युस्ते चोक्तः असवर्णायामुत्पन्नस्तु स्वांशमे
व पित्र्याल्लभते मातृकं तु सर्वमेव एतदेव मनुनोक्तं ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव
हरेद्धनमिति पित्रोरिदं पित्र्यमिति व्याख्येयं अनीशः पूर्वजः पित्रोर्भ्रातुर्भागे वि

७७

त्रानुसाधनिनष्टे घ्यय्यमेवन्यायो प्रियमाणास्वानेशाल्लभेते नष्टानामपि पुत्राः पित्रा
नैवांशं लभेत इति वाचनिकी व्यवस्था अधुना विभक्ते पितर्यविद्यमाने भ्रातृके चा पौ
त्रस्य पैतामहे द्रव्ये विभागो नास्ति प्रियमाणे वितरि पितृतो भागकल्पनेत्युक्तत्वात् भ
वन्वास्वार्जितवत्पितुरिच्छयैवेत्याशंकित आह भूर्याः पितामहोपात्ता निबंधो द्रव्यमेव वा
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैव हि भूः शालिक्षेत्रादिका निबंधः एकस्य पर्णभर
कस्येयंति पर्णानि तथैकस्य क्रमुकफलानीत्यादुक्तलक्षणं द्रव्यं सुवर्णरजतादि
यत्पितामहेन प्रतिग्रहविजयादिना लब्धं तत्र पितुः पुत्रस्य च स्वाम्यं लोकप्रसिद्धमि
ति तत्वाविभागोस्ति हि यस्मात्समदृशं समानं तस्मात्पितुरिच्छयैव विभागो नापि
पितुर्भागद्वयं अतश्च पितृतो भागकल्पनेत्येतत्साम्ये समेपि वाचनिकं विभागं चेत्सि
ताकुर्यादित्येतत्स्वार्जितविषयं तथा दायेशौ पत्नीपथ्ये न विभजेन्मात्मनः पितेत्येतद
पि स्वार्जितविषयं जीवतोरस्वतंत्रस्यात् जरयापि समन्वितः इत्येतदपि पारतंत्र्यमानापि
त्रर्जितद्रव्यविषयं तथाऽनीशास्ते हि जीवतोरित्येतदपि तथा च सरजस्कायां मातरि स
स्पृहायां च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पितामहद्रव्यविभागो भवति तथा विभक्ते
न पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेप्यधिकारः पित्रर्जिते तु

राम

भार्यायामप्रजस्य ऽस्पष्टगर्भायां विभागादूर्ध्वमुत्पन्नस्यापि वेदितव्यं स्पष्टगर्भायां तु प्र
सवं प्रतीक्ष्य विभागः कर्तव्यः यथाह वशिष्ठः अथ भ्रातॄणां दायविभागो याश्चानप
त्यास्त्रियस्तासामापुत्रलाभादिति गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमित्यर्थः जनो
यं विभक्तजः पित्र्यमात्रकं च सर्वं धनं गृह्णातीत्युक्तं तत्र यदि विभक्ताः पिता माता वा वि
भक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति तत्र विभक्तजेन दानप्रतिषेधो न क
र्तव्यो नापि दत्तं प्रत्याहर्तव्यमित्याह पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् माता
पितृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यद्दत्तमलंकारादि तत्तस्यैव पुत्रस्य न विभ
क्तजस्य स्वं भवति न्यायसाम्यात् विभागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव तथा सति विभ
क्तयोः पित्रोरंशान्ते दूर्ध्वं विभजन्तां यस्य यद्दत्तं तत्तस्यैवेति वेदितव्यं जीवद्विभागे त्वपु
त्रस्य मातांशित्वं पत्नीनामुक्तं यदि कुर्यात्समानंशानित्यादिना पितुरूर्ध्वं विभागे पि
त्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् पि
तुः प्रायणादूर्ध्वं विभजतां माताऽपि स्वपुत्रांशसममंशं हरेत् यदि स्त्रीधनं न दत्तं द
त्ते त्वर्धांशहारिणीति वक्ष्यते पितरि प्रेते येषां संस्कृता भ्रातरः संतीनत्तं संस्कारे

भक्तज इति स्मरणात् मातापित्रोर्भागो विभागादूर्ध्वं संजातो न स्वामी विभक्तजस्य भ्रा
तुर्भागे न स्वामीत्यर्थः तथा विभागोत्तरकाले पित्रा यत्किंचिदर्जितं तत्सर्वं विभक्तज
स्यैव पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं विभक्तजस्य तत्सर्वं अनीशाः पूर्वजाः
स्युः जाता इति स्मरणात् ये च विभक्ताः पित्रा सह संसृष्टास्तैः सार्द्धं विभक्तजो विभजे
त् यथाह मनुः संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति पितुरूर्ध्वं पुत्रेषु विभक्ते
षु पश्चादुत्पन्नस्य कथं भागकल्पनेत्यत आह दृश्याद्वा तद्विभागः स्यात्
स्यादायव्ययविशोधितात् तस्य पितरि प्रेते भ्रातृविभागसमये ऽस्पष्टगर्भायां मा
तरि भ्रातृविभागोत्तरकालमुत्पन्नस्य विभागः स्याद्विभागः कुतः इत्यत आह दृश्या राम
द्भ्रातृभिर्गृहीताद्धनात्तत्कोशादायव्ययविशोधितात् आयः प्रतिदिवसं प्रतिमा
सं प्रतिसंवत्सरं वा यदुत्पद्यते व्ययः पितृकृतऋणापाकरणं ताभ्यामायव्ययाभ्यां यच्छोधितं
तस्मादुद्धृत्य नष्टभागो दातव्यः स्यात् एतदुक्तं भवति प्रातिस्विकेषु भागेषु पुनरुद्धृत्य समा
ये प्रवेश्य पितृसत्त्ववर्णमपनीयानि यावि शिष्टेभ्यः स्वेभ्यो भागेभ्यः किंचित्किंचिदु
द्धृत्य विभक्तजस्य भागः स्वभागसमः कर्तव्य इति एतच्च विभागसमये भ्रात

161

दत्वावशिष्टं सर्वे पुत्रा गृह्णीयुः एवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च योज
नीयं यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्यैका तत्रापि पित्र्यं द्रव्यं सप्तधा विभज्य क्ष
त्रियापुत्रभागांस्त्रींश्चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्वा शेषं ब्राह्मणीपु
त्रो गृह्णातीति यदा तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यमथ नमेका तत्रापि पित्र्यं
धनमेकादशधा विभज्य तेषु त्रीनंशान् क्षत्रियापुत्रभागांश्चतुर्धा विभज्य चतुर्थमं
शं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णीतः एवं जातिवैषम्ये
भ्रातृणां भगिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयं न च दत्वांशं तु
रीयकमिति तुरीयांशविवक्षया संस्कारमात्रोपयोगि द्रव्यं देयमिति व्याख्या
नं युक्तं मनुवचनविरोधात् स्वेभ्योंशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्
स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः अस्यार्थः ब्राह्मणादयो भ्रा
तरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंशेभ्यश्चतुरं
शानुहरेद्विप्रः स्यादिवक्ष्यमाणेभ्यः स्वात्स्वादंशादात्मीयादात्मीयाद्भागाच्च
तुर्थं चतुर्थं भागं दद्युः न चात्रात्मीयभागाद्दुहितृस्य चतुर्थांशो देय इत्युच्यते

७७

कोधिकमिमनतरुस्यजमोल असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः पितुरूर्ध्वं
विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः असंस्कृ
तासु भगिनीषु विशेषमाह भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं अस्यार्थः भगि
न्यश्चासंस्कृताः संस्कर्तव्या भ्रातृभिः किं कृत्वा निजादंशाच्चतुर्थमंशं दत्वा अने
न दुहितरोपि पितुरूर्ध्वमंशभागिन्य इति गम्यते तत्र निजादंशादिति प्रत्येकपरिक
ल्पितादंशादुद्धृत्य चतुर्थांशो दातव्य इत्ययमर्थो न भवति किन्तु यज्जातीया कन्या त
ज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कर्तव्या एतदुक्तं भवति यदि ब्राह्मणी सा
कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थो भागस्तस्या भवतीति तद
था यदि कस्यचित् ब्राह्मणस्यैक एव पत्नीपुत्रश्चैकः कन्या चैका तत्र पित्र्यं सर्वमेव द्र
व्यं द्विधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयांशं कन्यायै दत्वा शेषं पुत्रो गृह्णी
यात् यदा तु द्वौ पुत्रावेका कन्या तदा पितृधनं सर्वं त्रिधा विभज्य तत्रैकं भागं चतुर्धा
विभज्य तुरीयमंशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः अथ त्वेकः पुत्रो द्वे क
न्ये तदा पित्र्यं धनं त्रिधा विभज्य एकं भागं चतुर्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां

160

राम

165

वयवेषु गृह्यमाणेष्ववर्ज्जनीयत्तयामाषावयवा अपि ग्रहीतव्ये इति निषेधः प्रविशन्त्येवेति राद्धां
तितोक्तं तस्माद्वचनतोऽन्याय तत्त्वसाधारणद्रव्यापहारे दोषोऽस्त्येवेतिस्थितं द्व्यामुष्याय
णस्य भागविशेषदर्शयंस्तस्य स्वरूपमप्याह अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उ
भयोरप्यसौ रिक्थी पिंडदाता च धर्मतः अपुत्रेण गुर्वनुज्ञातस्त्वस्या युक्तविधिना अपुत्रेण च
देवरादिना परक्षेत्रे परस्य भार्यायां पुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजिक्षेत्रिणोः स्वत्तो
रिक्थी रिक्थहारी पिंडदाता च धर्माद्वस्यार्थः यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रो
अपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति सद्विरक्तो द्व्यामुष्यायणो द्वयोरपि
रिक्थहारी पिंडदाता च यदा तु नियुक्तः पुत्रवान् केवलं क्षेत्रिणः पुत्रार्थं प्रयातुं तेनतु
तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति न बीजिनः स्वचन नियमेन बीजिनो रिक्थहारी पिंडदो
वेति यथोक्तं मनुना क्रियाभ्युपगमात्त्वेव बीजार्थं यत्प्रदीयते तस्येह भागिनो दृष्टौ बीजी
क्षेत्रिक एव चेति क्रियाभ्युपगमादिति अत्रोत्पन्नमपत्यमावयोरुभयोरपि भवत्विति सं
विदंगीकरणं यत्तत्र क्षेत्रे स्वामिना बीजवपनार्थं बीजिने दीयते तत्र तस्मिन् क्षेत्र उत्पन्न
स्यापत्यस्य बीजिक्षेत्रिणौ भागिनौ स्वामिनौ दृष्टौ महर्षिभिः तथा फलं त्वनभिसंधा
य क्षेत्रिणां बीजिनां तथा प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसीति फलं त्वनाभिसं

८१

धानं विभक्तेऽपि तद्धने यद्दत्पत्तेन तत्समेऽंशेऽस्विभजेरनृणतिर्वास्यति: शास्त्रमर्यादा अत्रसमे
ऽंशेऽरिति वदत्ता उद्धारविभागो निषिद्धः विभजेरन्निति वदता येनद्रव्यं पतते नैव तन्या ह्यमिति द
र्शितं एवं वचनस्यार्थवत्त्वात्समुदायद्रव्यापहारे दोषाभावपरत्वं ननु मनुना ज्येष्ठस्यैवस
मुदायद्रव्यापहारे दोषो दर्शितः न कनीयसां यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः सो
ज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिरिति वदता नैतत्तद्यतः संभाविततस्वातंत्र्यस्य पितृ
स्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतंत्राणां कनीयसां पुत्रस्थानीयानां दण्डभूपिकनी
यसां सुतरां दोषो दर्शित एव तथा चाविशेषेणैव दोषः श्रूयते यो वै भागिनं भागान्नुदते च्यवते

164

चैनं स यदि चैनं न च्यवते द्व्यपुत्रमथ पौत्रं च्यवत इति यो भागिनं भागार्हं भागान्नुदते भागाद 	राम
पाकरोति भागेनस्मेन मयच्छति स भागान्नुत्तएनं नोतारं च्यवते नाशयति दोषिणं करोति
यदि तेन नाशयति तदा तस्य पुत्रं वा नाशयतीति ज्येष्ठविशेषमंतरेणैव साधारणद्रव्यापहा
रिणो दोषः श्रुतः अथ साधारणं द्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्ध्या गृह्यमाणं न दोषमा
वहतीति मतं तदसत्स्वबुद्ध्या यहीतोऽप्यवर्ज्जनीयतया परस्वमपि गृहीतमेवेति निषे
धानुप्रवेशाद्दोषमावहत्येव यथा मौद्गे चरौ विपन्ने सदृशपक्कमाषेषु गृह्यमाणेष्वयपि
यामौषा इति निषेधो न प्रविशति मुद्गावयव बुद्ध्या गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गा

स्त्राणि कौमारब्रह्मचारिणां दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् मृते भर्तरि साध्वी स्त्री
ब्रह्मचर्ये व्यवस्थिता स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः अपत्यलोभाद्या तु स्त्री भर्ता
रमतिवर्तते सेह निन्दामवाप्नोति परलोकाच्च हीयत इति पुत्रार्थं पुरुषान्तराश्रयणं निषेधति
तस्मादिहि न प्रतिषिद्धत्वाद्विकल्प इति न युक्तम् एवं विवाहसंस्कृतानां नियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो
नियोग इत्यत आह यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः तामनेन विधानेन नि
जो विन्देत देवरः यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् मिथो भजेताप्रसवात्सकृत्सकृ
दृतावृतौ यस्यै वाग्दत्ता कन्या सा प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेव गम्यते तस्मिन्प्रे
ते देवरस्तस्य ज्येष्ठः कनिष्ठो वा निजः सोदरो विन्देत परिणयेत् यथाविधि यथाशास्त्रमधिग
म्य परिणीयानेन विधानेन घृताभ्यङ्गवाग्नियमादिना शुक्लवस्त्रां शुचिव्रतां मनोवाक्काय
संयतां मिथो रहस्यागर्भग्रहणात्प्रत्यृतु एकैकवारं गच्छेत् अयं च विवाहो वाचनिको घृताभ्यङ्गा
दिनियमवत्पुत्राभिगमनाङ्गमिति न देवरस्य भार्यात्वमापादयत्यनेन तदुत्पन्नमपत्यं क्षेत्र
स्वामिन एव भवति न देवरस्यास्य विवाहस्य नयोरपि समानासमानजातीयानां पुत्राणां विभागक्र
सिरक्तोऽधुना मुख्यगौणपुत्राणां दायग्रहणाय च स्यां दर्शयितुं स्वस्वरूपं तावदाह औ
रसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा

167

धायेति अन्तो सत्त्वमपत्यमावयोरनयोरस्त्विति एवमनभिसन्धाय परक्षेत्रे यदपत्यमुत्पाद्यते
तदपत्यं क्षेत्रिण एव यतो बीजाद्योनिर्बलीयसी गवाश्वादिषु तथा दर्शनात् अत्रापि नियोग
वाग्दत्ताविषय एव इतरस्य नियोगस्य मनुना निषिद्धत्वात् देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नि
युक्तया प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये विधवायां नियुक्तस्तु घृताक्तो वाग्यतो
निशि एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन एवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति
नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सना
तनं नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् न विवाहविधावुक्तं विधवावेदनं पुनः
अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति स महीं
मखिलां भुञ्जन्राजर्षिप्रवरः पुरा वर्णानां संकरं चक्रे कामोपहतचेतनः ततः प्रभृति यो मोहा
त्प्रमीतपतिकां स्त्रियं नियोजयत्यपुत्रार्थं गर्हन्ते तं हि साधवः इति न च विहितप्रतिषिद्धत्वा
द्विकल्प इति मन्तव्यं नियोक्तॄणां निन्दाश्रवणात् स्त्रीधर्मेषु च व्यभिचारस्य बहुदोषत्वश्र
वणात् संयमस्य प्रशस्तत्वाच्च यथाह मनुरेव कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः न
तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु इति जीवनार्थं पुरुषान्तराश्रयणं प्रतिषिध्य आसीता
मरणात्क्षान्ता नियता ब्रह्मचारिणी यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् अनेकानि सह

166

पितृगृहे या संस्थिता अपरिणीता तस्या वोढुरेव पुत्रः यथाह मनुः। पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्र
हः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमिति पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुनर्भू
सवर्णादुत्पन्नः मात्रा भर्त्रा त्यक्तया प्रोषिते वा भर्तरि पित्रा वा भ्रात्रा वा सवर्णाय स्वैरं दीयते स तस्य दत्त
कः पुत्रः यथाह मनुः मातापिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः
सुत इति। आपद्ग्रहणादनापदि न देयो दातुरयं प्रतिषेधः तथा एकः पुत्रो न देयः न त्वेवैकं पुत्रं दद्या
त्प्रतिगृह्णीयाद्वेति वसिष्ठस्मरणात् तथानेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः ज्येष्ठेन जातमात्रेण पुत्री
भवति मानव इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात् पुत्रप्रतिग्रहप्रकारश्च पुत्रं प्रतिग्रहीष्यन्
बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृ
ह्णीयादिति वसिष्ठेनोक्तः अदूरबान्धवमिति संशये तद्देशभाषाविप्रकृष्टस्य प्रतिषेधः एवं क्रीतस्य
पि दत्तकविधिरेषोऽपि योज्यः समानन्यायत्वात् क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा वि
क्रीतः पूर्ववत्तत्रैकपुत्रं ज्येष्ठं च वर्जयित्वा आपदि सवर्णाय स्वयं तु मनुनोक्तं क्रीणीयाद्य
स्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा इति तद्गुणैः सदृशो वे
ति [illegible] सजातीये स्वयं प्रोक्तः स्यूपसंहारात् कृत्रिमः स्यात्स्वयं कृत इति कृत्रिमः
स्यात्स्वयं कृतः कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्रलोभनैः पुत्रीकृतो मा

८२

प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः कानीनः कन्यकाजातो मातामहसुतो मतः अक्षता
यां क्षतायां वा जातः पौनर्भवः सुतः दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् क्रीतश्च
ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः उत्सृ
ष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः उरसे जात औरसः स्वधर्मपत्नीजः सवर्णा धर्म्य
विवाहोढा धर्मपत्नी तस्यां जात औरसः पुत्रो मुख्यः तत्समः पुत्रिकासुतः तत्सम औरसस
मः पुत्रिकायाः पुत्रिकासुतः अत एवौरससमः यथाह वसिष्ठः अभ्रातृकां प्रदास्यामि तु
भ्यं कन्यामलंकृतां अस्यां यो जायते पुत्रो भवेदिति तीति अथवा पुत्रिकैव सुतः पुत्रिकासुतः राम
सोऽप्यौरससम एव पित्रवयवानामल्पत्वान्मात्रवयवानां बाहुल्याच्च यथाह वसिष्ठः
तृतीयः पुत्रिकैवेति तृतीयः पुत्रः पुत्रिकैवेत्यर्थः द्व्यामुष्यायणस्तु जनकस्यौरसाद
विशिष्टोऽन्यक्षेत्रोत्पन्नत्वात् क्षेत्रजस्य क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा इतरेण च स
पिण्डेनेतरेण वा सोत्पन्नः पुत्रः क्षेत्रजः गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीनाधिकजाती
यपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति वोढुर्यः
कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णान्मातामहस्य पुत्रः यद्यनूढा सविता तथा

सति चतुर्थांशनिषेधपरमेव । औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहणमस्त्ये
व पूर्वाभावे परः पर इति वचनात् । यदपि मनुवचनं एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनमिति तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे
चवेदितव्यं तत्र क्षेत्रजस्याविरोधो दर्शितस्तेनैव षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्
धनात् औरसो विभजन् दायं पित्र्यं पंचममेव वेति प्रतिकूलत्वे निर्गुणत्वे समुच्चये षष्ठमंश
मेकतरसद्भावे पंचममिति विवेक्तव्यं यदपि मनुना पुत्राणां षट्कद्वयमुपन्यस्य पूर्वषट्कस्य दा
यादबांधवत्वमुक्तं उत्तरषट्कस्यादायादबांधवत्वमुक्तं औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च
गूढोत्पन्नोऽपविद्धश्च दायादा बांधवाश्च षट् कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा स्वयं
दत्तश्च शौद्रश्च षडदायादबांधवा इति तदपि स्वपितृसपिंडसमानोदकानां संनिहितरिक्थ
हरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति बांधवत्वं पुनः समानगोत्र
त्वेन सपिंडत्वेन चोदकप्रदानादिकार्यकरत्वं च वर्गद्वयस्यापि सममेवेति याज्ञवल्क्ये यं गोत्ररिक्थे
जनयितुर्न भजेद्दत्रिमः सुतः गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधेत्यत्र दत्रिमग्रहणस्य
पुत्रप्रतिनिधिप्रदर्शनार्थत्वात् पितृधनहारित्वं तु पूर्वस्य पूर्वस्याभावे सर्वेषामविशिष्टं

१७१

मि॰ व्य॰

८४

तापितृविहीनस्तत्सद्भावे तत्परतंत्रत्वात् दत्तात्मा तु पुत्रो यो मातापितृविहीनस्त्यक्तो वा
न वाहं पुत्रो भवामीति स्वयं दत्तः उपनेतः सहोढजस्तु गर्भे स्थितो गर्भिण्यां परिणीतायां यः परि
णीतः स वोढुः पुत्रः अपविद्धो मातापितृभ्यां मुक्तो यो गृह्यते स गृहीतुः पुत्रः पुत्रः सर्वत्र सव
र्णाद्रस्येव एवं मुख्यापुत्राननुक्रम्य तेषां दायग्रहणे क्रममाह पिंडदोंऽशहरश्चैषां पूर्वाभावे प
रः परः एतेषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्वस्य पूर्वस्याभावे उत्तरः उत्तरः पिंडदः श्राद्धदो
ऽंशहरो धनहरो वेदितव्यः औरसपौत्रिकेयसमवाये औरसस्यैव धनग्रहणप्राप्तौ मनुरप्यवा
ह पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि
स्त्रिया इति तथान्येषामपि पूर्वस्मिन्पूर्वस्मिन्सत्युत्तरेषां पुत्राणां चतुर्थांशभागित्व

राम

१७०

मुक्तं वसिष्ठेन तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत चतुर्थभागभागी स्याद्दत्तक इति
दत्तकग्रहणं कृत्रिमादीनां प्रदर्शनार्थं पुत्रीकरणाविशेषात् तथा च कात्यायनः उत्पन्ने
त्वौरसे पुत्रे चतुर्थांशहराः सुताः सवर्णा असवर्णास्तु ग्रासाच्छादनभाजना इति सवर्णाः क्षेत्रका
दयस्ते सत्यौरसे चतुर्थांशहराः असवर्णाः कानीनगूढोत्पन्नसहोढपौनर्भवास्त्वौर
से सति न चतुर्थांशहराः किंतु ग्रासाच्छादनभाजनाः यदपि विष्णुवचनं अप्रशस्ता
स्तु कानीनगूढोत्पन्नसहोढजाः पौनर्भवश्चैव नैते पिंडरिक्थांशभागिन इति तदप्यौरसे

८४

ळस्तं भागमन्याभावेपि न लभते यथाह मनुः यद्यपि स्यात्तु सत्पुत्रोप्यसत्पुत्रोपि वा भवेत् ना
धिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः इति यदि सत्पुत्रोपि विद्यमानो द्विजातेः पुत्रोऽसत्पुत्रोपि
विद्यमानो द्विजातिपुत्रो वा स्यात्तस्मिन्नपि जीवत्यादिग्योऽन्यो वास्य पितुः शूद्रापुत्राय तद्धनाद्दशमां
शादधिकं न दद्यादित्यस्मादेव क्षत्रियावैश्यापुत्रयोः सवर्णपुत्राभावे सकलधनग्रहणं मतं
अधुना शूद्रस्य धनविभागे विशेषमाह जातोपि दास्यां शूद्रेण कामतोंशहरो भवेत् मृते पितरि कुर्युस्तं
भ्रातरस्त्वर्द्धभागिकं अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते शूद्रेण दास्यामुत्पन्नः पुत्रः कामतः
पितुरिच्छया भागं लभते पितर्युपरते यद्युत्परिणीतापुत्राः सन्ति ते भ्रातरस्तं दासीपुत्रमर्द्धभागिकं
कुर्युः स्वभागादर्द्धं दद्युरित्यर्थः अथ परिणीतापुत्रा न सन्ति तदा सकलं धनं दासीपुत्रो गृह्णीया
द्यदि परिणीता दुहितरस्तत्पुत्रा वा न सन्ति तत्सद्भावे त्वर्द्धभागिक एव दासीपुत्रः अत्र च शूद्र
ग्रहणाद्द्विजातिना दास्यामुत्पन्नः पितुरिच्छयाप्यंशं न लभते नाप्यर्द्धं किन्तु अनुकूल
श्चेज्जीवनमात्रं लभते मुख्यगौणसुतानां दायग्रहणं तावन्निरूपितं तेषामभावे सर्वेषां दायादक्रम
उच्यते पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः एषाम
भावे पूर्वस्य धनभागुत्तरोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः पूर्वोक्ता द्वादशपुत्रा
यस्य न सन्ति स सा नपुत्रस्तस्यापुत्रस्य परलोकं गतस्य धनभाग् धनग्राही पत्न्यादीनामनुक्रा

८४

न्तानामन्यतरो न पितरः पुत्ररिक्थहराः पितुरित्यस्यौरसव्यतिरिक्तानां पुत्रप्रतिनिधीनां सर्वे
षां रिक्थहारित्वप्रतिपादनपरत्वात् औरसस्यैकस्यैवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुरित्यनेन
नैव रिक्थभाक्त्वस्योक्तत्वात् दायादशब्दस्य दायादा न पिण्डदा इति दत्तादिपुत्रव्यतिरिक्थभाक्त्व
विषयत्वेन प्रसिद्धत्वाच्च वासिष्ठादिपुत्रवर्गद्वयेपि कस्यचित् क्वचित्पाठेन गुणवदगुणवद्वि
षयो वेदितव्यः गौतमीये तु पौत्रिकेयस्य दशमत्वेन पाठो विजातीयविषयस्तस्मान्न स्थित
मेतत् पूर्वपूर्वाभावे परः परोंशभागिति यत्तु भ्रातृणामेकजातानामेकश्चेत्पुत्रवान् भवे
त् सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति तदपि भ्रातृपुत्रस्य पुत्रीकरणसंभवे राम
न्येषां पुत्रीकरणनिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय तत्सुतो गोत्रजो बन्धुरित्यनेन
विरोधात् इदानीमुक्तोपसंहारव्याजेन तत्रैव नियममाह सजातीयेष्वयं प्रोक्तस्तनयेषु
मया विधिः समानजातीयेष्वेव पुत्रेष्वयं पूर्वाभावे परः परः इत्युक्तो विधिर्न भिन्नजातीये
पुत्रत्वं च कानीनगूढोत्पन्नसहोढपौनर्भवानां सवर्णत्वं जनकद्वारेण न स्वरूपेण तेषां
वर्णजातिलक्षणाभावस्योक्तत्वात् तथानुलोमजानां मूर्द्धावसिक्तादीनामौरसव
त्त्वर्भावात्तेषामप्यभावे क्षत्रजादीनां दायहरत्वं वोद्धव्यं शूद्रापुत्रस्तौरसोपि

१७३

१७२

धनमिति मातुः पितामह्याश्च धनसंबंधो दर्शितः शंखेनापि स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं
तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति भ्रातॄणां पित्रोर्ज्येष्ठायाश्च पत्न्याः क्रमेण धनसंबंधो दर्शि
तः कात्यायनेनापि विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् भ्राता वा जननी वाथ माता वा तत्
पितुः क्रमादित्येवमादीनां विरुद्धार्थानां वचनानां धारेश्वरेण व्यवस्था दर्शिता पत्नी गृह्णीयादि
त्येतद्वचनजातं विभक्तभ्रातृस्त्रीविषयं सा च यदि नियोगार्थिनी भवति कुत एतत् नियोगसापे
क्षायाः पत्न्या धनग्रहणं न स्मृतं जाया इति पिता हरेदपुत्रस्येत्यादि वचनान्तरे व्यवस्थाकारणं वक्त
व्यं नान्यं व्यवस्थाकारणमस्तीति गौतमवचनाच्च पिंडगोत्रर्षिसंबंधा रिक्थं भजेरन् स्त्री वानप
त्यस्य बीजं वा लिप्सेतेति अस्यार्थः पिंडगोत्रर्षिसंबंधा अनपत्यस्य रिक्थं भजेरन् यदि वा जां लिप्से
तेति मनुरपि धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धन
मित्यनेनैतत् दर्शयति विभक्तधनेपि भ्रातर्युपरते अपत्योत्पादनद्वारेणैव पत्न्या धनसंबंधो नान्यथेति
तथा विभक्तधनेपि कनीयान् ज्येष्ठभार्यायां पुत्रमुत्पादयेद्यदि समस्तत्र विभागः स्यादिति धर्मो
व्यवस्थितस्तत्र वशिष्ठेनापि रिक्थलोभान्नास्ति नियोग इति रिक्थलोभान्नियोगप्रतिषे
धान्नियोगद्वारकत्वेन पत्न्या धनसंबंधो नान्यथेति दर्शयति नियोगाभावे तु पत्न्या भरणमा
त्रमेव नारदवचनात् भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयादिति योगीश्वरेणापि कीर्ति

175

८६

तानां मध्यात्पूर्वस्य पूर्वस्याभावे उत्तरोत्तरो धनभागिति संबंधः सर्वेष्वपि मूर्द्धावसिक्तादिष्वनुलोम
जेषु सूतादिषु प्रतिलोमजेषु वर्णेषु ब्राह्मणादिषु च पत्न्यादयो ग्रहणविधिर्दायग्रहणक्रमो वेदितव्यः
तत्र प्रथमं पत्नी धनलाभे पत्नी विवाहसंस्कृता पत्युर्नो यज्ञसंयोग इति स्मरणात् एकवचनं चात्र जात्य
भिप्रायेण ताश्च बह्व्यः सजातीया विजातीयाश्च यथांशं विभज्य धनं गृह्णीयुरिति वृद्धमनुरपि पत्न्याः
समग्रधनसंबंधवान् अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं
लभेत चेति बृहस्पतिरपि अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पितृगामि तदभावे
मातृगामिनी कात्यायनोपि पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी तदभावे तु दुहिता यद्यनूढा
भवेत्तदेति तथा अपुत्रस्य कुलजा पत्नी दुहितरोपि वा तदभावे पिता माता भ्राता पुत्राश्च कीर्ति
ता इति बृहस्पतिरपि कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु असुतस्य प्रमीतस्य पत्नी त
द्भागहारिणीति एतद्विरुद्धानि वचनानि वर्ण्यन्ते यथा भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्र
व्रजेत्वा विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षया
त् रक्षन्ति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु चेति पत्नीसद्भावेपि भ्रातॄणां धनग्रहणं पत्नीनां च
भरणमात्रं नारदेनोक्तं मनुनापि पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा सपुत्रस्य धनं पितुर्वा भ्रातु
र्वेति दर्शितं तथा अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् मातर्यपि च वृत्तायां पितुर्माता हरेद्धनं

174

राम

८८

१७७

नपिंडगोत्रर्षिसंबंधाभजेरन् स्त्री वसा स्त्री बीजं वालि क्षेत्रसंपरावाभवेदिति तस्य धर्मोत्त
रोपदेशः बाशब्दस्य पक्षांतरवचनत्वेन पद्मर्थ्यप्रतीतेः अपिचास्य पत्न्यापाएवं धनग्रहणं पुक्तं
ननियुक्तायाः स्मृतिलोके निंदितायाः अपुत्राशयनं भर्तुः पालयंती व्रते स्थिता पत्न्येव दद्यात्त
सिंडः कृत्स्नमंशं लभते न चेत्तिस्याः तायाएव धनग्रहणमुक्तं तथा नियोगश्च निंदितो मनुना
नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः अन्यस्मिन्हि नियुंजाना धर्मं हन्युः सना
तनमित्यादिना यत्तु वसिष्ठवचनं रिक्थलोभान्नास्ति नियोग इति तदविभक्ते संसृष्टे निवा
भर्तरि प्रेते तस्या धनसंबंधो नास्तीति स्यापसंस्यधनसंबंधार्थे नियोगेन कर्त्तव्य इति व्या
ख्येयं यदपि नारदवचनं भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयादिति तदपि संसृ
ष्टानां ये भागास्तेषामेव समर्थ इति संसृष्टिनां प्रस्तुतत्वात् तत्स्त्रीणामनपत्यानां भ
रणमात्रप्रतिपादनपरं न च भ्रातृणामप्रजाः प्रेयादित्येतस्य संसृष्टिविषयत्वे संसृष्टा
नां यो भागः स तेनैपोन रत्नामाशंकनीयं यतः पूर्वोक्तविवरणेन स्त्रीधनस्याविभाज्य
त्वेन तत्स्त्रीणां स्वभरणमात्रविधीयत्ते यद्यप्यपुत्रा योषितस्त्रेषामित्यादिवचनं तत्तु क्ली
वादि स्त्रीविषयमिति वक्ष्यते यत्तु द्विजातिधनस्य यज्ञार्थत्वात् स्त्रीणां च यज्ञेनाधिका
राद्धनग्रहणमयुक्तमिति तदसत् सर्वस्य द्रव्यजातस्य यज्ञार्थत्वे दानहोमाद्यसिद्धेः

८७

वक्ष्यते अपुत्रा योषितश्चैषां भर्तव्याः साधुवृत्तयः निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव
चेति अपिच द्विजातिधनस्य यज्ञार्थत्वात् स्त्रीणां च यज्ञेऽनधिकाराद्धनग्रहणमयुक्तं तथापि
चक्रेनापि स्मृतं यज्ञार्थं द्रव्यमुत्पन्नं तत्रानधिकृतास्तु ये अरिक्थभाजस्ते सर्वे ग्रासाच्छादनभा
जनाः यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत् स्थानेषु धर्मजुष्टेषु न स्त्रीमूर्खविधर्मिष्विति
तदनुपपन्नं पत्नीदुहितरश्चेत्यत्र नियोगस्याप्रसक्तेरप्रस्तुतत्वात् अपिचैतत्रैव पत्न्यायत
ग्रहणं नियोगो वा निमित्तं तदुत्पन्नमपत्यं वा तत्र नियोगस्य वा निमित्तत्वेऽनुत्पादितपुत्रा
या अपि धनसंबंधः प्राप्नोति उत्पन्नस्य अपुत्रस्य धनसंबंधो न प्राप्नोति अथ यदपत्यस्यैव नि
मित्तत्वं तथा सति पुत्रस्यैव धनसंबंधात् पत्नीति नारब्धव्यं अथ स्त्रीणां पतिद्वारको धनसं
बंधः पुत्रद्वारको वा नान्यथेति मतं तदप्यसत् अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि भ्रा
तृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतमित्यादिविरोधात् किंच सर्वथा पुत्राभावे पत्नी दुहितर
इत्यारब्धे तत्र नियुक्ताया धनसंबंधवदत्राक्षेत्रजस्यैव धनसंबंध उक्तो भवति स च प्रागेवा
भिहितः इत्यपुत्रप्रकरणे पत्नीति नारब्धव्यं अपिंडगोत्रर्षिसंबंधा रिक्थं भजेरन् स्त्री वा
इत्यनपत्यस्य बीजं वा लिप्सेतेति गौतमवचनान्नियुक्ताया धनसंबंध इति तदप्यसत् न हि य
द्वीजं लिप्सेत तत्र दानपत्यस्य स्त्री धनं गृह्णीयादित्ययमर्थोऽस्मात् स्मृतीयते किंत्वनपत्यस्य ध

१७६

राम

181

सत्यपि पत्न्यादिगणे घर तइति व्यावस्थे शंखवचनमपि संसृष्टभ्रातृविषयमिति तत्रापि चाऽ
ल्पविषयत्वमस्माद्वचनात् प्रकरणाद्वानावगम्यते धनभाग्भ्रातरेत्तरदृसस्य च पत्नी दुहितर
इति विषयद्वयेवाक्यांतरमयेष्यात्वपधनविषयत्वे पित्रादिषु तु धनमात्रविषयत्वमिति पूर्वो
क्ते विधिवैषम्यं तदवस्थमेवेति यत्किंचिदेतत् यत्तु हारीतवचनं विधवा यौवनस्था चेन्ना
री भवति कर्कशा आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा इति तदपि शंकितव्यभिचारायाः स
कलधनग्रहणनिषेधपरं अस्मादेव वचनादनाशंकितव्यभिचारायाः सकलधनग्रहणं ग
म्यते एतदेवाभिप्रेत्योक्तं शंखेन ज्येष्ठा वा पत्नीति ज्येष्ठा गुणज्येष्ठाऽनाशंकितव्यभिचा
रा सा सकलधनं गृह्णीयाऽन्यां ह कैराम पिमात्तेनसालयतीति सर्वमनवद्यं तस्मात्पुत्रस्य
स्वर्यातस्य विभक्तस्यासंसृष्टिनो धनं पारिणीना स्त्री संयता सकलमेव गृह्णातीति स्थितं
तदभावे दुहितरः दुहितर इति बहुवचनं समानजातीयानामसमानजातीयानां च सम
विषमात्राप्राप्त्यर्थं तथा च कात्यायनः पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी तदभा
वे तु दुहिता यद्यनूढा भवेत्तदेति बृहस्पतिरपि भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता
अंगादंगात्संभवति पुत्रवद्दुहिता नृणां तस्मात्पितृधनं त्वन्यः कथं गृह्णाति मानवः इति तत्र
चोढानूढासमवायेऽनूढैव गृह्णातीति तदभावे दुहिता यद्यनूढा भवेत्तदेति विशेषस्मरणात्

180

तीति प्राकरणिकेन वचनप्रासायाउत्तरवेद्याः प्रतिषेधोयं हसमभिहितः पुनः पूर्वपक्षिणोप्या
त्रवयंतीति प्रथमोत्तमयोः पर्वणोः प्रतिषेधमपेक्ष्य पाक्षिकी सुतरवेदिं प्रपयति मध्यमयो
स्तु निरपेक्षमेवानिस्ववदुत्तरवेदिं प्रतिपादयतीति विधिवैषम्यं दर्शितं राद्धांतेपि विधिवै
षम्यप्रयासप्रथमोत्तमयोस्तु निरपेक्षमेवानित्यवदुत्तरवेदिं प्रतिपादयतीति विधिवैषम्यं दर्शि
तं राद्धांतेपि विधिवैषम्यभयात्प्रथमोत्तमयोः पर्वणोरुत्तरवेदिप्रतिषेधोनिसानुवादो द्वयोः
प्रणयंतीत्यादि घर्थवादपर्यालोचनया पात्रवयंतीति मध्यमयोरेव वरुणप्रघासयोः कर्मे
धपर्वणोरुत्तरवेदिधत्तइति दर्शितं यद्यपि मतं पितामहेऽदपुत्रस्य रिक्थं भ्रातरएवेति मनुस्मर
णान् तथा स्वर्यातस्य हि पुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नीति शंख
स्मरणाच्च पुत्रधनं भ्रातृगामीति प्रासंभरणं चास्य कुर्वीरन् स्त्रीणामाजीवनं क्षयादिति सादि
वचनाच्च भरणोपयुक्तं पत्नी लभत इत्यपि स्थितं एवं स्थिते बहुधनेऽपुत्रे स्वर्याते भर
णोपयुक्तं पत्नी गृह्णीतिशेषं च भ्रातरो यदा तु पत्नी भरणमात्रोपयुक्तमेव द्रव्यमस्ति तदा सुतं
वा तदा किंचिदप्यवगृह्णासुतपभ्रातरोपीति विरोधे पूर्वबलीयस्त्वज्ञापनार्थं पत्नी दुहितर
इत्यादव्यमिति तदप्यत्र भवानाचार्यो न मृष्यति यतः पितामहेऽदपुत्रस्य रिक्थं भ्रातर एवे
ति विकल्पस्मरणानेदंक्रमपरवचनमपि तु धनग्रहणाधिकारप्रदर्शनमात्रपरं तथा

राम

183

स्परिकस्यं भ्रातर एव चेति यत्पुनर्द्वारेश्वरेणोक्तं अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् मातर्य
पि च वृत्तायां तु पितुर्माता हरेद्धनमिति मनुवचनाज्जीवत्स्वपि पित्रादिषु वृत्तायां पितुर्माता महीधनं
हरेत्तत्पिता यतः पितृगृहीतं धनं विजातीयेष्वपुत्रेषु गच्छति पितामहीगृहीतं तु सजातीयेष्वेव ग
च्छतीति पितामह्येव गृह्णातीति तदप्याचार्यैर्नानुमन्यते विजातीयपुत्राणामपि धनग्रहणस्योक्तत्वा
त् चतुस्त्रिद्व्येकभागाः स्युरित्यादिनेति यत्पुनरहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति मनु
स्मरणेन तत्पाभिप्रायं न पुत्राभिप्रायं भ्रातरश्चापि सोदराः प्रथमं गृह्णीयुरिति सोदराणां मात्रविप्र
कर्षेन अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेदिति स्मरणात् सोदराणामभावे भिन्नोदरा धन
भाजः भ्रातॄणामप्यभावे तत्सुताः पितृक्रमेण दानभाजः भ्रातृभ्रातृपुत्रसमवाये भ्रातृपुत्राणा
मनधिकारः भ्रात्रभावे भ्रातृपुत्राणामधिकारवचनात् यदा तु पुत्रे भ्रातरि स्वर्याते तेन भ्रात्रा
णामविभक्तधनसंबंधे जाते भ्राता यत्र विभागात् प्रागेव यदि कश्चिद्भ्राता मृतस्तदा तत्पुत्रा
णां पितृतो ऽधिकारप्रसक्तेस्तेषां भ्रातृणां च विभज्य ग्रहणं पितृतो भागकल्पनेति युक्तं भ्रातृपुत्रा
णामप्यभावे गोत्रजा धनभाजः गोत्रजा पितामही सपिण्डाः समानोदकाश्च तत्र पितामही प्रथ
मं धनभाक् मातर्यपि च वृत्तायां पितुर्माता धनं हरेदिति मात्रनन्तरं पितामह्या धनग्रहणप्रसक्ति
त्रादीनां भ्रातृसुतपर्यन्तानां वचनक्रमेणैवेन मध्ये तु प्रवेशाभावात्पितुर्माता धनं हरेदित्यस्य

९०

तथा प्रतिष्ठितापतिष्ठितासमवाये ऽप्रतिष्ठितैव तदभावे प्रतिष्ठिता स्त्रीधनं दुहितृगामि ऽप्रतानाम
प्रतिष्ठितानां चेति गौतमवचनस्यापि तद्धने ऽपि समानत्वात् न चैतत्पुत्रिकाविषयमिति मन्तव्यं तत्सु
तः इति पुत्रिकायास्तत्सुतस्य चौरसत्वेन पुत्रप्रकरणे ऽभिधानात् चशब्दाद्दुहित्रभावे दौहित्रो ध
नभाक् यथाह विष्णुः अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः पूर्वेषां तु स्वधाकारे पुत्रा दौहित्रका मत
ताइति मनुरपि अकृता वा कृता वापि यं विन्देत्सदृशात्सुतं पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धन
मिति तदभावे पितरौ मातापितरौ धनभाजौ यद्यपि द्युगपदधिकरणवचनतायां द्वन्द्वस्मरणा
त्तदपवादत्वादेकशेषस्य धनग्रहणे पित्राः क्रमेण प्रतीयते तथापि विग्रहवाक्ये मातृशब्द
स्य पूर्वनिपातादेकशेषाभावपक्षे च मातापितराविति मातृशब्दस्य पूर्वं श्रवणात् पाठक्रमा
देवार्थक्रमावगमाद्धनसंबंधे ऽपि क्रमापेक्षायां प्रतीतिक्रमानुरोधेनैव प्रथमं माता धनभाक्
तदभावे पितेति गम्यते किं च पितापुत्रांतरेष्वपि साधारणो माता तु न साधारणेति प्रत्यासत्त्य
तिशयादनन्तरः सपिण्डाद्यस्तस्य धनं भवेदिति वचनान्मातुरेव प्रथमं धनग्रहणं युक्तं न च स
पिण्डत्व प्रत्यासत्तिर्नियामिका अपि तु समानोदकादिष्वस्य विशेषेण धनग्रहणे प्राप्ते प्रत्यास
त्तिरेव नियामिकेत्यस्माद्वाक्यवचनाद्वगम्यत इति मातापित्रोर्मातुरेव प्रत्यासत्त्यतिशयाद्धन
ग्रहणमुक्ततरमं तदभावे पिता धनभाक् पित्रभावे भ्रातरो धनभाजः तथा च मनुः पिता हरेदपुत्र

182

राम

कृ येन सह कस्मादाचार्यादुपनयनाध्ययनतदर्थज्ञानप्राप्तौः स सब्रह्मचारी तदभावे ब्राह्मणद्रव्यं
यः कश्चिच्छ्रोत्रियोऽपि गृह्णीयात् श्रोत्रियस्याब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्निति गौतमस्म
रणात् तदभावे ब्राह्मणमात्रं यथाह मनुः सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः त्रैविद्याः
शुचयो दान्तास्तथा धर्मो न हीयत इति न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् अहार्यं ब्रा
ह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति मनुवचनात् नारदेनाप्युक्तं ब्राह्मणार्थस्य तन्नाशे दा
यादः कश्चन ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथेति क्षत्रियादिधनं सब्रह्मचा
रिपर्यन्तानामभावे राजा हरेन्न ब्राह्मणः यथाह मनुः इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः इ
ति पुत्राः पौत्राश्च दायं गृह्णन्ति तदभावे पत्न्यादय इत्युक्तमिदानीं तु उभयापवादमाह वान
प्रस्थयतिब्रह्मचारिणां रिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः वानप्र
स्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यधर्मभ्रात्रेकतीर्थी च रि
क्थस्य धनस्य भागिनः ब्रह्मचारी नैष्ठिकः उपकुर्वाणकस्य धनं मात्रादय एव गृह्णन्ति नै
ष्ठिकस्य तु धनं तदपवादेन आचार्यो गृह्णाति सुखी तु यतेस्तु धनं सच्छिष्यः पुनरध्यात्मशास्त्र
श्रवणधारणतदर्थानुष्ठानक्षमः दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात् वानप्रस्थस्य ध
नं धर्मभ्रात्रेकतीर्थी गृह्णाति धर्मभ्राता प्रतिपन्नो भ्राता एकतीर्थ्ये काश्रमी धर्मभ्राता वा

१८५

७१

एकवचनस्य धनग्रहणाधिकारः प्रासिमात्रपरत्वात् दुहितृसुतानन्तरं पितामही गृह्णाति तदभावे
पितामहाभावे समानगोत्रजाः सपिण्डाः पितामहादयो धनभाजः भिन्नगोत्राणां सपिण्डानां च गृ
हे न ग्रहणात् तत्र च पितृसंतानाभावे पितामही पितामहः पितृव्यास्तत्पुत्राश्च क्रमेण धनभा
जः पितामहसंतानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्पुत्रास्तत्सूनुश्चेत्येवमासप्तमात् स
मानगोत्राणां सपिण्डानां धनग्रहणं वेदितव्यं तेषामभावे समानोदकानां धनसंबंधः ते च सपि
ण्डानामुपरि सप्त वेदितव्याः जन्मनामज्ञानावधिका वा यथाह बृहन्मनुः सपिण्डता तु पुरुषे सप्त
मे विनिवर्त्तते समानोदकभावस्तु निवर्त्तेताचतुर्दशात् जन्मनाम्नोः स्मृतेरेके तत्परं गोत्र
मुच्यत इति गोत्रजाभावे बंधवो धनभाजः बंधवश्च त्रिविधाः आत्मबंधवः पितृबंधवो मातृ
बंधवश्चेति यथोक्तं आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञे
या आत्मबांधवाः पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्राश्च विज्ञेयाः
पितृबांधवाः मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृ
बांधवा इति तत्र चान्तरंगत्वात् प्रथमम् आत्मबंधवो धनभाजस्तदभावे पितृबंधवस्तदभावे मातृ
बंधव इति क्रमो वेदितव्यः बंधूनामभावे आचार्यस्तदभावे शिष्यः पुत्राभावे यः प्रत्यासन्न
सपिण्डस्तदभावे आचार्याभावे तेवासी सा पस्तेव स्मरणात् शिष्याभावे सब्रह्मचारी धनभा

१८४

राम

185

तत्रासोदरस्य संसृष्टिनो मृतस्यांशं सोदरः संसृष्टी जातस्य सुतस्य दद्यात् तदभावे अपह
रेदिति पूर्ववत्संबंधः एवं च सोदरासोदरसंसर्गे सोदरस्य संसृष्टिनो सोदर एव संसृष्टी
गृह्णाति न भिन्नोदरः संसृष्ट्यपीति पूर्वोक्तस्यापवादः इदानीं संसृष्टिनः पुत्रैः स्वयमसंसृ
ष्टिनो भिन्नोदरस्य वासंसृष्टिनः सद्भावे कस्य धनग्रहणमिति वीक्षायां तयोर्विभज्य ग्रह
णे कारणमाह अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् असंसृष्ट्यपि वादद्यात्संसृ
ष्टो नान्यमातृजः अन्योदर्यः सापत्नो भ्राता संसृष्टी धनं हरेत् पुनरन्योदर्यो धनं हरेदसंसृ
ष्टी अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तं असंसृ
ष्टी स्येत्तदुत्तरेणापि संबध्यते अतश्चासंसृष्ट्यपि संसृष्टिनो धनमादद्यात् कोसावि
त्यत आह संसृष्ट इति संसृष्ट एकोदरसंसृष्टः सोदर इति यावत् अनेनासंसृष्टस्या
पि सोदरस्य धनग्रहणे सोदरत्वं कारणमुक्तं संसृष्ट इत्युत्तरेणापि संबध्यते तत्र च संसृ
ष्टः संसृष्टः संसृष्टी स्यर्थः नान्यमातृजः अत्रैवशब्दाध्याहारेण व्याख्यानं कर्तव्यं सं
सृष्ट एवान्यमातृज एव संसृष्टिनो धनं नादद्यादिति एवं चासंसृष्ट्यपि वादद्यात्स्वपि
भ्रातृत्वेनासंसृष्टो नान्यमातृजः एकस्य वधारणान्निषेधात् संसृष्टसोदरस्य संसृ
ष्टिनो सोदरस्यापि च विभज्य ग्रहणं कर्तव्यमित्युक्तं भवति द्वयोरपि धनग्रहणकारणस्य

६२

सावेकतीर्थ्यानेतेषामाचार्यादीनामभावे पुत्रादिषु सत्स्वप्येकतीर्थ्येव गृह्णाति नच नैष्ठिकस्य
श्रमान्तरगता इति वशिष्ठस्मरणादाश्रमान्तरगतानां रिक्थसंबंध एव नास्ति कुतस्तद्विभागः
नचैवं नैष्ठिकस्य स्वार्जितधनसंबंधः प्रतिग्रहादिनिषेधात् अनिचयो भिक्षुरिति गौतमस्मर
णाद्भिक्षोरपि न स्वार्जितधनसंभवः उच्यते वानप्रस्थस्य तावत् अहो मासस्य वा समां वा
तथा संवत्सरस्य वा अर्थस्य निचयं कुर्यात् कृतमाश्वयुजे त्यजेदिति वचनाद्धनसंबंधो
स्त्येव यतेरपि कौपीनाच्छादनार्थं वासोपि विभृयात् तथा योगसंभारभेदांश्च गृह्णीयात् पा
दुके चेत्यादिवचनाद्वस्त्रपुस्तकादिसंबंधोस्त्येव नैष्ठिकस्यापि शरीरयात्रार्थं वस्त्रादिसं
बंधोस्त्येवेति तद्विभागकथनं युक्तमेव इदानीं स्वार्यातस्यापुत्रस्य पुत्राद्यो धनभाज इ
त्युक्तस्यापवादमाह संसृष्टिनस्तु संसृष्टी विभक्तं धनं पुनर्मिश्रीकृतं संसृष्टं तद्यस्यास्ती
ति संसृष्टी संसृष्टी च न येन केनापि किंतु पित्रा भ्रात्रा पितृव्येण वा यथाह बृहस्पतिः विभ
क्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यत इति
तस्य संसृष्टिनो मृतस्यांशं भागं विभागकाले अविज्ञातगर्भायां भार्यायां पश्चादुत्पन्न
स्य पुत्रस्य संसृष्टी दद्यात् पुत्राभावे संसृष्ट्येवापहरेत् गृह्णीयात् न पत्न्यादिः संसृष्टिन
स्तु संसृष्टिनस्यापवादमाह सोदरस्य तु सोदरः संसृष्टिनः संसृष्टी सन्नुवर्तते अ

186

राम

189

पापानि किं वधिरमूकनिरिंद्रियाणां ग्रहणाय याज्ञवल्क्यः अनंशास्त्वाश्रमांतरगता इति ना
स्त्येपि चिरं द्विषंतीति: षंढोपपत्यादेः पापाति कः औरसाअपिनैतेंशं लभेरन्नु क्षेत्रजाः कुतः
इति मनुरपि अनंशौ क्लीवपतितौ जात्यंधवधिरौ तथा उन्मत्तजडमूकाश्च ये च के चिन्निरिंद्रिया
इति निरिंद्रियोनि गंतमिंद्रियं यस्मात् वाह्याद्यादिना स निरिंद्रियः एते क्लीवादयोनंशा रिक्थ
भाजो न भवंति केवलं ग्रासाच्छादनदानेन पोषणीया न वेपु: अभरणे नुपतितत्वदोषः
सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिणा ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेदिति मनु
स्मरणात् अत्यंतं यावज्जीवमित्यर्थः एतेषां विभागात्प्रागेव दोषप्राप्तावनंशत्वं न पुनर्वि
भक्तस्य विभागोत्तरकालं न पोषधादिना दोषे निर्हरणे भागप्राप्तिरस्त्येव विभक्तेषु सु
तो जातः सवर्णायां विभागभागिति स्मरणात् न्यायत्वात् पतितादिषु पुल्लिंगमविव
क्षितमतश्च पत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनंशत्वं वेदितव्यं क्लीवादी
नामनंशत्वात्तत्पुत्राणामप्यनंशत्वे प्राप्त इदमाह औरसाः क्षेत्रजास्तेषां निर्दोषा भागहारि
णः एतेषां क्लीवादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषाः अंशग्रहणविरोधिक्लैव्यादिदोष
रहिता भागहारिणोंशग्राहिणो भवंति तत्र क्लीवस्य क्षेत्रजः पुत्रः संभवत्यन्येषामौर
साअपि औरसक्षेत्रजयोर्ग्रहणमितरपुत्रव्युदासार्थं क्लीवादिदुहितॄणां विशेषमाह
सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः एषां क्लीवादीनां सुता दुहितरो यावद्विवाहसं

८२

...कस्यसम्भावात् एतदेव स्पष्टीकृतं मनुना विभक्ताः सहजीवंतो विभजेरन्पुनर्यदीति संसृष्टि
विभागं प्रक्रम्य येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः म्रियेतान्यतरो वापि तस्य भागो न
लुप्यते सोदर्या विभजेयुस्तं समेत्य सहिताः समं भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभ
य इति वदता येषां भ्रातॄणां संसृष्टिनां मध्ये ज्येष्ठः कनिष्ठो मध्यमो वांशप्रदानतोंशप्रदा
ने सर्वविभक्तिकस्तसिः विभागकाल इति यावत् हीयेत स्वांशाद्भ्रंश्येत नाश्रमांतरपरि
ग्रहेण ब्रह्महत्यादिना वा म्रियेत वा तस्य भागो न लुप्यते तत्पत्र्युद्धरणीयो न संसृष्टिने
एवापहारी पुरीत्यर्थः तस्योद्धृतस्य विनियोगमाह सोदर्या विभजेयुस्तमिति तमुद्धृतभा

188

गं सोदर्याः सहोदराः असंसृष्टा अपि समेत्य देशांतरगता अपि समागम्य सहिताः संभू
य समं न त्यूनाधिकभावेन ये च भ्रातरो भिन्नोदराः संसृष्टास्ते च सनाभयो भगिन्यश्च
विभजेयुः समं विभज्य गृह्णीयुरिति तस्यार्थः पुत्रपत्न्यादिसंसृष्टिनां पदाय ग्रहणं मुक्त
तस्यापवादमाह क्लीवोथ पतितस्तज्जः पंगुरुन्मत्तको जडः अंधोचिकित्स्यरोगाद्या भर्तव्याः
स्युर्निरंशकाः क्लीवस्तृतीयप्रकृतिः पतितो ब्रह्महादिस्तज्जः पतितोत्पन्नः पंगुः पाद
विकलः उन्मत्तकः वातिकपैत्तिकश्लैष्मिकसान्निपातिकग्रहावेशलक्षणैरुन्मादैरभिभू
तः जडो विकलांतःकरणः हिताहितावधारणाक्षम इति यावत् अंधो नेत्रेंद्रियविकलः
अचिकित्स्यरोगः अप्रतिसमाधेयक्षयादिरोगग्रस्तः आद्यशब्देनाश्रमांतरगतपितृद्वेषि

राम

केनामस्त्रीधनंतदुदाहृतं प्रीत्यादत्तंतुयत्किंचित्श्वश्र्वावाश्वशुरेणवा पादवंदनिकंचै
वप्रीतिदत्तंतदुच्यते ऊढया कन्ययावापिपत्युःपितृगृहेपिवा भ्रातुःसकाशात्पित्रोर्वाल
ब्धंसौदायिकंस्मृतमिति किंचबंधुदत्तंतथाशुल्कमन्वाधेयकमेवच बंधुभिःकन्याया
मातृबंधुभिःपितृबंधुभिश्चयद्दत्तं शुल्कंयद्गृहीत्वाकन्यादीयते अन्वाधेयकंपरिणयना
दनुपश्चाद्दाहृतंदत्तं उक्तंचकात्यायनेन विवाहात्परतोयच्चलब्धंभर्तृकुलात्स्त्रिया
अन्वाधेयंतुतद्द्रव्यंलब्धंपितृकुलात्तथेति स्त्रीधनंपरिकीर्तितमित्यनेनसंबंधःए
वंस्त्रीधनमुक्त्वातद्विभागमाह अतीतायामप्रजसिबांधवास्तदवाप्नुयुः तस्यार्थःस्त्रीध
नमनप्रजस्याऽनपत्यायांदुहितृदौहित्रीदौहित्रपुत्रपौत्ररहितायांस्त्रियामतीतायांबांध
वाभर्त्रादयोवक्ष्यमाणागृह्णंतिसामान्येनबांधवग्रहणेऽधिकारिणोदर्शिताः इदानींवि
वाहभेदेनाधिकारिभेदमाह अप्रजस्त्रीधनंभर्तुर्ब्राह्मादिषुचतुर्ष्वपिदुहितृणांप्रसूता
चेच्छेषेषुपितृगामितत् अप्रजसःस्त्रियाः ब्राह्मदैवार्षप्राजापत्येषुचतुर्षुविवाहेषुभा
र्यात्वंप्राप्तायाअतीतायाः पूर्वोक्तंधनंप्रथमंभर्तुर्भवति तदभावेतत्प्रत्यासन्नानांसपिं
डानांभवति शेषेष्वासुरगांधर्वराक्षसपैशाचेषुविवाहेषुतदप्रजःस्त्रीधनंपितृगामि
मातापितृगामिमाताचपिताचपितृगामित्वेमातुरभावेपितुःपितृगामिएवप्रथमंनिर्दिष्टत्वात्प्र

५४

त्सुवाभवतितावत्सुदीयाः चशब्दात्तत्स्कार्याश्च॥ क्वचिद्वादितत्नीनांविशेषमाह अपुत्रायो
षितश्चैवाभर्तव्याःसाधुवृत्तयः निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथैवच एषंक्वचिद्वा
नामपुत्राःपत्न्यःसदाचाराश्चेभर्तव्याभरणीयाः व्यभिचारिण्यस्तुनिर्वास्याःप्रतिकूलास्
तथैवानिर्वास्याभरणीयाश्चव्यभिचारिण्यश्चेत् नपुनःप्रातिकूल्यमात्रेणभरणंभरण
मपिनकर्तव्यं विभजेरन्सुताःपित्रोरित्यत्रस्त्रीपुंसधनविभागंसंक्षेपेणाभिधायपुरु
षधनविभागोविस्तरेणाभिहितः इदानींस्त्रीधनविभागंविस्तरेणाभिधास्यंस्तस्यस्वरूपं
तावदाह पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकाद्यंचस्त्रीधनंपरिकीर्ति
तं पित्रामात्रापत्याभ्रात्राचयद्दत्तंयच्चविवाहकालेऽग्नावधिलक्ष्यमातुलादिभिर्दत्तंआ
धिवेदनिकमधिवेदननिमित्तंमेधिविन्नास्त्रियैदद्यादित्तिवक्ष्यमाणं आद्यशब्देनरिक् राम
थक्रयसंविभागपरिग्रहाधिगमप्राप्तमेतत्स्त्रीधनंमन्वादिभिरुक्तं स्त्रीधनशब्दश्च
यौगिकोनपारिभाषिकः योगसंभवेपरिभाषायाअयुक्तत्वात् यत्तुमनुनोक्तं अध्यग्न्य
ध्यावाहनिकंदत्तंचप्रीतिकर्मणि भ्रातृमातृपितृप्राप्तंषड्विधंस्त्रीधनंस्मृतमितिस्त्रीध
नस्यषड्विधत्वंतन्न्यूनसंख्याव्यवच्छेदार्थंनाधिकसंख्याव्यवच्छेदाय अध्यग्न्यादिस्व
रूपंचकात्यायनेनाभिहितं विवाहकालेयत्स्त्रीभ्योदीयतेह्यग्निसन्निधौ तदध्यग्निकृ
तंसद्भिःस्त्रीधनंपरिकीर्तितं यत्पुनर्लभतेनारीनीयमानापितुर्गृहात् अध्यावहनि

रिक्थं भगिन्यश्च सनाभय इति मातृकं रिक्थं सर्वे सहोदराः समं भजेरन् सनाभयो भगिन्य
श्च समं भजेरन्निति संबंधः न पुनः सहोदरा भगिन्यश्च संभूय भजेरन्निति संबंधः न पुनः
सहोदरा भगिन्यश्च संभूय भजेरन्निति इतरेतरयोगस्य द्वंद्वैकशेषाभावादप्रतीतेः विभागकर्तृ
त्वाद्वयेनापि च यथा देवः पचतेर्यथा देवदत्तः कृषिं कुर्याद्यज्ञदत्तश्चेति समग्रहणमुद्धारविभा
गनिवृत्त्यर्थं सोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं अनपत्यभिन्नजातिस्त्रीधनं तु भिन्नोद
रनिवृत्त्यर्थं अनपत्यभिन्नजातिस्त्रीधनं तु भिन्नोदरा पुत्रमजातिसपत्नीदुहितापहरति तद
भावे तदपत्यं तथा च मनुः स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ब्राह्मणी तद्धरेत्कन्या
तदपत्यस्य वा भवेदिति ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणमतश्चानपत्यवैश्याधनं क्षत्रि
यापत्यं हरति पुत्राणामभावे पौत्राः पितामहीधनहारिणः रिक्थभाज ऋणं प्रतिकुर्यु
रिति गौतमस्मरणात् पुत्रपौत्रैरृणं देयमिति पौत्राणामपि पितामहीऋणापाकरणा
धिकारात् पौत्राणामप्यभावे पूर्वोक्ता भर्त्रादयो बांधवा धनहारिणः स्त्रीधनप्रसंगेन
वाग्दत्ताविषये किंचिदाह दत्वा कन्यां हरन्दंड्यो व्ययं दद्याच्च सोदयं कन्यायां वा दत्तायामुप
हरन्दंड्यो यथानुबंधाद्यनुसारेण राज्ञा दंडनीयः तद्दानापहारकारणाभावे सति न तु कारणे
सत्यामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेदित्यपहाराभ्यनुज्ञानात् दंड्यः यच्च वाग्दाननि

मनुः अप्रजस्त्रीधनं पूर्वमिवोक्तं तदभावे तत्सुतासु सनाथानां धनग्रहणं सर्वेष्वेव विवाहेषु प्रसू
तापत्यवती चेद्दुहितृगामि तद्धनं भवति अत्र दुहितृशब्देन दुहितृदुहितर उच्यंते साक्षाद्दुहितॄणां
मातुर्दुहितरः शेषमित्यत्रोक्तत्वात् अतश्च मातृधनं मातरि वृत्तायां प्रथमं दुहितरो गृह्णंति तत्र चो
ढानूढासमवाये ऽनूढा गृह्णाति तदभावे परिणीता तत्रापि प्रतिष्ठिताप्रतिष्ठितासमवाये ऽप्रतिष्ठि
ता गृह्णाति तदभावे प्रतिष्ठिता यथाह गौतमः स्त्रीधनं दुहितॄणामप्रतिष्ठितानां चेति तत्र च
शब्दात् प्रतिष्ठितानां चेत्यप्रतिष्ठिता ऽनपत्यादिना वा एतच्च युक्तं तु सोदर्याणामेव भगि
नीनां भुक्तेः सोदर्याणां भूर्द्धं मातुरिति गौतमवचनात् सर्वासां दुहितॄणामभावे दुहितृदु
हितरो गृह्णंति दुहितॄणां प्रसूता चेदित्यस्माद्वचनात् तासां भिन्नमातृकाणां विषमाणां समवा
ये मातृद्वारेण भागकल्पना प्रतिमातृ वा स्ववर्गे भागविशेष इति गौतमस्मरणात् दुहितृदौ
हित्रीणां समवाये दौहित्रीणां किंचिद्देयं यथाह मनुः यास्तासां स्युर्दुहितरस्तासाम
पि यथार्हतः मातामह्याधनात्किंचित्प्रदेयं प्रीतिपूर्वकमिति दौहित्रीणामप्यभावे दौहित्रा
धनहारिणः यथाह नारदः मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः इति तच्छब्देन सन्निहि
तपरामर्शात् दौहित्राणामभावे पुत्रा गृह्णंति ताभ्यश्चेत्यन्वय इत्युक्तत्वात् मनुरपि दुहितॄणां
पुत्राणां मातृधनसंबंधं दर्शयति जनन्यां संस्थितायां तु समं सर्वे सहोदराः भजेरन्मातृकं

कारो धन्नो भवेत्तन्नत्तं भजेरं दाभजमानः प्रत्तं तु तद्वन्ति दोषश्रवणाच्च आधिवेदनिकं स्त्रीध
नमुक्तं तदाह अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्तितं
यस्या उपरि विवाहस्साधिविन्ना सा चासौ स्त्री च तस्यै अधिविन्नस्त्रियै आधिवेदनिकं अधि
वेदननिमित्तं धनं समं यावदधिवेदनार्थं व्ययीकृतं तावद्दद्यात् यस्यै भर्त्रा श्वसुरेण वा
स्त्रीधनं न दत्तं दत्ते पुनः स्त्रीधने आधिवेदनिकद्रव्यस्यार्द्धं दद्यात् अर्द्धशब्दश्चात्र समप्र
विभागवचनो न भवसत्तश्च यावता तत्पूर्वदत्तमाधिवेदनिकसमं भवति तावद्देयमि
त्यर्थः एवं विभागमुक्तेदानीं तत्संदेहनिर्णयहेतुमाह विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिले
ख्यैः विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः विभागस्य निह्नवेऽपलापे ज्ञातिभिः पितृबं
धुभिर्मातुलादिभिः साक्षिभिः पूर्वोक्तलक्षणैर्लेख्येन च विभागपत्रेण विभागभावना वि
भागनिर्णयो ज्ञातव्यः तथा यौतकैः पृथक्कृतैर्गृहक्षेत्रैश्च पृथक् कृष्यादिकार्यप्रवर्तनं पृथक् पंच
महायज्ञादिधर्मानुष्ठानं च नारदेन विभागलिंगमुक्तं विभागधर्मसंदेहे दायादानां विनिर्ण
यः ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् भ्रातॄणामविभक्तानामेको धर्मः प्रवर्त
ते विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक् इति तथा परा अपि विभागलिंगानि तेने

मि० ७६

क्तं वरेणास्तु संबंधिनां कन्यासंबंधिना वोपचारार्थं धनं व्ययीकृतं तत्सर्वं सोदयं वरस्य दे
यं कन्यादाता वराय दद्यात् अथ कथंचिद्वाग्दत्ता संस्काराद्वाग्म्रियेत तत्र दाक्षिणिकं कर्तव्य
मित्यत आह मृतायां दत्तमादद्यात्परिशोध्योभयव्ययं यदि वाग्दत्ता म्रियेत तदा यत्पूर्व
मंगुलीयकादि शुल्कं वरेण दत्तं तद्वर आददीत परिशोध्योभयव्ययं उभयोरात्मनः
कन्यादातुश्च यो व्ययस्तं परिशोध्यावशिष्टमाददीत यत्तु कन्यायै मातामहादिभिर्दत्तं
हादिभिर्दत्तं शिरोभूषणादिकं वा क्रमायातं तत्सोदरा भ्रातरो गृह्णीयुः रिक्थं मृतायाः
कन्यायाः गृह्णीयुः सोदरास्तदभावे मातुस्तदभावे पितुरिति बोधायनस्मरणात्
मृताप्रजस्त्रीधनं भर्तृगामी शुल्कमित्यानी जीवंत्साः सप्रजायाः अपि स्त्रियाः धनं ग्रह
णे क्वचिद्भर्तुरभ्यनुज्ञानमाह दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके गृहीतं स्त्री
धनं भर्ता न स्त्रियै दातुमर्हति दुर्भिक्षे कुटुंबरक्षणार्थं धर्मकार्येऽवश्यकर्तव्ये व्या
धौ च संप्रतिरोधके वंदिग्रहणे निग्रहसमये ग्रहादेर्द्रव्यांतरराहित्ये स्त्रीधनं गृह्णन्भर्ता
न पुनर्दातुमर्हति प्रकारांतरेण पहरन्दद्यात् भर्तृव्यतिरेकेण जीवंत्याः स्त्रियाधनं
केनापि दायादेन न ग्रहीतव्यं जीवंतीनां च तासां ये तद्धरेयुः स्वबांधवाः तान् शिष्या
च्चोरदंडेन धार्मिकः पृथिवीपतिरिति तद्विधानात् तथा पत्यौ जीवति यः स्त्रीभिरलं

राम

१९५

१९४

षड्विधस्य ... तथाहि ममात्र पंचनिवर्तना भूमिरधिका भूरस्तीति केनचिदुक्ते पंच
निवर्तनैव नाधिकेत्याधिक्ये विवादः। पंचनिवर्तना मदीया भूरित्युक्ते न ततो न्यूनैवेति न्यून
तायां पंचनिवर्तनात्मकं ममांशं इत्युक्ते ऽशे न ... अस्त्यास्तित्वे विवादः। मदीया भूः प्रागविद्य
मानभोगेव भुज्यत इत्युक्ते न संततं चिरं त्वयैव मे भुक्तेति त्वभोगभुक्तौ विवादः। इयं मर्या
देयं नेति सीमाविवाद इति षट्प्रकार एव विवादः संभवति बहुप्रकारोपि भूवादस्तु स्वया
प्यां सीमायाः अपि निर्णीयमानत्वात् सीमानिर्णयप्रकरण एतस्यान्तर्भावः। समन्ताद्भवाः

197

सामन्ताः चतसृषु दिक्षु अनन्तरग्रामादयस्तेच प्रतिसीमं व्यवस्थिताः ग्रामो ग्रामस्य सा
मन्तः क्षेत्रं क्षेत्रस्य कीर्तितं गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य हीति कात्यायनवचना
न ग्रामादिशब्देन तत्स्थाः पुरुषाः लक्ष्यन्ते ग्रामः पलायित इति यथा सामन्तग्रहणं च
तत्संसक्तोपलक्षणार्थं उक्तं च कात्यायनेन संसक्तकास्तु सामन्तास्तत्संसक्तास्त
थोत्तराः संसक्तसंसक्ताः पद्माकाराः प्रकीर्तिता इति स्थविरा वृद्धाः आदिग्रहणेन मौलो
द्धृतयोर्ग्रहणं वृद्धादिलक्षणं च तेनैव चोक्तं निष्पन्नग्रामे येषां ... कार्यं तद्गुणान्वितैः
वृद्धा वा यदि वा वृद्धास्ते तु वृद्धाः प्रकीर्तिताः येन त्र पूर्वसामन्ताः पश्चाद्देशान्तरं गताः

६७

तोक्तानि साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च विभक्ता भ्रातरः कुर्युर्नाविभक्ताः कथं
चनेति इति रिक्थविभागप्रकरणं अधुना सीमाविवादनिर्णय उच्यते सीमाविवादे क्षेत्र
स्य सामन्ताः स्थविरादयः गोपाः सीमाकृषाणाः सर्वे च वनगोचराः नयेयुरेभिः सीमानं स्थ
लांगारतुषद्रुमैः सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितं ग्रामद्वयसंबंधिनः क्षेत्रस्य
सीमाविवादे तथैकग्रामान्तर्वर्तिक्षेत्रमर्यादाविवादे च सामन्तादयः स्थलांगारादिभिः पूर्व
कृतैः सीमालक्षणैरुपलक्षितां नयेयुर्निश्चिनुयुः सीमा क्षेत्रादिमर्यादा सा च चतुर्विधा

196

जनपदसीमा ग्रामसीमा क्षेत्रसीमा गृहसीमा चेति सा च यथासंभवं पंचलक्षणा तदु
क्तं नारदेन ध्वजिनी मत्स्यिनी चैव नैधानी भयवर्जिता राजशासननीता च सीमा पंचविधा
स्मृतेति ध्वजिनी वृक्षादिलक्षिता वृक्षादीनां प्रकाशत्वेन ध्वजतुल्यत्वात् मत्स्यिनी सलिल
वती मत्स्यशब्दस्य स्वाधारजललक्षणत्वात् नैधानी निखाततुषांगारादिमती तेषां निखा
तत्वेन निधानत्वेन तुल्यत्वात् भयवर्जिता अर्थिप्रत्यर्थिपरस्परसंप्रतिपत्तिनिर्मिता रा
जशासननीता ज्ञातृचिह्नाभावे राजेच्छया निर्मिता एवंभूतायाः षोढा विवादः संभवति
यथाह कात्यायनः आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च अभोगभुक्तिः सीमा च

राम

मानयोः सीमानिर्वाणं प्रकुर्याद्राजा यदा पुनश्चिह्नानि न सन्ति विद्यमानानि वा लिंगा
लिंगत्तया संदिग्धानि तदा निर्णयोपायमाह सीमंतो वा समग्रामश्च त्वारो ष्टौ दश वापि वा
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः सामंताः पूर्वोक्तलक्षणाः समग्रामाश्च
त्वारो ष्टौ दश वे से वे सम संख्याः प्रत्यासन्नग्रामीणाः रक्तस्रग्विणो रक्तांबरधराः
क्षितिपिंडाः सीमां नयेयुः प्रदर्शयेयुः सामंतावृत्तिविकल्पाभिधानं स्वस्थं
तराक्त साक्ष्यभिप्रायं यथाह मनुः साक्षिप्रत्यय एव स्यात्सीमावादविनिर्णय इति
तत्र च साक्षिणां निर्णेतृत्वं मुख्यं तदभावे सामंतानां तदुक्तं साक्ष्यभावे तु चत्वारो ग्रा
माः सीमांतवासिनः सीमायां निर्णयं कुर्युः प्रयत्ना राजसंनिधाविति तदभावे तत्संस
क्तादीनां निर्णेतृत्वं यथाह कात्यायनः स्वार्थसिद्धौ प्रदुष्टेषु सामंतेष्वर्थगौरवात्
तत्संसक्तैस्तु कर्तव्य उद्धारो नात्र संशयः संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः कर्तव्या
न प्रदुष्टास्तु सद्धर्मविज्ञानेनेति सामंताद्यभावे मौलादयो ग्राह्याः तेषामभावे सामंत
मौलवृद्धोद्धृतादयः स्थावरे षट्प्रकारे पि कार्यं नात्र विचारणेति कात्यायनेन क्रमा
भिधानात् एते च सामंताद्याः संख्यागुणाति रेकेण भवंति सामंताः साधनेषु

तन्मूलत्वानुत्तरोत्तरैर्नृभिः परिकीर्तिताः उपश्वकुल संभोगकार्याख्यानोपबृंहिताः उ
द्धरंति पुनर्यस्माद्द्धृतास्तेन ते गोपा गोचारका सीमाल्ष्पाणाः सीमासंनिहितक्षेत्रवृ
षेकाः सर्वे च वनगोचराः वनचारिणो व्याधादयस्तेथ मनुनोक्ताः व्याधान्शाकुनिकान् गो
पालकैवर्तान्मूलखानकान् व्यालग्राहामुञ्छवृत्तीनन्यांश्च वनगोचरानिति स्थलमुन्नतो
भूप्रदेशः ग्आराम आयतनं तथा धान्यं सुवः इमान्न्यग्रोधादयः सेतुर्जलप्रवाहवंधः चैत्यं
पाषाणादिवंधः ग्आघ शब्देन वेणुवालुकादीनां ग्रहणं एतानि चिन्हप्रकाशप्रच्छन्नभेदा
द्विप्रकाराणि तथा हस्तास्तु कुर्वीतन्यग्रोधाश्वत्थकिंशुकान् शाल्मलीशालतालांश्च क्षीरिण
श्चैव पादपान् गुल्मान्वेणूंश्च विविधान्शमीवल्लीस्थलानि च शरान्कुब्जकगुल्मांश्च
तथा सीमा न नश्यति तडागान्युदपानानि वाप्यः प्रस्रवणानि च सीमासंधिषु कार्याणि दे
वतायतनानि चेति प्रकाशरूपाणि उपच्छन्नानि सीमालिंगानि कारयेत् सीमाज्ञाने र
णां वीक्ष्य नित्यं लोके विपर्ययं ग्अश्मनो स्थीनि गोवालांस्तुषान्भस्मकपालिकां करीष
मिष्टकांगारशर्करावालुकस्तथा यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्त तानि संधि
षु सीमायामप्रकाशानि कारयेत्त एतैर्लिंगैर्नयेत्सीमां राजा विवदमानयोरिति प्रच्छ
न्नलिंगानि एतेः प्रकाशाप्रकाशरूपैर्लिंगैः सामंतादिप्रदर्शितैः सीमाप्रति विवाद

१७७

१७८

६८

राम

६८

आगमं च प्रमाणं च भोगं कालं च नाम च भूभागं लक्षणं चैव ये विदुस्तेऽत्र साक्षिणः इति एते च
साक्षिसामन्तादयः शपथैः शापिताः शंते: कुलादिसमक्षं राज्ञा प्रष्टव्याः यथाह मनुः ग्रा
मेयककुलानां तु समक्षं सीम्नि साक्षिणः प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोरिति
ते च पृष्टाः साक्ष्यादयः समस्ता ऐकमत्येन सीम्नि निर्णयं ब्रूयुः तेन निर्णीतां सीमानं तत्स्व
रूपं तत्सकलं लिङ्गयुक्तं साक्ष्यादिनामाङ्कितं वा विस्मरणार्थं पत्रे समारोपयेत् उक्तं च मनु
ना ते पृष्टास्तु यथा ब्रूयुः समस्ताः सीम्नि निर्णयं निबध्नीयात्तथा सीमां सर्वांस्तांश्चैव नामतः
इति एतेषां सामन्तप्रभृतीनां सीमां चंक्रमणादिनादारभ्य यावत्त्रिपक्षं राजिकं दैविकं व्यसनं
चेन्नोत्पद्येत तदा तत्प्रदर्शिता सीमा निर्णयः स च राजदेयव्यसनावधिः कात्यायनेनोक्तः
सीमाचंक्रमणे कोशे पादस्पर्शे तथैव च त्रिपक्षपञ्चसप्ताहं दैवराजिकमिष्यते इति य
द्यत्र सीमासु केसाक्ष्यं च संत्रिपक्षाभ्यन्तरे रोगादिरुत्पद्यते अथवा प्रतिवादिनिर्दि
ष्टाधिकसंख्यागुणसाक्ष्यं तत्र विरुद्धवचनं नात दाते मृषाभाषितया दण्डनीयास्तथा
ह मनुः ते तु पृथक् पृथग् दाप्या राज्ञा मध्यमसाहसं अनृतेन मिथ्यावचनेन निमित्तभूतेन सति सर्वे सा

७७

क्षिणो दोषाः स्युर्गुणान्विताः द्विगुणास्तु न राज्ञे याप्यास्ततोन्ये त्रिगुणा मता इति स्मरणान् ते
च साक्षिणः सामन्तादयश्च स्वैः स्वैः शपथैः शापिताः सन्तः सीमानं नयेयुः शिरोभिस्ते गृ
हीत्वोर्वीं स्रग्विणो रक्तवाससः शपथैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसमिति मनुस्मर
णात् नयेयुरिति बहुवचनं द्वयोर्निरासार्थं न तु एकस्य एकश्चेदुन्नयेत्सीमां सोपवासः स
मुन्नयेत् रक्तमाल्याम्बरधरो भूमिमादाय मूर्धनीति नारदेनैकस्याप्यनुज्ञानात्
यो यत्नेकः समुन्नयेत्सीमां नरः प्रत्ययवानपि गुरुत्वाद्दस्य कार्यस्य क्रियेषा बहुसंस्थि
तेत्येकस्य निषेधः स उभयानुमतधर्मवित् व्यतिरिक्तविषयः इत्यविरोधः स्थला
दिचिह्नाभावेपि साक्षिसामन्तादीनां सीमाज्ञाने उपायविशेषो नारदेनोक्तः निम्नगा

राम

पहृतोत्सृष्टनष्टचिह्नासु भूमिषु तत्प्रदेशानुमानाच्च प्रमाणाद्भोगदर्शनात् इति निम्न
गया नद्या अपहृते नापहृत्य तेनोत्सृष्टानि च लिङ्गानि यासु मर्यादाभूमिषु तत्प्रदेशा
नुमानात् उत्सृष्टनष्टचिह्नानां प्राचीनप्रदेशानुमानात् ग्रामादारभ्य सहस्रदण्डपरिमि
ते क्षेत्रे अमुष्य ग्रामस्य पश्चिमे भागे इत्येवंविधात् प्रमाणाद्वा प्रत्यर्थिसमक्षं समविप्रति
पन्नाया अस्मार्तकालोपलक्षिताद्भुक्तेर्वा निश्चिनुयुः बृहस्पतिना चात्र विशेषो दर्शितः

७७

ति॥ ज्ञानविषये सामन्तादीनां कारणापनेन दण्डान्तरविधानात् तथा साक्षिवचनभेदे पूर्वे
मेव दण्डस्तेनैवोक्तः कीर्तिते यदि भेदः स्यात् दण्ड्यास्तूत्तमसाहसमिति एवमज्ञानादिनान्तव
चने सामन्तादीन्दण्डयित्वा पुनः सीमाविचारः प्रवर्तयितव्यः अज्ञाने तौ दण्डयित्वा पुनः सीमा
विचारे यदि तत्सकाशाद्वस्तु सामन्तानन्यान्मौलादीन्समहसंमिश्र्यकारयेत्सीमामेवं धर्म
विदो विदुरिति निर्णयप्रकारस्तेनैवोक्तः यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि
चनसंसितत्वादेकपं निर्णयप्रस्तुत आह अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता ज्ञा
तॄणां सामन्तादीनां लिंगानां च वृक्षादीनामभावे राजैव सीम्नः प्रवर्तिता प्रवर्तयिताऽ
तर्भावीतो त्र एव यः ग्रामद्वयमध्यवर्तिनी विवादास्पदीभूतं समं विभज्यास्येयं द्वयस्योप
मिसुभयोस्समर्प्य तन्मध्ये सीमालिंगानि कुर्यादिदानस्यां भूमावन्यतरस्योपकारातिशयो
दृश्यते तदा तस्यैव ग्रामस्य सकलां भूसमर्पणीयापदाह मनुः सीमायामविषह्यायां
स्वयं राजैव धर्मवित् प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिरिति अस्यार्थः
दन्त्वावार्णकामध्यमेष्याः स्वजोर्णीयमूलं ताद्योतयितुमति देशमाह आरामायतन
ग्रामनिपानोद्यानवेश्मसु एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु आरामः पुष्पफलो

१००

मन्ताः प्रत्येकं मध्यमसाहसेन चत्वारिंशदधिकेन पणपञ्चशतेन दण्डनीयाः सामन्तविषयत्ता
चास्य साक्षिमौलादीनां स्वसंतरे दण्डान्तरविधानाद्वगम्यते तथा च मनुः यथोक्तेन नयं
तस्ते पूयन्ते सत्यसाक्षिणः विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दममिति नारदोपि अयथे
दन्तं ब्रूयुः सामन्ताः सीमनिर्णये सर्वे पृथक्पृथग्दण्ड्या राज्ञा मध्यमसाहसमिति सामन्ता
नां मध्यमसाहसं दण्डमभिधाय शेषाश्चेदन्तं ब्रूयुर्नियुक्ता भूमिकर्मणि प्रत्येकं तु जघन्या
स्ते विनेयाः पूर्वसाहसमिति तत्संसक्तादिषु प्रथमं साहसमुक्तवान् मौलादीनामपि त
मेव दण्डमाह मौलवृद्धादयस्त्वन्ये दण्डं गत्वा पृथक्पृथक् विनेयाः प्रथमेनैव साहसेनानृतेस्थि
ताः इति आदिग्रहणात् गोपशाकुनिकव्याधवनगोचराणां यद्यपि शाकुनिव्याधादी
नां पापरतत्वाल्लिंगदर्शनएवोपयोगेन साक्षात्सीमानिर्णये तथापि लिंगदर्शनएवमृषा
भाषित्वसंभवाद्दण्डविधानमुपपद्यत एव अनृते तु पृथग्दण्ड्या इत्येतद्दण्डविधानमज्ञान
विषयं बहूनां तु गृहीतानां न सर्वे निर्णयं यदि कुर्युर्भयाद्वालोभाद्दण्ड्यास्तूत्तमसाहसमि

ज्ञा

राम

203

202

शतानि पंचदंड्यः स्यादज्ञानाद्द्विशतो मतो दम इति अपहृपमाणक्षेत्रादिभूयस्त्व पर्या
लोचनया कदाचिदुत्तमोपि दंडः प्रयोक्तव्यः अत एवाह वधः सर्वस्वहरणं पुरान्निर्वास
नांकनोतदंगच्छेदः इसुक्तो दंड उत्तमसाहस इति यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थन
पर्यदानेन वालब्धानुज्ञो निर्मातुमिच्छति तन्निषेधत्तः क्षेत्रस्वामिन एव दंडं इत्याह
न निषेध्योल्पवाधसेतुः कल्याणकारकः परभूमिं हरन् कूपः स्वल्पक्षेत्रो वहूदकः
परकीयां भूमिमपहरन्नाशयन्नपि सेतुर्जलप्रवाहबंधः क्षेत्रस्वामिना न प्रतिषेद्धव्यः
सचेदेषसीमाकरो बहूपकारकः स्वभवति कूपश्चाल्पक्षेत्रव्यापितेनाल्पवाधो बहू
दकस्तेन बहूपकारको नैव निवारणीयः कूपग्रहणं च वापीपुष्करिण्याद्युपलक्ष
णार्थं यदा पुनरसौ समग्रक्षेत्रवर्तित्तया बहुवाधो न यादिसमीपक्षेत्रवर्तितया वा
ऽल्पोपकारकस्तदासौ निषेध्यः इत्यर्थादुक्तं भवति सेतोश्चैदं निषेध्यमुक्तं नारदेनासे
तुश्चद्विविधो ज्ञेयः खेयो वंध्यस्तथैव च तत्तोयप्रवर्तनात् खेयो वंध्यः स्यात्तन्निवर्त
नादिति यदा त्वन्यनिर्मितं सेतुं भेदनादिना नष्टं स्वयं संस्कारोति तदा पूर्वस्वामि

पच्चयहेतुर्भूभागः आयतनं निवेशनं पलालकूटाद्यर्थं विभक्तो भूप्रदेशः ग्रामः प्रसिद्धः
ग्रामग्रहणं च नगराद्युपलक्षणार्थं निपानं पानीयस्थानं कूपवापीप्रभृतिकं उद्यानं क्री
डार्था भूमिः वेश्मग्रहणं एतेष्वारामादिष्वप्येवं सामंतसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः
तथा प्रावर्षणोद्भूतजलप्रवाहेषु अनयोर्गृहयोर्मध्येन जलौघः प्रवहत्वनयोर्वेत्येवं प्र
कारे विवादे आदिग्रहणाद्घासादिष्वपि प्राचीन एव विधिर्वेदितव्यः तथाच कात्याय
नः क्षेत्रकूपतडागानां केदारारामयोरपि गृहप्रासादावसथनृपदेवगृहेषु चेति सो
मातिर्णयमुक्त्वा तत्प्रसंगेन मर्यादाप्रभेदनादौ दंडमाह मर्यादायाः प्रभेदे तु सीमाति राम
क्रमणे तथा क्षेत्रस्य हरणे दंडा अधमोत्तममध्यमाः अनेकक्षेत्रव्यवच्छेदिकासाधा
रणी भूर्मर्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमानमतिलंघ्य कर्षणे क्षेत्र
स्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमसाहसा दंडा वेदितव्याः क्षे
त्रग्रहणं चात्र गृहारामाद्युपलक्षणार्थं यदा पुनः स्वीयभ्रांत्या क्षेत्रादिकमपहरति
तदा द्विशतो दमो वेदितव्यः यथाह मनुः गृहं तडागमारामं क्षेत्रं वा भीषया हरन्

स्यफलं यावत्तत्रोपसर्जेत्सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः तच्च क्षेत्रं
पूर्वकर्षकाद्यपि चान्येन कारयेत् इति सीमाविवादप्रकरणं अथ व्यवहारपदानां परस्प
रहेतुमद्भावाभावात्तेषामाद्यमृणादानमित्यादिपाठक्रमेणानवेक्षितं इति व्युत्क्रमेण
स्वामिपालविवादोऽभिधीयते माषानष्टौ तु महिषी सस्यघातस्य कारिणी दं
नीयान्तदर्द्धं तु गौस्तदर्द्धमजाविकं परसस्यविनाशकारिणी महिषी अष्टौ माषान् दण्डनी
या गौस्तदर्द्धं चतुरो माषान् अजाविकं माषद्वयं दण्डनीयाः महिष्यादीनां यत्र
संबंधाभावात्तत्स्वामी पुरुषो लक्ष्यते माषश्चात्र ताम्रिकपणस्य विंशतितमो भा
गः माषो विंशतिमो भागः पणस्य परिकीर्तितः इति नारदस्मरणात् एतच्चाज्ञा
नविषयं ज्ञानपूर्वं तु पणस्य पादौ द्वौ गां तु द्विगुणं महिषी तथा तथाजाविक
वत्सानां पादो दण्डः प्रकीर्तित इति स्मृत्यन्तरोक्तं द्रष्टव्यं यत्तु नारदेनोक्तं माषं गां
दापयेद्दण्डं द्वौ माषौ महिषी तथा तथाजाविकवत्सानां दण्डः स्यादर्द्धमाषिक इति तत्तु
नः प्ररोहयोग्यमूलावशेषभक्षविषयं अपराधातिशयेन कल्पितं द्वैगुण्यमाह

मि. च.

१०२

तत्तद्वंश्यं वा सेतुं कुर्यात् यथाह नारदः पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वा
मिनं तु यः सेतुं प्रवर्तयेत्कश्चिन्न स तत्फलभाग्भवेत् मृते तु स्वामिनि पुनस्तद्वंश्ये
चापि मानवे राजानमामन्त्र्य ततः कुर्यात्सेतुप्रवर्तनमिति क्षेत्रस्वामिनमपृष्ट्वा
मिदानीं सेतोः प्रवर्तयितारं प्रत्याह स्वामिनेऽयोऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत् उत्प
न्ने स्वामिनो भोगस्तदभावे महीपतेः क्षेत्रस्वामिनमनुपगम्य तदभावे राजानं वा
यः परक्षेत्रे सेतुं प्रवर्तयति स सौ न फलभाग्भवति अपि तु तदुत्पन्ने फले क्षेत्रस्वा
मिनो भोगस्तदभावे राज्ञस्तस्मात्प्रार्थनपार्थदानेन वा क्षेत्रस्वामिनं तदभावे राजा
नं वानुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्तनीय इति तात्पर्यं क्षेत्रस्वामिना सेतुर्न प्रतिषे
ध्य इत्युक्तमिदानीं तस्यैव प्रसक्तानुप्रसक्त्या कंचिद्धर्मान्तरमाह फालाहतमपि
क्षेत्रं न कुर्याद्यो न कारयेत् स प्रदाप्योऽकृष्टफलं क्षेत्रमन्येन कारयेत् यः पुनः
क्षेत्रस्वामिपार्श्वेऽहमिदं क्षेत्रं कृषपश्चादुत्सृजति न चान्येन कर्षयति तत्क्षे
त्रे यद्यपि फालाहतमीषद्धलेन विदारितं तेन सम्यग्बीजावापार्हं तथापि तस्याकृष्ट

राम

लक्षणार्थं यस्मिन् क्षेत्रे यावत् शष्पला धान्यादिकं गवादिभिर्विनाशितं तावत् क्षेत्रफलं
तत्तावति क्षेत्रे एतावद्भवतीति सामन्तैः परिकल्पितं तत् क्षेत्रस्वामिने गोमी दापनीयः गोपस्तु
ताडनीय एव न फलं दापनीयः गोपस्य च ताडनं पूर्वोक्तधनदण्डसहितमेव पालदोषेण
सस्यनाशे द्रष्टव्यं यानष्टा पालदोषेण गोस्तु सस्या विनाशयेत् न तत्र गोमिनो दण्डः पाल
सं दण्डमर्हतीति वचनात् गोमी पुनः स्वापराधेन सस्यनाशे पूर्वोक्तमेव दण्डमर्हति ना
ताडनं फलदानं पुनः सर्वत्र गोमिन एव तृणफलपुष्टमहिष्यादिक्षीरोपभोगद्वारेण त
त्क्षेत्रफलभागित्वात् गवादिभक्षितावशिष्टं पलालादिकं गोमिनैव ग्रहीतव्यं मध्यस्थ
कल्पितमूल्यदानेन क्रीतप्रायत्वात् अतएव नारदः गोभिस्तु भक्षितं सस्यं यो नरः
प्रतियाचते सामन्तानुमतं देयं धान्यं यत्र तु वापितं पलालं गोमिने देयं धान्यं वै कर्षक
स्य तु इति क्षेत्रविषयवादमाह पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते अकामतः
कामचारे चौरवद्दण्डमर्हति पथि मार्गसमीपवर्तिनि क्षेत्रे ऽकामतो गोभिर्भक्षि

१०३

ते ऽपि विवीतोपविष्टाभ्यां च पालोक्ताद्द्विगुणो दमः यदि पशवः परक्षेत्रे सस्यं भक्षयित्वा
तत्रैवानिवारिताः शेरते तदा पयोक्ताद्दण्डाद्द्विगुणो दण्डो वेदितव्यः सवत्सानां पुनर्भ
क्षयित्वोपविष्टानां मयोक्ताच्चतुर्गुणो वेदितव्यः वत्सानां द्विगुणः प्रोक्तः सवत्सानां
चतुर्गुण इति वचनात् क्षेत्रान्तरेष्वप्यन्तरे चातिदेशमाह सममेषां विवीतेपि खर
रोष्ट्रं महिषीसमं विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परिगृहीतो भूप्रदेशः त
दुपघातेपि तत्र क्षेत्रदण्डेन समं दण्डमेषां महिष्यादीनां विद्यात् खरस्योष्ट्रस्य
रोष्ट्रं तन्महिषी यत्र पादशेन दण्ड्यं तेन तत्ता दशेनेव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनी
यं सस्योपरोधकत्वे खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दण्डस्य चापराधानुसारि
त्वात् खरोष्ट्रमिति समाहारेन विवक्षितः सस्यविनाशे गोस्वामिनो दण्ड उक्त इदानी
क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह यावत्सस्यं विनश्येत्तावत्स्यात् क्षे
त्रिणः फलं गोपस्ताड्यस्तु गोमी तु पूर्वोक्तं दण्डमर्हति सस्यग्रहणं क्षेत्रोपचयोप

राम

कारिणो न दंड्याः आदिग्रहणात् सहस्तस्यादयो गृह्यंते ते चोशनसोक्ताः अथ आ
गंतुकी गोश्च सूतिका चाभिसारिणी अथ आश्वोत्सवे गावः आद्यकाले तये केचित्
अत्रोत्सृष्टपशूनां स्वामिकेभ्यो न दंड्यत्वासंभवाद्दृष्टांतार्थमुपादेयं यथोत्सृष्टपश
वो न दंड्याः एवं महोक्षादयः इति गोस्वामिन उक्ते दृष्टान्तो गोपं प्रत्युपदिश्यते यथार्पि
तान् पशून् गोपः सायं प्रत्यर्पयेत् तथा प्रदाप्यः कृतवेतनः गोस्वामिना प्रातः काले यथा
गणयित्वा समर्पितान् पशून् सायं वक्ताले गोपो गोस्वामिने पशून् विगण्य प्रत्य
र्पयेत् प्रमादेन स्वापराधेन मृतान् नष्टांश्च पशून् कृतवेतनः प्रकल्पितवेतनो गोपः
स्वामिने दाप्यः वेतनकल्पना च नारदेनोक्ता गवां शतात् वत्सतरी धेनुः स्याद्विशताद्भृ
तिः प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेऽहनीति प्रमादेनाशश्च मनुना स्पष्टीकृतः न
ष्टं जग्धं च कृमिभिः श्वहतं विषमे मृतं हीनं पुरुषकारेण प्रदद्यात्पाल एव हि इति प्र
सह्य चौरैरपहृतान्न दाप्यः यथाह मनुः विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति यदि देशे च काले च स्वामिनः

मि॰ अ॰

१०४

स्वस्य गोपो निवेदयेत् गोपगोमिनोर्द्वयोरप्यदोषः दोषाभावप्रतिपादनं च दंडाभावार्थं विनष्टसस्यमू
ल्यदानप्रतिषेधार्थं च कामचारकारितश्चारणे चौरवत् चौरस्य यादृशो दंडस्ता
दृशं दंडमर्हति एतच्चानावृतक्षेत्रविषयं तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि
न तत्र प्रणयेद्दंडं नृपतिः पशुरक्षिणामिति दंडाभावस्यानावृतक्षेत्रविषयत्वे
न मनुनोक्तत्वात् आवृते पुनर्मार्गादिक्षेत्रेपि दोषोस्त्येति वृतिकरणं च तेनैवोक्तं
वृतिं च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत् छिद्रं वा वारयेत् सर्वं श्वसूकरमुखानुग
मिति पशुविशेषेपि दंडाभावमाह महोक्षोत्सृष्टपशवः सूतिकागंतुकादयः पा
लो येषां च ते मोच्या दैवराजपरिप्लुताः महांश्चासौ उक्षा च महोक्षः वृषः सेक्ता उत्सृ
ष्टपशवः वृषोत्सर्गादिविधानेन देवतोद्देशेन सक्ताः सूतिका प्रसूता अनिर्दशाहा
आगंतुकः स्वयूथात्परिभ्रष्टो देशांतरादागतः एते मोच्याः परसस्यभक्षणेपि
न दंड्याः येषां च पालो न विद्यते तेपि दैवराजपरिप्लुता दैवराजोपहताः सस्यनाश

मीरिक्षयक्रयसंविभागपरिग्रहाधि तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलं अना
पृच्छ्य तु हि गृह्णानो हस्तच्छेदनमर्हतीति तद्द्विजव्यतिरिक्तविषयमनापद्विषयं वा गो
वादिव्यतिरिक्तविषयं वा इदमपरं गवादीनां स्थानागमनसौकार्यार्थमुच्यते धनुःश
तपरीणाहो ग्रामक्षेत्रान्तरं भवेत् द्वे शते खर्वटस्य स्यात् नगरस्य चतुश्शतं ग्रामक्षेत्र
योरन्तरं धनुःशतपरिमितं परीणाहः सर्वतो दिक्षु मनुससस्यं कार्यं खर्वटस्य प्रचु
रकंटकसंतानस्य ग्रामस्य द्विशतपरीणाहः नगरस्य बहुजनसंकीर्णस्य धनुषां चतुःश
तपरिमितमन्तरं कार्यं इति स्वामिपालविवादप्रकरणं संप्रत्यस्वामिविक्रयाख्यव्य
वहारपदमुपक्रमते तस्य च लक्षणं नारदेनोक्तं निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य
वा विक्रीयतेऽसमक्षं यत्स ज्ञेयोऽस्वामिविक्रयः इति तत्र किमित्याह स्वं लभेतान्यवि
क्रीतं क्रेतुर्दोषोऽप्रकाशिते हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः स्वामी आत्मसंबंधि
द्रव्यमन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभते गृह्णीयात् अस्वामिविक्र

स्वस्यसंशस्तीति देयमज्ञानां पुनः कर्णादिप्रदर्शनीयं कर्णौ चर्म च वालांश्च बस्तिं स्ना
युंच रोचनं पशुस्वामिषु दद्यात्तु मृतेष्वङ्गानि दर्शयेत् इति मनुस्मरणात् किंच पाल
दोषविनाशे च पाले दंडो विधीयते अर्द्धत्रयोदशपणः स्वामिने द्रव्यमेव च पालदो
षेण पशुविनाशे अधिकत्रयोदशपणं दंडं पालो दाप्यः स्वामिनश्च द्रव्यं वितरेत् पशु
मूल्यमध्यस्थकल्पितं दंडपरिमाणार्थः श्लोकोऽयं पूर्वोक्तमेव गोप्रसंगात् गोप्रचा
रमाह ग्रामेच्छया गोप्रचारो भूमिराजवशेन वा द्विजस्तृणैधःपुष्पाणि सर्वतः स्ववदाहरे
त् ग्रामेच्छया ग्राम्यजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छया वा गोप्रचारः कर्त्तव्यः
गवादीनां चरणार्थं कियानपि भूभागोऽकृष्टः परिकल्पनीय इत्यर्थः द्विजस्तृणैधंत
राभावेगवाग्निदेवतार्थं तृणकाष्ठकुसुमानि सर्वतः स्ववत्तत्र निवारित आहरेत् फ
लानि च परिवृतादेव गोग्रासार्थं तृणमेधांसि वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाद
दीत फलानि चापरिवृतानामिति गौतमस्मरणात् एतच्च परिग्रहीतविषयं अप
रिग्रहीतोऽनु द्विजव्यतिरिक्तस्यापि परिग्रहादेव स्वत्वसिद्धेः यथानेनैवोक्तं स्वा

राम

213

212

माषिकस्यसमर्प्पयेत्तावत्तेवास्तेनोऽशुद्धोभवतीतिविश्वरूपाचार्येण व्याख्यातंतदि
दमनुपपन्नं विक्रेतुर्दर्शनाच्छुद्धिरित्यनेनपौनरुक्त्यप्रसंगात्ततोऽन्यथाव्याख्या
येन नष्टापहृतमितिनाष्टिकंप्रसयमुदेशकालातिक्रमेस्वामिनपालाद्यसन्निधाने
तद्विज्ञापनकालात्प्राकलापनाशंकाएंस्वयमेवगृहीत्वानृपःसमर्प्पयेत् यदिह
र्त्तरि किं कर्त्तव्यमित्यतआह विक्रेतुर्दर्शनाच्छुद्धिः स्वामीद्रव्यंनृपोदमं क्रेतामूल्य
मवाप्नोतितस्माद्यस्तस्यविक्रयी यद्यसौप्रहीनः क्रेतानमवेदंअपहृतमन्यस
काशात्क्रीतमिति वक्ति तदातस्यक्रेतुर्विक्रेतृदर्शनमात्रेणाशुद्धिर्भवतिनपुनरसा
वभियोज्यः किंतु तत्सूदर्शितेनविक्रेत्रासहनाष्टिकस्यविवाह यथाहबृहस्पतिः
मूलेसमाहृतेक्रेतानाभियोज्यः कथंचन मूलेनसहवादस्तुनाष्टिकस्यविधीय
तइति तस्मिन्विवादेयद्यस्वामिविक्रयविनिश्चयोभवति तदातस्यनष्टापहृ
तस्यगवादिद्रव्यस्ययोविक्रेतातस्यसकाशात्तस्वामीनाष्टिकः स्वीयंद्रव्यमवा

मि.व.

१०६

यस्यस्वत्वहेतुत्वाभावात् विक्रीतग्रहणंदत्तादिग्रहणस्योपलक्षणार्थं अस्वामिकृतत्वे
नतुल्यत्वात् अतएवोक्तं अस्वामिविक्रयंदानमाधिंचविनिवर्त्तयेदिति केतुःपुनर
प्रकाशितेनगोपितेनक्रयेदोषोभवति न्यूनाद्धीनात्तद्रव्यागमोपायहीनात् रहसिचैकां
न्ते सम्भाव्यद्रव्यादपिहीनमूल्येऽस्वन्तरेणमूल्येनचक्रयवेलाहीनेवेलपाहीनोवेला
हीनः क्रयेणाज्ञादौक्रीतस्तत्क्रयक्रेतातस्करोभवति तस्करवदंडादिभाग्भवती
त्यर्थः यथोक्तं द्रव्यमस्वामिविक्रीतंप्राप्यस्वामीनदाप्नुयात् प्रकाशक्रयतःशु
द्धिकेतुःस्तेयंरहःक्रयादिति स्वाम्याभियुक्तेनकेतारिकिंकर्त्तव्यमित्यतआह न

राम

ष्टापहृतमासाद्यहर्त्तारंग्राहयेन्नरं देशकालातिपत्तौवागृहीत्वास्वयमर्पयेत्
नष्टमपहृतंवाऽस्मदीयंक्रयादिनाप्राप्यहर्त्तारंविक्रेतारंग्राहयेन्नरंचौरोद्धरणका
धिभिः आत्मविशुद्ध्यर्थंराजदेशंप्राप्यपर्यंच अथाविदितदेशान्तरंगतःकालां
तरेवाविपन्नस्तन्मूलसमाहरणाशक्तोविक्रेतारमदर्शयित्वैवस्वयमेवतद्धनं

215

214

षिकेनराज्ञेदेयः अत्रायंक्रमः पूर्वंस्वामीनष्टमात्मीयंसाधयेत् ततःक्रेताचौ
र्यपरिहारार्थंमूल्याप्त्यर्थंचविक्रेतारमानयेत् अथानेतुंनशक्नोतितदात्मदोषपरिहा
रायक्रयंसाधयित्वाद्रव्यंनाधिकस्यसमर्पयेदिति तस्करप्रच्छादकंप्रत्याह इत्थं
नष्टंयोद्रव्यंपरहस्तात्स्वाम्नुयात् अनिवेदयन्नृपेदंड्यः सतुषण्णवतिंपणान् इत्येप्र
नष्टंवाचौरादिहृतंस्वद्रव्यमनेनमदीयद्रव्यमपहृतमितिनृपस्यानिवेदयेद्यदि
नायोग्रहस्तस्सौबहुतरांनवतिंपणान् दंडनीयस्तस्करप्रच्छादकत्वेनदुष्टत्वात्
राजपुरुषानीतंप्रत्याह शौल्किकैः स्थानपालैर्वानष्टापहृतमाहृतं अर्वाक्संव
त्सरात्स्वामीहरेत्परतोनृपः यदाशुल्काधिकारिभिः स्थानरक्षिभिर्वानष्टमपहृतं
द्रव्यंराजपार्श्वंप्रत्यानीतंतदासंवत्सरादर्वाक्प्राप्तश्चेत्तत्स्वामिकः स्वंद्रव्यमवा
प्नुयात् ऊर्ध्वंपुनः संवत्सराद्राजागृह्णीयात् स्वपुरुषानीतंचद्रव्यंजनसमूहेषूद्
घोष्ययावत्संवत्सरंराज्ञारक्षणीयं यथाहगौतमः प्रनष्टस्वामिकमधिगम्यराज्ञे
प्रब्रूयुर्विख्याप्यसंवत्सरंराज्ञारक्ष्यमिति यत्पुनर्मनुनावध्यंतरमुक्तं प्रनष्टस्वामि

मि. अ.
१०७

मोतिन्यस्यापराधानुरूपंदंडं क्रेताचमूल्यमवाप्नोति अथासौदेशांतरंगत
स्तदायोजनसंख्ययानयनार्थंकालोदेयः प्रकाशंवाक्रयंकुर्यान्मूलंवापिसमर्प
येत् मूलानयनकालश्चदेयस्तत्राध्वसंख्ययेतिस्मरणात् अथाविज्ञातदेशत
यामूलमाहर्तुंनशक्नोतितदाक्रयंशोधयित्वैवशुद्धोभवति असमाहार्यमूलस्तु
क्रयमेवशोधयेदितिवचनात् यदापुनःसाक्ष्यादिभिर्द्रव्येणवाक्रयंनशोधयतिमू
लंचनप्रदर्शयतितदासएवदंडभाग्भवति अनुपस्थापयन्मूलंक्रयंवाप्यवि
शोधयन् यथाभियोगंधनिनेधनंदाप्योदमंचसद्वतिस्मरणात् स्वंलभेतान्यवि
तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुंधंति महार्घेण वा विक्रीणंते तेषा
मुत्तमसाहसो दंडो विहितो मन्वादिभिः केन पुनरर्घेण पणितव्यमित्याह राजनि स्थाप्य
ते योऽर्घः प्रत्यहं तेन विक्रयः क्रयो वा निःस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः राजनि संनि
हिते सति यस्तेनार्घः स्थाप्यते निरूपितेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्यः निर्गत
सर्वो निःस्रवो विशेषः तस्माद्राजनिरूपितार्घाद्यो निःस्रवस्स एव वणिजां लाभकरी
न पुनः स्वच्छंदपरिकल्पितात् मनुनाचार्यकरणे विशेषो दर्शितः पंचरात्रे पंचरात्रे
पक्षे मासे तथागते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप इति किंच स्वदेशपण्ये
तु शतं वणिग् गृहीत पंचकं दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी स्वदेशप्राप्तं प
ण्यं गृहीत्वा यो विक्रीणीते सोऽपि पंचकं शतं पणशते पणपंचकं लाभं गृह्णीयात् पर
देशात्प्राप्ते पुनः पण्ये शतं पणमूल्ये दशपणं लाभं गृह्णीयात् यस्य पण्यस्य ग्रहण
दिवस एव विक्रयः सम्पद्यते यः पुनः कालान्तरे विक्रीणीते तेन तस्याकालोत्कर्षवशा

२३३

270

राम

स्थावरस्य क्षयं दाप्यो जंगमस्य क्रियाफलमिति विक्रेतुरुपभोगस्य उच्यते क्रेतुः सं
बंधत्वेन ह्रीयमाणत्वेन पुनः कुड्यपातस्तस्य घातादिरूपः तस्य तु उपहतस्य वा परिपर्
हृतापरिहृतस्य वा विक्रेतुरेवासावनर्थो विक्रीयासंप्रयच्छतः इत्यनेनोक्तत्वात् यदा यस्मै
क्रेत्रा देशांतरात्स्वयं गृहीतार्थमागतं सदा तस्य पण्यमादाय देशांतरे विक्रीणानस्य यो ला
भस्तेन सहितं पण्यं विक्रेत्रा दापयितव्यः अयं च क्रीतपण्य समर्पणे नियमोऽनुशयाभावे
द्रष्टव्यः सति त्वनुशये क्रीत्वा विक्रीय वा किंचिदित्यादिमनूक्तं वेदितव्यं किंच विक्रीतम
पि विक्रेयं पूर्वं क्रेतर्यगृह्णति हानिश्च क्रेतृदोषेण क्रेतुरेव हि सा भवेत् यदा पुनर्जातो
नुशयः क्रेता पण्यं न गृह्णाति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयं यदा पुनर्विक्रेत्रा
दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तत्र क्रेतुरेवासौ हानिर्भवेत्
दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तत्र क्रेतुरेवासौ हानिर्भवेत्
पण्याग्रहणाख्येण क्रेतृदोषेण नाशितत्वात् अपि च राजदैवोपघातेन पण्ये दोषमु
पागते हानि विक्रेतुरेवासौ याचितस्याप्रयच्छत यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं
विक्रेता न समर्प्पयत्सजातानुशयोपि तच्च राजदैविकेनोपहतं भवति तदासौ विक्रे

मि॰ व्य॰

१३४

तुरेव एकारमपि पण्यं विक्रीयासंप्रयच्छतोदयमाह गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्र
यच्छति सोदयं तस्य दाप्योसौ दिग्लाभं वा दिगागते गृहीतमूल्यं यस्य पण्यस्य विक्रेत्रा
तद्गृहीतमूल्यं तद्यदि विक्रेत्रा प्रार्थ्यमानाय स्वदेशवणिजे क्रेत्रे न समर्प्प्यते तत्तदुप
ण्यं यदि क्रयकाले बहुमूल्यं स कालांतरेऽल्पमूल्येन लभ्यते तदा घे ह्रास स्तेनोपउद
यो वृद्धिः पराय स्य स्थावरजंगमात्मकस्य तेन सहितं पण्यं विक्रेत्रा तेदापनीयः यदा
पुनः पण्यस्योदयो नास्ति किंतु क्रयकाले यावद्वयेनामूल्यस्यैव पण्य
मूल्यह्रासः स्तेः पण्यस्योदयो नास्ति किंतु क्रयकाले यावद्वपेतो मूल्यस्य पस्यपण्य
मूल्यह्रासस्तत्तः पण्यस्योदयो नास्ति किंतु क्रयकाले यावद्वयेतो मूल्यस्य पण्य
मिति प्रतिपत्तव्यं तद्वत्तदा तस्य पण्यमादाय तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोद
यं न सहितं दिके त्रिकमित्यादि प्रतिपादितत्वाद् द्विरूपो दयेन वा सहितं क्रेतृवांछावशा
द्दापनीयः यथाह नारदः ॥ अर्घश्चेदवहीयेत सोदयं पण्यमावहेत् स्थानिनामेष
नियमो दिग्लाभं दिग्विचारिणामिति यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावः तदा तत्
स्मिन्पण्ये वस्त्र गृहादिके य उपभोगस्तदाच्छादनसुखानिवसनादिरूपो विक्रेतुस्त
त्सहितं पण्यमसौ दाप्यः यथाह नारदः विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति

२७२

राम

१३४

नुशयो न कार्यः विक्रेतुश्च महार्घनिबंधनं पण्यक्षयमपश्यता नानुशयितव्यं यदि
क्षयपरिज्ञाते पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भवति अनुशयका
लावधिश्च नारदेनोक्तः क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी विक्रेतुः प्रति
देयं तत्तस्मिन्नेवाह्न्यविक्षतं द्वितीयेह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत् द्विगुणं तु
तृतीयेह्नि परतः क्रेतुरेव तदिति अपरीक्षितक्रयविषये पुनः पण्यवैगुण्यनिर्व
धनानुशयावधिर्दशाहं च ससहसाहसादिना दर्शितः एवं तदनया वाचोयुक्त्याव
द्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते यथापरायपरीक्षाविधिरलभ्य
ल्पदोषाणामतः पण्यदोषवद्वृद्धिक्षयकारणत्वे तयाभावेनुशयकालाभ्यंतर
पि यद्यनुशयं करोति तदा पण्यषड्भागं दंडनीय अनुशयकारणसंभवेप्यनुश
यकालातिक्रमेणानुशयं कुर्वन्तोऽयमेव दंडः उपभोगेप्यविनश्वरेषु स्थिरा
र्थेष्वनुशयकालातिक्रमेणानुशयं कुर्वतोऽयमेव दंडः मनूक्तो द्रष्टव्यः परे
[illegible] नापि दापयेत् आददानो ददच्चैव राज्ञा दंड्यः शतानि ष

नुरेवानोन्यद्दुष्टं पण्यं विनष्टं सदृशं क्रेत्रे देयं किंच अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्य
दि विक्रीणीते दमस्तत्र मूल्यात्तद्द्विगुणो भवेत् यः पुनर्विनैवानुशयमेकस्य हस्ते वि
क्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा यः पण्यं सच्छिद्रं तद्दोषं विक्रीणीते न तदा तस
एवमूल्याद्द्विगुणो दमो वेदितव्यः नारदेनाप्यत्र विशेषो दर्शितः अन्यहस्ते तु विक्रेतुम्
योऽन्यस्मै तत्प्रयच्छति द्रव्यं तद्द्विगुणो दाप्यो विनयं तावदेव तु निर्दोषं दर्शयित्वा तु सदो
षं यः प्रयच्छति स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव चेति सर्वस्यायं विधिर्दत्तमूल्ये
पण्ये द्रष्टव्यः अदत्तमूल्ये पुनः परीपवामात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः
समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः यथाह नारदः दत्तमूल्यस्य पण्यस्य वि
धिरेष प्रकीर्तितः अदत्तेऽन्यत्र समयान्न विक्रेयपद्धति विक्रयानुशयोऽभिहितः क्रीता
नुशयस्वरूपं तु प्राक्प्रपंचितमधुना तदुभयसाधारणं धर्ममाह क्षयं वृद्धिं च व
णिजा पण्यानामविजानता क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदंडभाक् परीक्षि
तक्रीतपण्यानां क्रयोत्तरकाले क्रयकालपरिमाणेनार्घकृतां वृद्धिमपश्यतां क्रेता

राम

शुल्कं नृपो हरेत्। व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत्॥ इयत्पण्यस्येयन्मूल्य
मित्यर्घस्य प्रक्षेपणाद्राजतो निरूपणाद्धेतोरसौ मूल्याद्विंशतितमं भागं शुल्कार्थं
गृह्णीयात्। यत्तु व्यासिद्धमन्यत्र न विक्रेयमिति राज्ञा प्रतिषिद्धं यच्च राजयोग्यं मा
णिक्यादिकमप्रतिषिद्धमपि तद्राज्ञोऽनिवेद्य लाभलोभेन विक्रीतं तच्च द्रव्यं राजगामि मूल्या
दाननिरपेक्षं तत्सर्वं पण्यं राजापहरेदित्यर्थः। मिथ्यावदन्परीमाणं शुल्कस्था
नादपासरन्। दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी॥ यः पुनर्वणिक् शुल्कं
वञ्चनार्थं पण्यपरीमाणं निह्नुते शुल्कग्रहणस्थानादपसरति यश्चास्य स्वस्य
वे स्वं विवादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा ते सर्वे पण्यादष्टगुणं दं
ण्डनीयाः। अपि च नौरिकः स्थलजं शुल्कं गृह्णन्दाप्यः पणान्दश ब्राह्मणप्रातिवे
श्यानामेतद्दानिमन्त्रणे। शुल्कं हि द्विविधं स्थलजं जलजं च। तत्र स्थलजमर्घप्र
क्षेपणाद्विंशभागं शुल्कं नृपो हरेदित्यत्रोक्तं जलजं तु मानवैरभिहितं पणं याने
[illegible] पादार्धं रिक्तकः पुमान्। भाण्डपूर्णानि यानानि तार्यं दाप्या
[illegible]

277

१३६

इति इति विक्रीयासंप्रदानं नाम प्रकरणं। संभूयसमुत्थानं नाम विवादपदमिदानी
मभिदधाति समवायेन वणिजां लाभार्थं कर्म कुर्वतां लाभालाभौ यथाद्रव्यं यथा वा
संविदा स्तो। सर्वैर्वयमिदं कर्म मिलित्वा कुर्महे इत्येवंरूपा संप्रतिपत्तिः समवाय
स्तेन ये वणिग्जननर्तकप्रभृतयो लाभलिप्सवः प्रातिस्विकं कर्म कुर्वन्ति तेषां लाभाल
भ उपचयापचयौ यथाद्रव्यं येन यावद्धनं पण्यग्रहणाद्यर्थं दत्तं तदनुसारेणाव
सेयौ यदा प्रधानगुणभावपर्यालोचनया अस्य भागद्वयमस्यैको भाग इत्येवंरू
पया संविदा समयेन यथा संप्रतिपत्तौ तथा वेदितव्यौ। किंच प्रतिषिद्धमनादि
ष्टं प्रमादाद्यच्च नाशितं। स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक्॥ तेषां संभूय
प्रचरतां मध्ये पण्यमिदमित्थं न व्यवहर्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितं
यच्चानादिष्टमननुज्ञातं वा कुर्वाणेन तथा प्रमादात् प्रज्ञाहीनतया वा येन यन्नाशितं स
तत्सकलं वणिग्भ्यो दद्यात्। यः पुनस्तेषां मध्ये चौरराजादिजनिताद्व्यसनात्सपण्यं
पालयति स च तस्माद्रक्षितात्पण्याद्दशमं भागं लभते। अर्घप्रक्षेपणाद्विंशभागं

276

राम

देनचदायादीनांवैकल्पिकमधिकारंदर्शयति योर्वायर्थनियमस्तुपत्नीदुहितरस्ता
दिप्रतिपादितएवात्रापिविज्ञेयः शिष्यसब्रह्मचारिब्राह्मणनैषधोवणिक्रमाभिप्र
वचनप्रयोजनीवणिजामपिमध्येयः पिंडदानोदकदानादिसमर्थः समगृह्णीयात्साम
र्थ्याविशेषपुनः सर्ववणिजः संसृष्टिनोविभज्यगृह्णीयुस्तेषामप्यभावेदशवर्षदाय
घागमनंप्रतीक्ष्यानागतेतेषुस्वयमेवराजागृह्णीयात् तादितंनारदेनस्वयमुक्तं एक
सोचेत्स्यान्तरणंदायादोस्यतदनुपात् अन्योवासान्तिदायादेशात्कश्च सर्वएवैत
नदभावेनुगुप्तंतत्कारयेद्दशावत्सरात् अस्वामिकमदायादंदशवर्षाण्यस्थितंततः राजा
तदात्मसात्कुर्यादेवंधर्मोनहीयतइति किंच जितिसत्रेपुनर्निर्लोभमशक्तोमनका
रयेत् जिह्मोवंचकस्तंनिर्लोभंनिर्गतंलाभंलाभमपाद्धि यस्सजेपुर्वसिः कुर्युः पश्च
संभूयकारिणांमध्येभांडप्रसवेक्षणादिकंकर्तुमसमर्थोसावन्येनस्वकंकर्म्मणां
भारवहनतदाबव्ययपरीक्षणादिकंकारयेत् प्रागुक्तविधिंवणिग्धर्ममृत्विगादिष
[illegible] अनेनविधिरास्यात्तत्रैविककर्षककर्मणां अनेनलाभालाभौयथाद्रव्य

१३७ 279

निसारतः रिक्तभांडानि यत्किंचित्सुमांसस्थापरिघदाहृते सुल्के दयेप्ययमपरोविशे
बानभिन्नकार्षापणमस्तिशुल्कं नशिल्पवृत्तौनशिशौनदूते नभैक्षलब्धेनहृताव
शेषेनश्रोत्रियेप्रव्रजितेनयज्ञइति तीर्यन्तेऽनेनेतितरः नावादिस्तज्जन्यशुल्केधि
कृतस्तारिकः यस्सपदास्यलोभंवेश्मशुल्कंगृह्णाति तदादशपणान्दंडनीयः वेशोवे
श्मप्रातिवेश्यश्चेतिस्ववेश्माभिमुखः स्ववेश्मपार्श्वस्थोवोच्यते तत्रभवाः प्राति
वेश्याः ब्राह्मणश्चेत्प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्याः तेषांश्रुतवृत्तसम्पन्ना
नांश्राद्धादिषुविभवेसत्यपिनिमंत्रणेऽकृते दशपणात्मकंदंडंनवेदितव्यं देशां
तरमस्तंवाणिग्निवक्यंप्रस्याह देशांतरगतेप्रेतेद्रव्यंदायादबांधवाः ज्ञातयो
वाहरेयुस्तदागतास्तैर्विनानृपः यदासंकीर्णंभूयकारिणांमध्येयः कश्चिदे
शांतरगतोमृतस्तदीयमंशंदायादाः पुत्राद्यपक्षेवर्गाः बंधवोमातृपक्षामा
तुल्याद्याज्ञातयोपक्षवर्गाव्यतिरिक्ताः सपिंडावाआगताः संभूयव्यवहारिणो
येदेशांतरादागतास्तेवागृह्णीयुः तैर्विनादायादाद्यभावेराजागृह्णीयात् वारा

278 राम

वचनं यदंशाद्भागनियमः स्यादतः समं स्यादश्रुतित्वादिति न्यायेन सर्वेषां समांशभाक्त्वं क
र्मानुरूपेणांशभाक्त्वमिति युक्तं तत्रोच्यते ज्योतिष्टोमप्रकृतिके द्वादशाहेऽर्द्धिनस्तृतीयिनः
पादिन इति सिद्धवदनुवादो न घटते यदि तत्र स्वप्रकृतिभूतज्योतिष्टोमेऽर्द्धतृतीयचतुर्थांशभा
क्त्वं मैत्रावरुणादीनां न स्यात् तौ वैदिकाद्विभक्तिसमाख्याबलात्स्वगतोंशनियमो वक्त
व्य इति निरवद्यं इति संभूयसमुत्थानप्रकरणं इदानीं स्तेयं प्रस्तूयते तल्लक्षणं च मनु
नाभिहितं स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतं निरन्वयं भवेत्स्तेयं हृत्वापह्नूय
ते च यदिति अन्वयवद्द्रव्यरक्षिराजाध्यक्षादिसमक्षं प्रसभं बलावष्टंभेन यत्परधनह
रणादि क्रियते तत्साहसं स्तेयं तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वंच
यित्वा परस्वधनहरणं तदुच्यते यद्वा साहसं परिहृत्य न मयेदं कृतमिति भयान्निह्नुते तदपि स्ते
यं नारदेनाप्युक्तं उपायैर्विविधैरेषां छलयित्वापकर्षणं सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनी
षिण इति तत्र तस्करग्रहणपूर्वकत्वाद्दंडनस्य ग्रहणस्याज्ञानपूर्वकत्वाज्ज्ञानोपायं ताव
दाह ग्राहकैर्गृह्येत चौरो लोप्त्रेणाथ पदेन वा पूर्वकर्मापराधी च तथा चाशुद्धवास

मित्यादिवणिग्धर्मं कथयन्नेनर्त्विजां होत्रादीनां कृषीवलानां नटनर्तकतक्षादीनां च शिल्पक
र्मोपजीविनां विधिर्वर्तनप्रकारो व्याख्यातस्तत्र चर्त्विजां धनविभागे विशेषो मनुना दर्शितः
सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिन
इति अस्यायमर्थः ज्योतिष्टोमे तं शतेन दीक्षयंतीति वचनेन गवां शतमृत्विगानतिरूपे
दक्षिणा कार्येति नियुक्तम् ऋत्विजश्च होत्रादयः षोडश तत्र कस्य कियानंश इत्यपेक्षायामि
दमुच्यते सर्वेषां होत्रादीनां षोडशर्त्विजां मध्ये ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गाता
रस्ते गोशतस्यार्द्धिनः सर्वेषां भागपरिपूर्णोपपत्तिश्च शतस्याष्टाचत्वारिंशद्रूपार्द्धेना राम
र्द्धभाजः अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्ते तदर्द्धेन त
स्य मुख्यांशस्यार्द्धेन चतुर्विंशतिरूपेणार्द्धभाजः ये पुनस्तृतीयिनोऽच्छावाकनेष्ट्राग्नी
ध्रप्रतिहर्तारस्ते तृतीयिनो मुख्यांशस्य षोडशगोरूपस्य तृतीयांशेन तृतीयांशभाजः ये
तु पादिनो ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य चतुर्थांशो द्वादशगोरू
पस्तद्भाजः ननु कथमयं संशनियमो घटते न तावदत्र समयो नापि द्रव्यसमवायो नापि

नाविक्रयिकास्ते सर्वे चौर्यसंभावनया ग्राह्याः एवं नानाविधैश्चौर्यलिंगान्पुरुषान्गृ
हीयुस्ते चौराः किंवा साधुवृत्तिसम्यक् परीक्ष्य न तु लिंगदर्शनमात्रेण चौर्यनिश्चयं कुर्यात्
चौरस्यापि साधोरपि चौर्यलिंगसंबंधसंभवात् यथाह नारदः अन्यहस्तात्परिभ्रष्टम
कामादुत्थितं भुवि चौरेण वा प्रक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत् तथा असत्याः सत्य
संकाशाः सत्याश्चासत्यसन्निभाः दृश्यंते विविधा भावास्तस्माद्युक्तं परीक्षणमि
ति एवं चौर्यशंकया गृहीतेनात्मा शोधनीयः यस्मादाह गृहीतः शंकया चौर्ये नात्मानं चे
द्विशोधयेत् दापयित्वा हृतं द्रव्यं चौरदंडेन दंडयेत् यदि चौर्यशंकया गृहीतस्तन्निस्त
रणार्थं आत्मानं न शोधयेत् दापय दानवधादिदंडभाग्भवेत्तो मानुषेण तदभावे दिव्ये
न चात्मा शोधनीयः ननु नाहं चौर इति मिथ्योत्तरे कथं प्रमाणं संभवति तस्याभावरूप
त्वात् उच्यते हि यस्य सत्ताव्यवहारगोचरत्वेन व्याप्यास्तत्र कुर्यादित्यत्र प्रतिपा
दितं मानुषं पुनर्यद्यपि साक्षात्प्रमाणं मिथ्योत्तरे न संभवति तथापि कारणसंसर्गभा
वस्य मिथ्याकारणसाधनमुखेनाभावमपि गोचरयंत्येव यथा नाशापहारकाले

१२७ कः यश्चौरोयमिति जनैर्विख्यापितः सोपि ग्राह्यः के राजपुरुषस्थानपालप्रभृतिभिर्ग्रहीतव्यः लो
प्त्रेण पदेन भाजनादिना वा चौर्यचिह्नेन नाशादिदेशावस्थादारभ्य चौरपदानुसरणेन वा ग्राह्यः
पश्च पूर्वकर्मापराधी प्राक्कृतश्च स्यात्तावौर्ये अशुद्धोऽप्राज्ञातो वासः स्थानं यस्य सोप्यशुद्ध
वासकः सोपि ग्राह्यः किंच अन्येपि शंकया ग्राह्याः जातिनामादिनिह्नवैः द्यूतस्त्रीपानसक्ता
श्च शुष्क भिन्नमुखस्वराः परद्रव्यगृहाणां च पृच्छका गूढचारिणः निराया व्ययवंत
श्च विनष्टद्रव्यविक्रयाः किंच अन्येपि वक्ष्यमाणैर्लिंगैः शंकया ग्राह्याः जातिनिह्नवेन नाहं
शूद्र इत्येवं रूपेण नाम निह्नवेन नाहं डित्थ इत्येवं रूपेण आदिग्रहणात् स्वदेशग्रामकुला ग्राम
द्यपलापेन च लक्षिता ग्राह्याः द्यूतपण्यांगनामद्यपानादिव्यसनेष्वतिप्रसक्तास्तथा
कुतस्त्योसि त्वमिति चोरग्राहिभिः पृष्टा यदि शुष्कमुखो भिन्नस्वरो वा भवति तर्हि सोपि
ग्राह्यः वक्त्रनास्विन्नललाटादीनां ग्रहणं तथा ये निष्कारणं कियद्द्रव्यं धनं किंवा
स्य गृहमित्येवं पृच्छंति वेषांतरधारणेनात्मानं गूहयित्वा ये चरंति ये च आयाभावेपि ब
हुव्ययकारिणः ये च विनष्टद्रव्याणां जीर्णवस्त्रभिन्नभाजनादीनां अविज्ञातस्वामिका

285

से यथाहमनुः प्रायश्चित्तं तु कुर्वाणाः पूर्वे वर्णा यथोदिते नांक्याः राज्ञा ललाटे तु दाप्यास्तु
तमसाहसमिति चौरादर्शनेपहृतद्रव्यप्राप्त्युपायमाह घातिते पहृते दोषो ग्राममर्तु
निर्गते विवीतभर्तुस्तु पथि चौरोद्धर्तुरवीतके यदि ग्राममध्ये मनुष्यादिप्राणिवि
घो धनापहरणं वा जायते तदा ग्रामपतेरेव चौरापेक्षा दोषस्तत्परिहारार्थं स एव चौ
रं गृहीत्वा राज्ञेर्पयेत् तदशक्तौ हृतं धनं धनिने दद्यात् यदि चौरपदं स्वग्रामान्निर्गतं न र
ष्ट्रितेपुनस्तान्यदं यत्र प्रविशति तद्विषयाधिपतेरेव चौरं धनं वार्प्ययेत् तथा च नारदः
गोचरे यस्य मुष्येत तेन चौरः प्रयत्नतः ग्राह्यो दाप्योथवाऽशेषपदं यदि न निर्गतं त्रि
गते पुनरेतस्मान्नचेदन्यत्र पातितं । सामंतान्मार्गपालांश्च दिक्पालांश्चैव दापये
त् इति विवीते तु पहारे विवीतस्वामिन एव दोषः यस्त्वपथ्ये तमद्रंतं भक्ष्यवीत
केवावीतादन्यत्र क्षेत्रे तदा चौरोद्धर्तुर्मार्गपालस्य दिक्पालस्य वापराधः किंच स्व
सीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति पंचग्रामी बहिः क्रोशाद्दशग्राम्यथ वा पुनः
यदा पुनर्ग्रामाद्बहिः सीमापर्यंते क्षेत्रे पारिके भवति तदा तद्ग्रामवासिन एवैव

१८० हं देशान्तरस्य च स्वामिपुत्रे भी वित्ते चौर्याभावस्याप्यर्पणं सिद्धः शुद्धिमेवस्येव चौरदं
डमाह चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः यस्तु प्रागुक्तपरीक्षया तन्निरपेक्षं वा नि
श्चितं चौर्यं स तं स्वामिने पहृतं धनं स्वरूपेण मूल्यकल्पनया वा दापयित्वा विविधैर्वधै
र्घातयेत् एतच्चोत्तमसाहसदंडप्राप्तियोग्योत्तमद्रव्यविषयं न पुनः पुष्पवस्त्रादिषु
द्रमध्यमद्रव्यापहारविषयं साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः स एव दंडस्तेये
पि द्रव्येषु त्रिष्वनुक्रमात् ॥ इति नारदवचनेन वधरूपस्योत्तमसाहसस्योत्तमद्रव्यवि

284

षयत्वावस्थापितत्वात् यत्तु नर्द्धमनुवचनं अन्यायोपात्तवित्तत्वाद्धनमेषां मला राम
त्मकं अतस्तान् घातयेद्राजा नार्थदंडेन दंडयेदिति तदपि महापराधविषयं चौर
विशेषे अपवादमाह सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ब्राह्मणं पुनश्चौ
रं महत्यप्यपराधेन घातयेदपि तु ललाटे कयित्वा स्वदेशान्निःकाशयेत् अंकनं च श्व
पदाकारं कार्यं तथा च मनुः गुरुतल्पे भगः कार्यः सुरापाणे सुराध्वजः स्तेये च श्वपदं
कार्यं ब्रह्मण्यपशिराः पुमानिति एतच्च दंडोत्तरकालं प्रायश्चित्तमचिकीर्षतां द्रष्ट

पात्नीतिमनुस्मरणात् किंच उत्क्षेपकग्रंथिभेदौ करसंदंशहीनकौ कार्यौ द्वितीयापराध
करपादैकहीनकौ वस्त्राद्युत्क्षिप्यापहरतीत्युत्क्षेपकः वस्त्रादिबद्धं स्वर्णादिकं वि
स्रस्य योऽपहरत्यसौ ग्रंथिभेदः तौ यथाक्रमं करेण संदंशसंदंशेन तर्जन्यंगु
ष्ठेन च हीनौ कार्यौ द्वितीयापराधे पुनः करश्च पादश्च करपादं तु तयोरेकं करपादैकं वा कर
पादैकं तद्धीनं यथोक्तौ करपादैकहीनौ कार्यौ उत्क्षेपकग्रंथिभेदयोः क्रमेण करपा
दं च छिंद्यादित्यर्थः एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयं तद्दंडच्छेदस्योक्तो
दंडउत्तमसाहसइतिनारदवचनात् तृतीयापराधे तु वध एव तथा च मनुः अंगु
लीग्रंथिभेदस्य छेदयेत्प्रथमे ग्रहे द्वितीये हस्तचरणौ तृतीये वधमर्हति जाति
द्रव्यपरिमाणपरिग्रहवाविनियोगवयःशक्तिगुणदेशकालादीनां दंडगुरुलघुभाव
कारणानामानंत्यात्प्रतिद्रव्यं वक्तुमशक्तेः सामान्येन दंडकल्पनोपायमाह क्षुद्रम
मध्यमहाद्रव्यहरणे सारतो दमः देशकालवयःशक्ति संचिंत्य दंडकर्मणि क्षुद्रा
णां मध्यमानामुत्तमानां द्रव्याणां हरणे सारतो मूल्याद्यनुसारतो दंडः कल्पनीयः

१४१

दस्युर्यदि सीमातो बहिश्चोरपदं न निर्गतं निर्गत्य पुनर्ग्रामानादिकं चौरपदं प्रविशति स ए
व चौरार्पणादिकं कुर्यात् यदा त्वनेकग्राममध्ये क्रोशमात्राद्बहिः प्रदेशे घातितो मु
षितो वा चौरपदं च जनसंमर्दादिना भग्नं तदा पंचानां ग्रामाणां समाहारः पंचग्रामी द
शग्रामसमाहारो वा दद्यात् विकल्पवचनं तु यथा यस्यासन्नपदत्वधनप्रत्यर्पणा
दिकं कुर्यादित्येवमर्थं यदा त्वन्यतोऽपहृतं धनं दापयितुं न शक्नोति तदा स्वकोशादे
व राजा दद्यात् चौरहृतमवजित्य यथास्थानं गमयेत् स्वकोशाद्वा दद्यादिति गौ
तमस्मरणात् मुषितामुषितसंदेहे मानुषेण दिव्येन वा निर्णयः कार्यः यदि त
स्मिन् दाप्यमाने भवेन्मोषे तु संशयः मुषितः शपथं दाप्यो बंधुभिर्वापि साधयेदि
ति वृद्धमनुस्मरणात् अपराधविशेषेण दंडविशेषमाह बंदिग्राहांस्तथा वाजिकु
जराणां च हारिणः प्रसह्य घातिनश्चैव शूलानारोपयेन्नरान् बंदिग्राहादीन्स्त्रा
वधेनैन घातकांश्च नरान् शूलानारोपयेत् अयं च वधप्रकारविशेषोपदेशः अ
न्यथा गारायुधागारदेवतागारभेदकान् हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारा

राम

287

286

केपहारेऽष्टगुणः प्रापादनीयः इतरेषांपुनर्विदुषांत्रयाणांवर्णानांविदुषांस्तेयेद्वि
गुणोत्तराणिकिल्बिषाणिषोडशद्वात्रिंशच्चतुःषष्टिगुणानिदंडाःप्रपादनीयाः यस्मा
द्विद्वच्छूद्रादिकर्तृकेअपहारेदंडभूयस्त्वं मनुनाप्ययमेवार्थोदर्शितः अष्टापाद्यं
तुशूद्रस्यस्तेयेभवतिकिल्बिषंषोडशैवतुवैश्यस्यद्वात्रिंशत्क्षत्रियस्यतु ब्राह्मणस्य
चतुःषष्टि पूर्णंवापिशतंभवेत् द्विगुणावाचतुःषष्टिस्तद्दोषगुणवेदिनइति तथा
परिमाणत्तमपिदंडगुरुत्वंदृश्यते यथाहमनुः धान्यंदशभ्यःकुंभेभ्योहरतोऽभ्य
धिकेवधः शेषेप्येकादशगुणंदाप्यस्तस्यचतद्धनमिति विंशतिद्रोणकःकुंभःक
न्तेह्रिपमाणःस्वामिगुणापेक्षयास्मिन्सद्गुर्भिक्षकालापेक्षयावाताडनंगच्छेद्
नवधरूपादंडयोज्याः तथासंख्याविशेषादपिदंडविशेषोरत्नादिषु सुवर्णरज
तादीनामुत्तमानांचवाससां रत्नानांचैवसर्वेषांशतादभ्यधिकेवधः पंचाशतस्त्व
भ्यधिकेहस्तच्छेदनमिष्यते शेषेत्वेकादशगुणंदंडंप्रकल्पयेदिति तथाऽभ्य
विशेषाद्विपरीतक्रमेणाल्पकुलीनानांनारीणांच विशेषतः रत्नानांचैवसर्वेषांहर

289

१४२

सुद्रादिद्रव्यस्वरूपंचनारदेनोक्तं मर्त्यांडासनखट्वास्थिदारुचर्मतृणादियत् शमीधा
न्यंकृतान्नंच सुद्रंद्रव्यमुदाहृतंवासः कौशेयवर्जंचगोवर्जंपशवस्तथाहिरण्यव
र्जंलोहंचमध्यंव्रीहियवाअपि हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः देवब्राह्म
णराज्ञांचद्रव्यंविज्ञेयमुत्तमं त्रिप्रकारेष्वपिद्रव्येष्वौत्सर्गिकः प्रथममध्यमोत्तमसा
हसरूपोदंडनियमस्तेनैवदर्शितः साहसेषुयएवोक्तस्त्रिषुदंडोमनीषिभिः सएवदं
डःस्तेयेपिद्रव्येषुत्रिष्वनुक्रमादिति मत्स्यपशुमणिकमलिकादिषुगोवाजिव्यति
रिक्तेषुचमहिषमेषादिपशुषु ब्राह्मणसंबंधिषुचकनकधान्यादिषुतरत्तमभा   राम
वोस्तीत्युच्चावचदंडविशेषाकांक्षायांमूल्याद्यनुसारेणदंडः कल्पनीयः तत्रच
दंडकर्मणिदंडकल्पनायांतद्धेतुभूतंदेशकालवयःशक्तिसम्यक्चिंतनीयं
एतच्चजातिद्रव्यपरिग्रहादीनामुपलक्षणं तथाहाष्टापाद्यंस्तेयकिल्बिषंशूद्रस्य
द्विगुणोत्तराणीतरेषांप्रतिवर्णंविदुषोतिक्रमेदंडभूयस्त्वमिति अयमर्थः किं
ल्बिषशब्देनात्रदंडोलक्ष्यते यस्मिन्नपहारेयोदंडउक्तः सविद्वच्छूद्रकर्तृ

288

जोऽध्वगः क्षीणवृत्तिर्द्वौ विक्षुद्वे च मूल्यके आददानः परक्षेत्रान्न दंडं दातुमर्हति त
था व्रणकव्रीहिगोधूमयवानां मुद्गमाषयोः अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकः पथि
स्थैर्नैव सहस्रमेभक्तेन स्थानि षडनग्नता अप्रवस्तन विधानेन हर्त्तव्यं हीनकर्मणः इ
ति अथ चोरस्यापि चौरोपकारिणो दंडमाह भक्तावकाशाग्न्युदकमंत्रोपकरणव्यया
न् दत्वा चोरस्य वा हंतुर्जानतो दम उत्तमः भक्तमशनं अवकाशो निवसस्थानं अ
ग्निश्चौरस्य शीतापनोदनार्थं उदकं तृषितस्य मंत्रश्चौर्यप्रकारोपदेशः उप
करणं चौर्यसाधनं व्ययः अपहारार्थं देशांतरं गच्छतः पाथेयं एतानि चोरस्य
हंतुर्वा दुष्टं ज्ञानन्नपि यः प्रयच्छति तस्योत्तमसाहसो दंडः चौरोपेक्षिणामपि दे
यः शक्ताश्चाप्युपेक्षंते तेनापि तद्दोषभागिन इति नारदस्मरणात् किंच शस्त्रावपा
ते गर्भस्य पातने चोत्तमो दमः उत्तमो वाधमो वापि पुरुषस्त्रीप्रमापणे परगात्रेषु
शस्त्रस्यावपातने दासीब्राह्मणगर्भव्यतिरेके गर्भस्य पातने चोत्तमो दमः
[illegible] इत्यादिना शतदंडो विहितः ब्राह्मण
[illegible]

१४३

२९१

णो वधमर्हति अकुलीनानां तु दुष्कुलानां पुरुषहरणे दंड उत्तमसाहसः स्त्रीपरा
धेनुसर्वस्वं कन्यां तु हरन्वधमर्हति क्षुद्रद्रव्याणां तु माषात्पूनमूल्यानां च शतगुणो
मेदः काष्ठभांडतृणादीनां मृन्मयानां तथैव च वेणुवैणवभांडानां तथा स्नाय्वस्थिच
र्मणां शाकानामार्द्रमूलानां हरणे फलमूलयोः १ गोरसेक्षुविकाराणां तथा ल
वणतैलयोः पक्वान्नानां कृतान्नानां मत्स्यानामामिषस्य च सर्वेषामल्पमूल्या
नां च मूल्यात्पंचगुणो दमः इति नारदस्मरणात् यः पुनः प्रथमसाहसः क्षुद्रद्रव्येषु शतत्व
रः पंचशतपर्यंतो सौ माषमूल्ये तदधिकमूल्ये वा यथायोग्यं व्यवस्थापनीयः
यत्पुनर्मानवं क्षुद्रद्रव्यगोचरं वचनं तेनाप्याधिक्यगुणो दम इति तदल्प इति तद्यो
जनशारावादिविषयं तथापराधगुरुत्वाद्दपि दंडगुरुत्वं यथासंधिं छित्वा तु ये
चौर्यं रात्रौ कुर्वंति तस्कराः तेषां छित्वा तु हस्तौ तीक्ष्णशूले निवेशयेदित्ये
वं सर्वेषामानंत्यात्प्रतिद्रव्यं वक्तुमशक्तेर्जातिं परिमाणादिभिः कारणैर्दंडगु
रुलघुभावः कल्पनीयः पथिकादीनां पुनरल्पापहारेन दंडः यथाह मनुः द्वि

२९०

राम

श्चास्यपरपुंसिरत्ता: पृथक् अविज्ञातपुरुषेणघातितस्यसंबंधिन: सुता: प्रसास
न्नाश्चबांधवा: केनास्यकलहोजात इति कलहमाश्रुप्रष्टव्यास्तथामृतस्यसंबंधिन्यो
योषितोपायाश्चपरपुंसिरत्ताव्यभिचारिण्यस्ता अपिप्रष्टव्या: कथंप्रष्टव्या इत्याह स्त्री
द्रव्यवृत्तिकामोवाकेनचायंगत: सह मृत्युदेशसमासन्नप्रेक्षैर्दीपिजनैश्शनै: कि
मयंस्त्रीकामेद्रव्यकामोवृत्तिकामोवातथा तस्यांकिंसंबंधिन्यांचास्त्रियामस्य
रतिरासीत् कस्मिन्वाद्रव्येप्रीति: कुतोवावृत्तिकाम: कुतोवावृत्तिकाम: केनवा
सहद्वेषांतरंगतनानाप्रकारंव्यभिचारिण्यायोषित: पृथक्पृथक्पृथक्विश्वा
सहृदयंप्रष्टव्या: तथामरणदेशनिकटवृत्तिनोलोकाः विकायेयेयनासेतापिविश्वासपू
र्वकंप्रष्टव्या: एवंनानाप्रकारै: प्रश्नैर्हंतारंनिश्चित्यतदुचितोदंडोविधातव्य: किंच
हस्त्रवेशमवनयामाविवीतरवलहकाः राजपत्नीनिगामीवद्यध्वस्तकपाग्निना हे
त्रपक्कफलसस्योपेतवेश्मगृहंवनमटवीक्रीडावनंचायामे विवीतउक्तलक्ष
णं खलंवायेदहतियश्चराजपत्नीमभिगच्छतितान्सर्वान्कटैर्वीरणमयैर्वेष्टयि

गर्भेतुहत्वागर्भमविज्ञानमिस्तत्रदहत्यातिदर्शवस्याति पुरुषस्यास्त्रियाश्चप्रमा
पणेशीलवृत्ताद्यपेक्षयोत्तमोवादंडोव्यवस्थितोवेदितव्य: अपिच विप्रदुष्टांस्त्रि
यांश्चप्रमापणेशीलवृत्ताद्यपेक्षयोत्तमोवाधमोवादंडोव्यवस्थितोवेदितव्य:
अपिच विप्रदुष्टांस्त्रियंचैवपुरुषघ्नीमगर्भिणीं सेतुभेदकरीचाप्सुशिलांबध्वा
प्रवेशयेत् विशेषेणप्रदुष्टाविप्रदुष्टाभ्रूणघ्नीस्वगर्भपातनीश्ववयात् पुरुषस्य
हंत्रीसेतूनांभेत्रीच एतागर्भरहिता: स्त्रीगलेशिलांबध्वाऽप्सुप्रवेशयेत् पथान
स्वंवेत किंच विषाग्निदांपतिगुरुनिजापत्यप्रमापणे विकर्णकरनासौष्ठील
वागोभि: प्रमापयेत् अगर्भिणीमितिअनुवर्ततेयापरवधार्थमन्नपानादिषुविषं
क्षिपति यावदाहार्थंग्रामादिष्वग्निं तथायाचनिजपतिगुर्वपत्यानिमारयतितां
छिन्नकर्णकरनासौष्ठीत्वादांतैर्दुष्टबलीवर्दैप्रवाह्यमारयेत् स्तेयप्रकरणे
यदेतत्साहसिकस्यदंडविधानंतत्प्रासंगिकमित्तिमंतव्यं अविज्ञातकर्तृकेहन
नेहंतृज्ञानोपायमाह अविज्ञातहतस्याशुकलहंसुतबांधवा: प्रष्टव्यायोषित

प्र

त्तिपसावाज्ञातासंग्रहणेवक्तेग्रहीतव्यः परस्त्रीग्रहणंनिपुणावरूढादिनिरासा
र्थ। किंच नीवीस्तनप्रावरणसक्थिकेशावमर्शने अदेशकालसंभाषंसहैकस्या
नमेवच यः पुनपरदारापरिधानग्रंथिप्रदेशकुचप्रावरणजघनमूर्द्धरूर्वादिस्पर्श
नंसाभिलाषस्वाचरत्ति तथाऽदेशानिर्जनेजनन्ताकीर्णेवांधकाराकुलेकालेसंला
पंकरोति परनार्यावासहैकमंचकादौरिरंसयेवावतिष्ठत्ते सोपिसंग्रहणप्रवर्त्तो
ग्राह्यः एतच्चाशंकयमानदोषपुरुषविषयमित्तरस्यनदोषः यथाहमनुः यस्त्व
ना। स्यारित्तः पूर्वमभिभाषेत्तकारणात्‌ नदोषंप्राप्नुयात्किंचिन्नहित्तस्यव्यत्तिक्रम
इति यः परस्त्रियास्पृष्टः क्षमेत्तेः सोवपिग्राह्यइत्तितेनैवोक्तंस्त्रियंस्पृशेदेश
यः स्पृष्टोवामर्षयेत्तया परस्परस्यानुमत्तेसर्वंसंग्रहणंस्मृतमिति यश्चमनेयंवि
दग्धाअसत्प्रमित्तचरित्तिश्लाघयाभुजंगजनसमक्षेस्वापयत्सोवपिग्रा
ह्यइत्तितेनैवोक्तं दर्पाद्वायदिवामोहात्स्लाघयावास्वयंवदेत्‌ पूर्वमयेयंभुक्ते
तितस्यसंग्रहणेस्मृत्तमित्ति प्रतिषिद्धयोः स्त्रीपुंसयोः पुनः संलापादिकरणे

295

१४५

त्वादहेत्वाक्षेत्रादिदानकानामारणंउपसंर्गादिदंविधानं इतिसेयप्रकरणं स्त्रीसंग्र
हणारव्यंविवादपदंव्यारव्यायत्ते प्रथमसाहसादिदंडप्रास्पर्थंत्रेधातस्वरूपंव्या
सेनविषत्ते त्रिविधेत्तत्समारव्यातंप्रथमंमध्यमोत्तमं अदेशकालसंभावनिर्जने
चपरस्त्रिया कटाक्षावेक्षणंहास्यंप्रथमंसहसंस्मृत्तं प्रेषणंगंधमाल्यानांधूपभू
षणवाससं प्रलोभनंचान्नपानैर्मध्यमंसमुदाहृतं सहैसनंविविक्तेषुपरस्पर
मुपाश्रयः केशाकेशिग्रहश्चैवसम्यक्संग्रहणंस्मृत्तं स्त्रीपुंसयोमिथुनीभावः सं
ग्रहणं संग्रहणज्ञानपूर्वकत्वात्तत्कर्त्तुर्दंडविधानस्यतज्ज्ञानोपायंत्तावदाह। पुमा
न्संग्रहणेग्राह्यः केशाकेशिपरस्त्रियासद्यो वाकामजैश्चिह्नैः प्रतिपत्तोद्वयोस्तथा
संग्रहणेप्रवृत्तः पुमान्केशाकेश्यादिलिंगैर्ज्ञात्वाग्रहीतव्यः परस्परकेशग्रहणपूर्व
कात्क्रीडाकेशाकेशी तत्रतेनेदमितिसरूपइतिबहुव्रीहौसत्तिकर्मव्यत्तिहारइतिस
मासांतत्पत्स्यः ग्रव्ययत्वाल्त्वलुसत्तत्तीयाविभक्तिः तत्तश्चायमर्थः परभार्यया
सहकेशाकेशिक्रीडनेनामिनवैः करस्हदशनादिक्षतप्रभवैरागस्रैत्तेलिंगैर्द्वयोः संप्र

294

राम

तच्चसास्वश्रूर्मातुलानी पितृष्वसापितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा
दुहिताचार्यभार्याचसगोत्राशरणागता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया
आसामन्यतमांगच्छन्गुरुतल्पग उच्यते शिश्नस्योत्कर्त्तनात्तत्रनान्योदण्डोविधी
यतइतिनारदस्मरणात् प्रातिलोम्येउत्कृष्टवर्णस्त्रीगमनेक्षत्रियादेःपुरुषस्यव
धः एतच्चगुप्ताविषयमन्यत्रनुधनंदण्डः अवपिहिताचेद्ब्राह्मण्यांगुप्तयांसह वि
सर्जनेनापिशूद्रवद्दण्डोदाधयेनाकटाग्निना ब्राह्मणीयद्यगुप्तांतुसेवेतांवैश्यपार्थिवौ
वैश्यंपंचशतंकुर्यात्क्षत्रियंतुसहस्रिणमिति मनुस्मरणात् शूद्रस्यपुनरगुप्तामु
त्तमवर्णांस्त्रियंव्रजतोलिंगच्छेदनसर्वस्वापहारौगुप्तांतुव्रजतस्तस्यवधसर्व
स्वापहारौतितेनैवोक्तं शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसन् अगुप्तेअंगसर्व
सर्वस्वोगुप्तेसर्वेणहीयतइति नार्याःपुनर्हीनवर्णगमनेसाःकर्णधारादिग्रह
णान्नासादिच्छेदकर्त्तनं आनुलोम्येनचासवर्णवाव्रजेत्पादंदण्डः कस्मः अयंचव
धाद्युपदेशोराज्ञएवात्तस्यैवपालनाधिकारान्नद्विजातिमात्रस्यांतस्य ब्राह्मणः

दण्डमाह स्त्रीनिषेधेशतंदद्याद्विशतंतुदमंपुमान्प्रतिषेधेतयोर्द्वेणपपाससग्रहणे
तथा प्रतिषिद्ध्यस्तथैतिप्रतिषेधःपितृपक्षादिभिर्यनसहसंभाषणादिकं निषिद्धंतत्प्र
वर्त्तमानास्त्रीशतपणंदण्डंदद्यात् पुरुषःपुनरेवंनिषिद्धप्रवर्त्तमानोद्विशतंदद्यात्
दयोस्तुस्त्रीपुंसयोःप्रतिषिद्धेवर्त्तमानयोःसंग्रहस्तोसंभोगेवर्णानुसारेणयोदण्डोवस्य
तेसएवविज्ञेयः एतच्चधारणादिभार्याव्यतिरेकेण नैषचारणदारेषुविधिरात्मोपजी
विषु सज्जयंतिहितेनारीर्निगूढाश्चारयंतिचेतिमनुस्मरणात् तमिदानींसंग्रहणे
दण्डमाह स्वजातावुत्तमोदण्डआनुलोम्येतुमध्यमः प्रातिलोम्येवधःपुंसोभार्याकर्णा

राम

दिकर्त्तनं चतुर्णामपिवर्णानांबलात्कारेणसजातीयगुप्तपरदाराभिगमनेसाशीति
पणसहस्रंदण्डनीयः यदापुनःसवर्णामगुप्तामानुलोम्येनगुप्तांवाव्रजतितदामन
वेविशेषउक्तः सहस्रंब्राह्मणोदण्ड्योगुप्तांविप्रांबलाद्व्रजन् शतानिपंचदण्ड्यःस्या
दिच्छंत्यासहसंगतः सहस्रंब्राह्मणोदण्ड्योगुप्तांतुतेव्रजन् शूद्रायांक्षत्रियावि
शोःसहस्रंतुभवेद्दमइति एतच्चगुरुसख्यभार्यादिव्यतिरेकेणद्रष्टव्यं मातामा

असम्याऽत्वमिच्छन्तीमपहरतः प्रथमसाहसो दंडः कन्यादूषणे दंडमाह दूषणे तु कर
छेद उत्तमायां वधस्तथा अनुलोमास्वित्यनुवर्त्तते यथकामां कन्यां बलात्कारे
ण नखक्षतादिना दूषयति तदा तस्य करच्छेदः कर्त्तव्यः यदा पुनस्तामेवांगुलिप्र
क्षेपेण योनिक्षतं कुर्वन् दूषयति तदा मनूक्तं षट्शतसहितोंगुलिच्छेदः अ
भिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः तस्याशु कर्त्ये अंगुल्यौ दंडं चार्हति षट्
शतमिति यदा पुनः सानुरागां पूर्ववद्दूषयति तदापि तेनैव विशेष उक्तः सकामां
दूषयानस्तु नांगुलीच्छेदमर्हति द्विशतं तु दमं दाप्यः प्रसंगविनिवर्त्तये इति यदा
तु कन्यैव कन्यां दूषयति तदा यथावात्तत्वाविशेषस्तेनैवोक्तः कन्यैव कन्यां या कुर्या
त्तस्यास्तु द्विशतो दमः या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौंड्यमर्हति अंगुल्यो
रेव वा छेदं खरेणोद्वहनं तथेति कन्यां कुर्यादिति कन्यायां योनिक्षतं वा कुर्यादित्य
र्थः यदा पुनरुत्कृष्टजातीयां कन्यामविशेषात्सानुरागामकामां वाभिगच्छति तत्
[illegible]

२९७

१८७

परीक्षार्थमपि परस्त्रीणां दर्शने तिरस्कारग्रहणे निषेधात् यदा तु राज्ञः स्तिवेस्त्रीका
लविलंबनेन कार्यानिपाताशंका न दस्वयमेव जारादीन् हन्यात् शस्त्रं द्विजातिभि
र्ग्राह्यं धर्मो यत्रोपरुध्यते तथा नाततायिवधे दोषो हंतुर्भवति कश्चन प्रकाशं वा प्रकाशं वा मनु
स्तं मन्युमृच्छतीति शस्त्रग्रहणाभ्यनुज्ञानाच्च तथा क्षत्रियवैश्ययोरसोम्यस्त्र्यभिग
मने यथाक्रमं सहस्रपंचशतपणात्मको दंडो वेदितव्यो तथाह मनु वैश्यश्चेत्क्षत्रि
यां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हतः पारदा
र्यप्रसंगात्कन्यापामपि दंडमाह अलंकृतां हरकन्यामुत्तमेच्छन्यथाऽधमं दंडं दद्या शाम
त्सवर्णासु प्रातिलोम्ये वधः स्मृतः विवाहाभिमुखो भूत्वा मलंकृतां सवर्णां कन्यामप
हरन्नुत्तमं साहसं दंडनीयः तदनभिमुखां सवर्णां हरन् प्रथमसाहसं उत्कृष्टवर्णा
जां कन्यामपहरतः पुनः क्षत्रियादेर्वध एव दंडविधानाच्चापहर्त्तृसकाशाद्दापि
ता स्यस्मिदेयेति गम्यते अनुलोम्यापहरणे दंडमाह सकामास्वनुलोमासु न दोषो
स्त्यन्यथाधमः यदि सानुरागां हीनवर्णां कन्यामपहरति तदा दोषाभावान्न दंडः

२९८

रुद्धाः पुरुषनियतपरिग्रहा भुजिष्याः यथा दास्योऽवरुद्धभुजिष्या वा भवेयुस्तासा
सु तथा च अद्वारं वेश्या स्वैरिणी नामविसाधारणस्त्रीणां भुजिष्याणां तासु च स
र्वेपुरुषसाधारणत्वात् यागम्यास्वपि गच्छतः पंचाशत्पणं दंडनीयः परपरिग्रहीतत्वे
नत्तासां परदारतुल्यत्वात् एतच्च स्पष्टमुक्तं नारदेन स्वैरिण्यब्राह्मणी वेश्या दा
सी निष्कासनी च या गम्याः स्युरानुलोम्येन स्त्रियो न प्रातिलोम्यतः आस्वेव तु भु
ज्यासु दोषः स्यात्परदारवत् गम्यास्वपि हि नोपेयाद्यत्तस्ताः सपरिग्रहाः इति

301

निष्कासिनी स्वाम्यनवरुद्धा दासी ननु च स्वैरिण्यादीनां साधारणत्वयागम्य
त्वाभिधानमयुक्तं नहि ज्ञातितः शास्त्रतो वा कस्यचन लोके साधारणा स्त्रिय
उपलभ्यन्ते तथाहि स्वैरिण्यो दास्यश्च तावद्वर्णस्त्रिय एव स्वैरिणीपार्षत्तिं
हित्वा सवर्णैकामतः अयेनु वर्णानामानुलोम्येन दास्यं न प्रातिलोम्यतः इति स्म
रणात् न च वर्णस्त्रियः पांपस्यो जीवन्ति मत्तेवार्षान्तरोपभोगो घटते दुःशी

१४८

एतदेवरज्जेद्यात् सवर्णास्कामां नुगच्छन्तो वध एव यथाह मनुः श्रुत्कोस्य
सेवमानः मनामिच्छेत्सितायदि षो कामां दूषयेत्कन्यां स सद्यो वधमर्हति सका
मां दूषयंस्तुल्यो न वधं प्राप्नुयान्नर इति किंच शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशं
सिता यश्च गच्छन् शतं दाप्यो हीनस्त्रीगां च मध्यमं स्त्रीशब्देनात्र प्रकृतत्वात् कन्या
व मध्यपते तस्या यदि काश्चिद्विद्यमानेनापस्मारराजयक्ष्मादिदीर्घकुत्सितरोग
संसर्गमैथुनत्वादिदोषात् प्रकाश्ये यमकन्यैति दूषयस्स सोषशतं दाप्यः मिथ्याभिशं

300

सने पुनरविद्यमानदोषाविष्कारेण दूषणे द्विशतं दाप्यः गोप्पति स्त्रियश्च गमने तु

राम

शतं दाप्यः यः पुनर्हीनां स्त्रियमंत्यावसायिनीमविशेषात्सकामामकामां वागो
वाभिगच्छस मध्यमसाहसं दंडनीयः साधारणस्त्रीगमने दंडमाह अवरुद्धा
सु दासीषु भुजिष्यासु तथैव च गम्यास्वपि पुमान्दाप्यः पंचाशत्पणिकं दमं
गच्छन्ति स्त्ययनुवर्त्तन्ते उक्तलक्षणा वर्णस्त्रियो दास्यस्ता एव स्वामिनाशुश्रूषा
हानि वद्दासा पोग्रहा एवस्यान्नव्यामिसे वं पुरुषान्तरेणोपभोगतो निरुद्धा अव

दिनिलिंगदर्शनाच्चाचगम्यत्वोपायश्चिंतेतुस्वधर्मस्खलननिमित्तंगम्यानांगर
णांचाविशेषाद्भवत्येवं यस्तुनवेश्यानांजात्यंतरासंभवेनवर्णोत्तः पातित्यमनु
मानादुक्तं वेश्यावर्णानुलोमाद्यन्यतः पतित्यामनुष्यजासाश्रयस्वाद्ब्राह्मणादिवद्विति
तत्रवुक्तं रगोलादिभिरनैकांतिकत्वात् अतोवेश्याख्याकाचिज्जातिरनादिर्वेश्या
मुत्पन्नजातेः समानजातेर्वापुरुषादुत्पन्नापुरुषैःसंभोगवृत्तिर्वेश्येति ब्राह्मण्यादि
वल्लोकप्रसिद्धिबलेनाभ्युपगमनीयं नचनिर्मूलेयंप्रसिद्धिः स्मर्यतेहिस्कंदपु
राणे पंचचूडानामकाश्चनाप्सरसस्तत्संततिर्वेश्याख्यापंचमीजातिरिति अ
तोगीकर्त्तव्या अनन्तत्सांनियतपुरुषपरिणयनविधिविधुरतयासमानोत्कृ
ष्टजातिपुरुषाभिगमनेनादृष्टदोषोनापिदंडस्तासुचानवरुद्धासुगच्छतांपु
रुषाणामप्यपिनदंडस्तथाप्यदृष्टदोषोस्त्येव स्वदारनिरतःसदेतिनियमात्
यस्तुवेश्याभिगमनेप्राजापत्यंविधीयतइतिप्रायश्चित्तस्मरणात्तेतिनिरवद्यं
अवरुद्धासुदासीष्विति अनेनदासी स्वैरि [illegible]

१८७

तः कामवृत्तोवाम्तुणैर्वापरिवर्जितः परिचर्यःस्त्रियासाध्व्यासततंदेववत्पतिः
कामंतुक्षपयेद्देहंपुष्पमूलफलैः शुभैः ननुनामापिगृह्णीयात्पत्यौप्रेतेपरस्यत्विति
तिनिषेधस्मरणात् नापिकन्याचस्यास्याःसाधारणत्वेपित्रादिपरिरक्षितत्वात् कन्या
याएवदानोपदेशात्अभावेपितथाविधायाएवस्वयंवरोपदेशात् नबदासीभा
वात्स्वधर्माधिकारच्युतिः पारतंत्र्यंहिदास्यं नस्वधर्मपरित्यागः नापिवेश्यासा
धारणीवर्णानुलोमजव्यतिरेकेणगम्याजात्यंतरासंभवात् तदुक्तःपातित्येव
पूर्ववदेवागम्यत्वंप्रतिलोमजत्वेतुतासांनितरामगम्यत्वमतःपुरुषांतरोपभो
गेत्तासांनिंदितकर्माभ्यासेनपातित्यात्पतितसंसर्गस्यचनिषिद्धत्वाच्चसकल
पुरुषोपभोगयोग्यत्वंसत्यमेवं किंत्वत्रस्वैरिण्याद्युपभोगेपित्रादिरक्षकराज
दंडभयादिदृष्टदोषाभावाचोपुक्तौदंडाभावश्चअवरुद्धासुदासीष्वितिनिय
तपुरुषपरिग्रहोपाधितोदंडविधानात्तदुपाधिरहितास्वपाद्यगम्यतेस्वैरि
ण्यादीनांपुनर्दंडाभावोविधानाभावात् न्यायेनजैमिनीमुहूर्त्तस्थेनकिंचिदपिरायये

राम

स्तथाशुल्कमनुभूय पुमानस्त्रियं आक्रमेण च संगच्छन्नुपात दंतनखादिभिः अयोनौ वा
भिगच्छेयो वृद्धभिर्वापि वासयेत् शुल्कमष्टगुणं दाप्यो विनयं तावदेव तु वेश्याः प्रधानं यास्त
त्र कामुकास्तन्मध्ये भविताः तत्समुत्थेषु कार्येषु निर्णयं संशये विदुरिति किंच अयोनौ
गच्छतो योषां पुरुषं वापि मेहतः चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे यस्तु स्वयोषां मु
खाद्द्वाभिगच्छति पुरुषं चाभिमुखो मेहति तथा प्रव्रजितां वा गच्छ तस्यासौ चतुर्विंशति

305

पणात्मकं दंडनीयः किंच अंत्याभिगमने त्वंक्यः कुबंधेन प्रवासयेत् शूद्रस्तथांत्य एव स्या
दंत्यस्यार्यागमे वधः अंत्या चांडाली तद्गमने त्रैवर्णिकान्प्रायश्चित्तानभिमुखान् स
हस्रं दंड्यः सजातिस्त्रियामिति मनुवचनात् पणसहस्रं दंडयित्वा कुबंधेन कुत्सितं वधे
न भगाकारेणांकयित्वा स्वराष्ट्रान्निर्वासयेत् शूद्रश्चेत्ताभिमुखस्य पुनर्दंडनमेव
च शूद्रः पुनश्चंडाल्यभिगमे ऽस एव चांडाल एव भवति अंत्यजस्य पुनश्चंडालादेरुत्
कृष्टजातिस्त्र्यभिगमे वध एव इति स्त्रीसंग्रहप्रकरणं व्यवहारप्रकरणमध्ये स्त्रीपुंस
योगाख्यमध्य परविवादपदं मनुनारदाभ्यां विवृत्तं तत्र नारदः विवाहादिविधिः

१५०

स्वभुजिष्यासु दंडो नास्तीत्यपि देवोक्तं तस्यापवादमाह अवरुद्धास्वभिगमे दं
डो दशपणः स्मृतः बह्वीनां यद्यका दासी चतुर्विंशतिकः पणः पुरुषसंभोगजी
विकासु दासीष्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो
दशपणो दंडः यदि बह्वीनां कामिनीं गच्छतो बलात्कारेणाभिगच्छतीति तर्हि प्रसेकं च
तुर्विंशतिपणपरिमितं दंडं दंडनीयाः यदा पुनस्तदिष्टयाभार्यात्वे स्थापश्चादन्नि
च्छती मनसापि बलाद्भुजंतीति तदा तेषां महादोषः यदि व्याध्याद्यभिभवस्तस्या अस्या

304

न्न व्याधितासभ्रम व्यग्रा राजकर्मकपरायणा आमंत्रितापि नागच्छेद्दंड्या राम
वं ड्वास्मतेति नारदवचनात् गृहीत्वेतनावेश्यानेच्छंती द्विगुणमावहेत्
अगृहीत्वे समं दाप्या पुमानप्येवमेव च यदा तु शुल्कं गृहीत्वा स्वयमपि नेच्छति त
दा शुल्कं द्विगुणं दद्यात् तथा शुल्कं दत्वा स्वयमनिच्छतः स्वस्य पुंसः शुल्क
हानिरेव शुल्कं गृहीत्वापलपस्त्री नेच्छंती द्विगुणं वहेत् अनिच्छन्दत्तशुल्कोपि
शुल्कहानिमवाप्नुयादिति तेनैवोक्तं तथान्यापि विशेषस्तेनैव दर्शितः अप्रयच्छ

मवाप्तिनः नृप एव तत्र स्वसाचारव्यपेतमार्गे वर्तमानानां प्रतिकूलतामास्थाय व्यवहारनि
र्णयं कुर्यात् एवं च वदता योऽन्यपाश्रयो व्यवहारस्तु स तत्प्रकीर्णकमित्यर्थः लब्धं भवति
तत्रापराधविशेषेण दण्डविशेषमाह न्यूनं वाभ्यधिकं वापि लिखेद्यो राजशासनं पारदारिकचौ
रं वा मुंचतो दण्ड उत्तमः राजदत्तभूमेर्निबन्धस्य वा परीमाणान्न्यूनत्वमाधिक्यं वा प्रकाशयद्रा
जशासनं यो लिखति पारदारिकं चौरं वा गृहीत्वा राज्ञे नर्पयित्वा मुंचति तावुभावुत्तमसा
हसं दण्डनीयौ प्रसंगान्नृपाश्रयव्यतिरिक्तव्यवहारविषयमपि दण्डमाह अभक्ष्येण द्विजं दू
ष्य दण्ड्य उत्तमसाहसं मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्द्धिकं मूत्रपुरीषादिनाभक्ष्याऽन्नहेण
न पानादिमिश्रणेन स्वरूपेण भक्षणं दूषयित्वा खादयित्वा उत्तमसाहसं दण्ड्यो भवति क्ष
त्रियं पुनरेवं दूषयित्वा मध्यमं वैश्यं दूषयित्वा प्रथमं शूद्रं दूषयित्वा प्रथमसाहसस्यार्द्धं दण्ड्यो
भवतीति संबन्धः लशुनाद्यभक्ष्यदूषणे तु दोषतारतम्याद्दण्डतारतम्यमूहनीयं किंच
कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी अंगहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसं र
सवेधाद्यापादितवर्णोत्कर्षैः कूटैः स्वर्णैर्व्यवहारशीलो यः स्वर्णकारादिर्यश्च

१५१

स्त्रीणां पत्तु पुंसां च कीर्त्यते स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यत इति मनुरप्याह अ
स्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशं विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वश
इति यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितया नृपसमक्षं व्यवहारो निषिद्धः तथा
पि प्रत्यक्षेणैकेण परंपरया वा विदिते तयोः परस्परमभिचारे दण्डादिना स्वपती निजधर्म
मार्गे राज्ञा स्थापनीयौ इतरथा दोषभाग्भवतीति व्यवहारप्रकरणे राजधर्ममध्येऽस्य
स्त्रीपुंसधर्मजस्योपदेशः एतच्च विवाहप्रकरण एव सप्रपंचं प्रतिपादितमिति योगीश्व
रेण न पुनस्त्रोक्तं सांप्रतं प्रकीर्णकाख्यो व्यवहारपदं प्रस्तूयते तल्लक्षणं च कथितं नारदे

राम

न प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं यथा पु
नः प्रदानं संभेदः प्रकृतीनां तथैव च पाषंडिनैगमश्रेणिगणधर्मविपर्ययाः पितापुत्र
विवादश्च प्रायश्चित्तव्यतिक्रमः प्रतिग्रहविलोपश्च कोप आश्रमिणामपि वर्ण
संकरदोषश्च तद्वृत्तिनियमस्तथा न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णकमिति प्र
कीर्णके विवादपदे यद्विवादा राजाज्ञोल्लंघनतदाज्ञाकरणादिविषयास्तेन्नपस

कवलीवलीवर्द्दनस्यारज्जुर्यस्मिन्युगेनताछिन्ननस्यंसकटादिनेनतथाभग्नयुगेन
आदियहरणामस्याश्चक्रादिनाचयौनेनयश्चात्प्रवृत्तोपसरता चशब्दात्तिर्यगस
र्न्नापगच्छताप्रतिमुखंगच्छताचमनुष्यादिर्हिंसिते स्वामीप्राजकोवादोषभाक्नभ
वति अत्रतस्यतन्नजनितत्वाद्धिंसनस्य तथाचमनुः छिन्ननस्येभग्नयुगेतिर्यक्प्रति
मुखागते अक्षभंगेचयानस्यचक्रभंगेतथैवचछेदनेचैवयंत्राणांयोक्त्ररश्म्योस्त
थैवच आक्रंदेचाप्यपैहीतिनदंडंमनुरब्रवीदिति उपेक्षायांस्वामिनोदंडमाह। शाले
सुमोक्षयन्स्वामीदेहिनांशृंगिणांनयमंसाहसंदद्यादितिकुत्सितगुणंतथाअप्रवी
णप्राजकप्रेरितैर्देहिभिर्गजादिभिःशृंगिभिर्गवादिभिर्वध्यमानेसमर्थोपिस्वामीय
घमोक्षयन्नुपेक्षतेतदाकुशलप्राजकनियोजननिमित्तंप्रथमसाहसंदंडंदद्यात्
यदातुमारितोहिंसितिविकुक्षेपिनमोक्षयतितदाद्विगुणं यदापुनःप्रवीणमेवप्रा
जकंप्रेरयतितदाप्राजकदंडोनस्वामी यथाहमनुः प्राजकश्चेद्भवेदाप्तःप्राज

१५२

विमांसस्यकुत्सितमांसस्यश्वादिसंवद्धस्यविक्रयशीलःसौनिकादिःचशब्दान्नकृत्र
जत्तादिव्यवहारीचतेसर्वेप्रत्येकंनासाकर्णकरौष्ठैस्त्रिभिरंगैःहीनाःकार्याःचशब्दादंग
छेदनसमुच्चितप्रथमसाहसंदंडंदाप्याःयस्तुनमनुनोक्तं सर्वकंटकेपापिष्ठंहेमकारंतुपा
र्थिःप्रवर्तमानमार्गोप्यपिच्छेद्यलवशःक्षुरैरिति तदेवब्राह्मणराजस्वर्णविषयं विषय
विशेषेदंडाभावमाह चतुष्पदस्ततोदोषोनापैहीतिप्रजल्पतःकाष्ठलोष्ठेषुपाषाणवा
कुयुग्यकृतस्तथा चतुष्पादैर्गोगजादिभिःस्वतोयोदोषोमनुष्यमारणादिरूपोसौग
वादिस्वामिनोनभवत्यपसरेतिप्रकर्षेणलोकेचैभाषमाणस्य तथालकुटलोष्ठसायक
पाषाणक्षेपणेनवाहुनायुग्येनचयुग्यंवहताश्वादिनाकृतोयःपूर्वोक्तोदोषःसोपिका
ष्ठादीनप्राप्यतेनभवत्यपसरेतिप्रजल्पतःकाष्ठाद्युत्क्षेपणेनहिंसायादोषाभावक
थनेदंडाभावप्रतिपादनार्थंप्रायश्चित्तंपुनरबुद्धिकरणपूर्वनिमित्तमस्त्येव काष्ठादि
ग्रहणंचशक्तितोमरादेरुपलक्षणार्थं किंच। छिन्ननस्येनयानेनतथाभग्नयुगादिना
पश्चाद्वैवापसरताहिंसनेस्वाम्यदोषभाक् नसिभवारज्जुर्नस्या। छिन्नाशकटादिषु

राम

311

भेत्तारममित्रकर्णेषु जपंतं जिह्वामुक्तस्य स्वराष्ट्रान्निःकाशयेत् कोशापहरणे दोषु नर्वध
एव राज्ञः कोशापहर्तृंश्च प्रतिकूलेषु च स्थितान् घातयेद्विविधैर्दण्डैररीणां चोपजापकान्
निमनुस्मरणात् विविधैः सर्वस्वापहारांगछेदवधरूपैरित्यर्थः सर्वस्वापहारोपि
यस्य जीवनोपकारणं तत्रापहर्तव्यं चौर्यापहरणं विना यथाह नारदः आयुधान्या
युधीयानां वाह्यादीन्वाहजीविनां वेश्यास्त्रीणामलंकारान्वाद्यातोद्यादि तद्विदां य
च्च यस्योपकरणं येन जीवंति कारुकाः पुनः न ब्राह्मणः शारीरो सर्वस्वहरणेपि तन्नरा
जा हन्तुमर्हतीति ब्राह्मणं दण्डइतिनिषेधाद् यस्यानेशिरोमुंडनादिकं कर्तव्यं ब्राह्मण
स्य वधो भैक्ष्यपुरान्निर्वासनांकने ललाटे चाभिशस्तांकः प्रयाणं गर्दभेन चेति म
नुस्मरणात्। कीच मत्तां गलयविक्रेतुर्गुरोस्त्वादपि मनुस्तथा राजयानासनारो
दुर्दण्ड उत्तमसाहसः मत्तशरीरसंवेधिनो वस्त्रपुष्पादिविक्रेतुर्गुरोपि आचार्य
देस्ताडिपितुस्तथा राजानुमतिं विना तद्यानेंगजाश्वादिप्रासनं सिंहासनाद्यारोह
[illegible]मसाहसोदंडः किंच द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा विप्रत्वेन

१५३

कोपंताः प्रासो नियुक्तः प्राणिविशेषः कल्पनीयः यथाह मनुः मनुष्यमारणे क्षिप्रं चौ
रवत्किल्बिषी भवेत् प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु क्षुद्रकाणां पशूनां तु
हिंसायां द्विसत्तो दम पंचाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु गर्दभाजाविकानां तु दण्डः
स्यात्संचमाषकस्तु भवेद्दण्डः श्वसूकरनिपातनइति किंच जारं चोरेत्यभिवदन्दाप्यः
पंचशतं दमं उपजीव्य धनं मुंचंस्तदेवाष्टगुणीकृतं स्ववंशकलंकभयाज्जारं पारदा
रिकं चौर निर्गच्छेत्यभिवदन् पंचशतं पणानां पंचशतानि येनास्मिन्दमे सत्यधोक्तः स्तंसं
दाप्यः यः पुनर्जारहस्तात् धनमुपजीव्य उक्तोच्चरूपेण गृहीत्वा जारं मुंचसे सो याव
त्गृहीतं तावदष्टगुणीकृतं दण्डं दाप्यः किंच राज्ञो निष्ठप्रवक्तारं तस्यैवाक्रोशकारि
णां तन्मंत्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत् राज्ञो निष्टस्यानभिमतस्यामित्र
स्तोत्रादेः प्रकर्षेण भूयो भूयो वक्तारं तस्यैव राज्ञो आक्रोशकारिणं निंदाकरणशी
लं तदीयस्य च मंत्रस्य च मंत्रस्य स्वराष्ट्रविवर्द्धिहेतोः परराष्ट्रापक्षयकरस्य वा

राम

310

दुर्दृष्टस्तु तदा साक्षिण एव दंड्याः न जयिनोपि सभ्याः यदा तु राजानुमत्या व्यवहारस्य दुष्ट
त्वं तदा सर्व एव राजसहितास्सभ्या दंड्याः दंडनीयाः पादो गच्छति कर्त्तारं पादः साक्षिणमृच्छ
ति पादः सभासदः सर्वान्पादो राजानमृच्छतीति वचनात् एतच्च प्रत्येकं राजादीनां दंड
प्रतिपादनपरं न पुनरेकस्यैव पापापूर्वस्य विभागाय यथोक्तं कृत्स्नमन्यापि पूलुत
नस्वभावत्वादपूर्वस्य न्यायतो निर्जितव्यवहारस्य प्रत्यावर्तनेपि तु दंडमाह योमन्येता
जितोस्मीति न्यायेनापि पराजितः तमायान्तं पुनर्जित्वा दापयेद्द्विगुणं दमं यः पुनर्न्याय
मार्गेण पराजितोपि क्रोधान्नाहं पराजितोस्मीति मन्यते तमायान्तं कूटलेख्याद्युपन्या
सेन पुनर्व्यवहारमधिकर्तुमपि निवर्तमानं धर्मेण पुनः पराजयं नीत्वा द्विगुणं दंडं दापयेत् ना
रदेनाप्युक्तं तीरितं चानुशिष्टं च यो मन्येत विधर्मतः द्विगुणं दंडमास्थाय तत्कार्यं पुन
रुद्धरेदिति तीरितं साक्षिलेख्यादिना निर्णीतं अनुशिष्टं अनुशिष्टमुक्तं दंडपर्यं
तं नीतमिति यावत् यत्पुनर्मनुवचनं तीरितं चानुशिष्टं च यत्र क्वचन विद्यते कृतं तत्
धर्मतो ज्ञेयं न तन्निवर्त्तयेदिति तदर्थिप्रत्यर्थिनोरन्यतरस्यान्तरस्यातरः क्वचनाप्यव

१५८

चशूद्रस्य जीवतोऽष्टशतो दमः यः पुनः क्रोधादिना परस्य नेत्रद्वयं भिनत्ति पक्वजो
त्तिः शास्त्रविद्धर्मादिहिते पुनरप्यतिरिक्तो राज्ञो द्विष्टमनिषवत्सरं तेन वराड्यमुक्तिर्भ
विष्यतीत्यादि रूपमादेशं करोति तथाय शूद्रो भोजनार्थं यज्ञोपवीतादिब्राह्मणलिं
गानि दर्शयति तथाप्यष्टशतो दमः अष्टोपणशतानि यस्मिन्दमे स यथोक्तः प्राड्भो
जनार्थं पुनः शूद्रस्य विप्रवेषधारिणस्तप्तशलाकया यज्ञोपवीतवद्वपुष्यालिखे
दिति स्मरन्संतरोक्तेर्दष्टव्यं वस्सर्थं तु ब्राह्मणलिंगधारिणो वधएव द्विजातिलिंगि
नः शूद्रान्घातयेदिति स्मरणात् रागलोभादिनान्यथा व्यवहारदर्शने दंडमाह

राम

दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु सभ्याः सजयिनो दंड्या विवादद्विगुणं दमं
दुर्दृष्टान्समस्याचारप्राप्त धर्मोल्लंघनेन रागलोभादिभिरसम्यग्विचारितान्
कयमानान्व्यवहारांस्तु नः स्वयं सम्यग्विचार्य निश्चित दोषाः पूर्वसभ्याः जयिसहि
ताः प्रत्येकं विवादे यो दमः पराजितस्य तं द्विगुणं दाप्यः अप्राप्ते जेतृदंडविधिपरत्वो
दाचनस्य रागाल्लोभादित्यादिश्लोकेनापीन रुक्तं यदा पुनः साक्षिदोषेण व्यवहारस्य

प्रकरणं १ भुक्तिलक्षणं २ ऋणादानं ३ निक्षेपप्रकरणं ४ साक्षिलक्षणं ५ लेख्यलक्षणं ६ दिव्यस्वरूपलक्षणं ७ दायविभागः ८ सीमाविवादः ९ स्वामिपालविवादः १० अस्वामिविक्रयः ११ दत्ताप्रदानिकं १२ क्रीतानुशयः १३ अभ्युपेत्याशुश्रूषा १४ संविद्व्यतिक्रमः १५ वेतनादानं १६ द्यूतसमाह्वयोः १७ वाक्पारुष्यं १८ दण्डपारुष्यं १९ साहसं २० विक्रीयासंप्रदानं २१ संभूयसमुत्थानं २२ स्तेयप्रकरणं २३ स्त्रीसंग्रहप्रकरणं २४ इति चतुर्विंशतिप्रकरणानि ॥ ॥ ॥ ॥ ॥ ॥

315

१५५

स्याधर्मतो दत्तस्याशंकायां पुनर्द्विगुणं दंडं प्रतिज्ञानपूर्वकं व्यवहारं प्रवर्तयेत्तु
यद्धर्मतो दत्तं निश्चयोपि राज्ञा लोभादिना प्रवर्तनीयः स एव परं यस्तु तत्पांतरेणापि
न्यायापेतं कार्यं निवर्तितं तदापि सम्यक्कारीक्षणेन धर्मपथि स्थापनीयं न्यायापेतं पर
त्वेन राज्ञाऽज्ञानकृतं भवेत् तस्य न्यायविहितं पुनर्न्यायो निवेशयेदिति स्मरणान्
अन्यायग्रहीतं दंडधनस्य गतिमाह राज्ञान्यायेन यो दंडो गृहीतो वरुणाय तं निवेद्य
याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतं अन्यायेन यो दंडो राज्ञा लोभादिना गृहीतस्तत्त्रिंश

314

द्गुणीकृतं वरुणायेदमिति संकल्प्य ब्राह्मणेभ्यः स्वयं [illegible] दद्यात् यस्माद्वद राम
डरूपेण यावद्गृहीतमन्यायेन तावत्तस्मै प्रतिदेयमितरथाऽपहारदोषप्रसंगात्
अन्यायदंडग्रहणे पूर्वस्वामिनः स्वत्वविच्छेदाभावात् इति श्रीमत्पद्मनाभभट्टोपा
ध्यायात्मजश्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमि
ताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृतौ द्वितीयः समाप्तः ग्रंथसंख्या ४५००
॥ ॥अस्मिन् व्यवहारप्रकरणानुक्रमणिका कथ्यते आद्यं व्यवहारमातृका